अनन्तशयनविश्वविद्यालयः
अनन्तशयनसंस्कृतग्रन्थावलिः
ग्रन्थाङ्कः १६८.

नीतितत्त्वाविर्भावः

श्रीचिदानन्दपण्डितप्रणीतः.

सम्पादकः
डाक्टर् पि. के. नारायणपिल्ल, एं. ए., पिएच्. डि.,
अनन्तशयनस्थविश्वविद्यालयसंस्कृतशाखाध्यक्षः
पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षश्च-

अनन्तशयने भास्करमुद्रालये मुद्रितः
१९९३

मूल्यं रूप्यकचतुष्टयम्.

PREFACE.

THE NĪTITATTVĀVIRBHĀVA published for the first time as No. 168 in the Trivandrum Sanskrit Series is a Mimāmsa work composed by Cidānanda.[1] The following stanza occuring at the end of the work refers to the author and his father :

यो भूयस्सोमपायी श्रुतिसरणिमणिर्विश्वसाधारणश्री-
र्विद्यानामेकमोकस्त्रिजगति विदितः श्रीधरो ब्रह्मनिष्ठः ।
तत्सूनुः सूक्तिभूमिर्जगदुपकृतये श्रीचिदानन्दनामा
तत्त्वाविर्भावमुच्चैर्व्यधित बुधसभारोहणे रौहिणेयः ॥

The epithet रौहिणेयः might be interpreted to mean either one born under the asterism Rohini or one whose mother is called Rohini. From the first half of the verse it can be gathered that the author's father Sreedhara was a great scholar of steady religious devotion who had performed a number of Soma sacrifices.

No other work written by the author is known. As Cidānanda presupposes Sucaritamiśra, Pārthasārathimiśra, Bhattasomeśvara and Paritoṣamiśra the earliest limit of his date may be taken as A. D. 1250. Parameśvara II of the Payyur family who commented on the Nītitattvāvirbhāva flourished about A. D. 1500.[2] So this may be taken as the latest limit of Cidānanda's date. Here,

1. A descriptive note on this work by Sri. V. A. Ramasvami Sastri was published in the Bharatiyavidya Vol. X.
2. See Bharatiyavidya Vol. X. p. 184.

it may be noted, that Paramesvara was not sure of certain readings in the text. He has discussed some textual variants in his commentary.[3] So it may be inferred that the original may be older than the commentary at least by one century. On the basis of this inference Cidānanda may be placed in the fourteenth century.

In all possibility Cidānanda was a scholar who flourished in Kerala. All the old manuscript copies of his work now known belong to Kerala and they are written in Malayalam script. All of his commentators also appear to be sons of Kerala. Further Cidānanda is accepted as an authority by the two Nārāyanas of Kerala who composed the Mānameyodaya.

The work is an elucidation of the Mimāmsa doctrines in forty-four sections. It follows the school of Kumārila Bhatta and it discusses in detail the twenty-three *nītīs* in Mimāmsa so as to bring out their exact significance. According to the Sānkhya system of philosophy twenty-three principles originate from Prakrti. In the same manner, it is held, that twenty three *nītīs* emerge from the *ślokavārtika*.[4]

The Nītitattvāvirbhāva is a Prakaraṇa work and in it the author strives to establish the views of the *Bhattās* which are controverted by the adherents of other śāstrās and the followers of Prabhākara school of Mīmāmsa. One of the stanzas seen at the end brings out clearly the author's estimate of the importance of the work.

---

3. See the commentary on the स्वतःप्रामाण्यवादः.
4. Sri Paramesvara's commentary on the Nititattvāvirbhāva.

साकूतं गहनं कुमारिलमतं जिज्ञासुभिः पण्डितै-
रप्यस्मास्ववधीरणा यदि परं अन्थोऽयमभ्यस्यताम् ।
नो चेदुद्धततर्कतार्किकसभामध्यास्थितानां भवेत्
तत्तन्मार्गविचक्षणत्वविरहादात्मैव नो वञ्चितः ॥

According to the author the work is indispensible for all scholars who participate in the discussions on the Kumārila's school of Mīmāmsa.

Three commentaries on the work are known till now.

1. The commentary by Parameśvara II of the Payyūr family in Kerala.[5]

2. Maṅgalatika by Nīlakantha.[6]

3. Commentary by Mukundānandayati.[7]

For this edition of the work the following manuscripts are used :-

क	L. 314.	Travancore University Manuscripts Library.
ख	1032.	Do.
ग	666.	H. H. The Maharaja's Palace Library.
घ		Manuscript from the Adayar Library.
ङ	665.	H. H. The Maharaja's Palace Library.

---

5 For details see introduction to the Jaiminiyasutrarthasangraha page 21–22, Trivandrum Sanskrit Series. No. 156.

6. For details see ibid pp. 29–30.

7. See A. Triennial Catalogue of Manuscripts, Govt. Oriental Manuscripts Library Madras, Vol. IV. Part II Sanskrit A. p. 4255.

I acknowledge with thanks the assistance I have received from Sri V. G. Namboothiri and Sri S. Sankararama Sastri, Pandits, University Oriental Manuscripts Library in the publication of this work.

Trivandrum,
15-5-1958.

P. K. NARAYANA PILLAI.

विषयानुक्रमणी ।

विषयः		पृष्ठम्
अध्ययनविधिवादः	....	१
कार्यवादः	....	१४
स्वतः प्रामाण्यवादः	....	३०
कालप्रत्यक्षतावादः	....	४१
अन्यथाख्यातिवादः	....	४९
साक्षात्प्रतीतिनिरासवादः	....	९३
कल्पनापोढनिरासवादः	....	९६
योगरूढिवादः	....	९७
इन्द्रियवादः	....	६०
मनोवैभववादः	....	६१
अजसंयोगवादः	....	६४
पवनाकाशप्रत्यक्षतावादः	....	६६
कर्मप्रत्यक्षतावादः	....	६८
विशेषनिराकरणवादः	....	७४
समवायनिरासवादः	...	७५
तादात्म्यवादः	....	७७
अवयविवादः	....	८३
परमाणुवादः	....	८६
तमोवादः	....	८७
जातिनिर्णयवादः	...	९१
महासामान्यवादः	....	९४

विषयः		पृष्ठम्
अवान्तरजातिवादः	....	९७
भेदवादः	...	९९
अद्वैतवादः	....	१०७
अनिर्वचनीयवादः	....	१०८
अविद्यावादः	....	१११
मिथ्यावादः	....	११९
विज्ञानवादः	....	११६
स्वयंप्रकाशवादः	....	१२५
ज्ञानप्रत्यक्षतावादः	....	१३०
प्राकट्यवादः	....	१३१
योगिप्रत्यक्षनिरासवादः	....	१३६
अनुमानपरीक्षावादः	....	१३७
शाब्दपरीक्षावादः	....	१४४
उपमानपरीक्षावादः	....	१५०
अर्थापत्तिपरीक्षावादः	....	१५१
अभावपरीक्षावादः	....	१६९
स्फोटवादः	...	१८०
ईश्वरवादः	....	१८१
शब्दनित्यत्ववादः	....	१९१
क्षणिकवादः	....	२०१
आत्मवादः	....	२११
अन्विताभिधानवादः	....	२२३
वेदापौरुषेयवादः	....	२३५

॥ श्रीः ॥

चिदानन्दपण्डितप्रणीतः

नीतितत्त्वाविर्भावः ॥

प्रत्यक्षपरीक्षा ॥

वन्दे कल्याणयोरेकमिन्दुचूडमुकुन्दयोः ।
अङ्गं कलिन्दहिमवत्सुतयोरिव सङ्गमम् ॥

आचार्यकृतिप्रकृतेराविर्भावाय नीतितत्त्वानाम् ।
अयमिह यत्नः क्रियते सन्तः पुष्यन्तु सन्तोषम् ॥

विदुषामयं प्रबन्धो दुर्जनदृष्योऽपि जायते प्रीत्यै ।
किं शर्करा न मधुरा पित्तोपहतस्य तिक्तेति ॥

आदौ स्वाध्यायविध्यर्थनिर्णयाय यतामहे ।
शास्त्रारम्भस्य वैधत्वप्रतिपादनसिद्धये ॥

यदि हि "स्वाध्यायोऽध्येतव्य"इति विधिः अध्ययनस्य स्वाध्याय-संस्कारद्वारेणार्थज्ञानसाधनत्वं बोधयतीति न प्रतिपद्येत, तर्ह्यर्थज्ञाना-नुष्ठानस्य वैधत्ववैधुर्यात्तदङ्गभूतं मीमांसाश्रवणमपि न वैधं स्यात्, अवैधश्च न वैधं स्नानमुत्कष्टुमर्हति, इति नाध्ययनानन्तरं तद्धेतुका धर्मजिज्ञासा कर्तव्या भवेत्। अतो मीमांसाश्रवणस्य वैधत्वप्रतिपादनाय स्वाध्यायाध्ययनविधिः अधीतेन स्वाध्यायेनार्थज्ञानं सम्पाद्यमिति बोध-यति न वेति चिन्त्यते।

---

१. वत्कन्ययो. घ. २. पाद्ये. क. ३. धत्वाभावात्त. ख. ग. घ.

तत्र "स्वाध्यायोऽध्येतव्य" इति तव्यप्रत्ययावगता विध्यवरुद्धा भावना समानपदोपात्तमध्ययनमपुरुषार्थत्वादुल्लङ्घ्य पुरुषार्थरूपं भाव्यमाकाङ्क्षमाणा समनन्तरपदोपात्तं स्वाध्यायमपि तत एव भाव्यतया नाभिलषति। न च स्वाध्यायस्य संस्कार्यतया भाव्यत्वं, भूतभाव्युपयोगरहितस्य तस्य सक्तुवदसंस्कार्यत्वात्। न च अर्थज्ञानस्य भाव्यत्वम्, अन्तरेणापि विधिं सामर्थ्यादेवाधीतेन स्वाध्यायेनार्थज्ञानं जायत इत्यवगतेर्विध्यानर्थक्यप्रसङ्गात्। न च नियमार्थो विधिः, अकृत्वर्थत्वात्। अवघातादयो हि कृतावेव नियम्यन्ते, न तण्डुलादिस्वरूपे; प्रमाणान्तरविरुद्धत्वात्। तस्मात् पुस्तकवाचनापरिगृहीतादपि स्वाध्यायादर्थज्ञान निष्पत्तिदर्शनाद् अधीतेनैव[२] स्वाध्यायेनार्थज्ञानं जायत इति नियमो न सम्भवति इति न तदर्थो विधिः[३]। अतोऽध्ययनस्वाध्यायार्थज्ञानानामभाव्यत्वादन्यस्य च कस्यापि शब्देन सामर्थ्येन वोपादीयमानस्याभावादाद्याध्ययनमधिकृत्यार्थवादानामसम्भवादर्थवादिकफलमप्यत्र न रात्रिसत्रवत् सम्भवतीति[४], विश्वजिन्न्यायेन सकलाध्येतृपुरुषाभिलषितः स्वर्ग एव भाव्यतया कल्प्यते।

न च धारणाध्ययनगोचरस्यार्थवादस्यातिदेशतः प्रथमाध्ययनेऽपि प्राप्तेरार्थवादिकफलान्वय इति वाच्यम्, अनतिदेश्यत्वाच्छास्त्रस्य। न च शब्दभावनेतिकर्तव्यतात्वेनातिदेश्यः, तदितिकर्तव्यतात्वेनापि प्राशस्त्यमात्रस्यैवातिदेशात्। अतोऽतिदेशतोऽपि फलस्याप्राप्तेः स्वर्गस्यैव भाव्यत्वम्, इत्यर्थज्ञानस्याध्ययनसंस्कृतेन स्वाध्यायेन सम्पाद्यत्वं न विधिरवबोधयति

---

१. स्य सक्तु. ख. २. मोऽपि न. क. ३. विधिः। अतोऽध्ययनस्वाध्यायार्थज्ञाननिष्पत्तिदर्शनादधीतेनैव स्वाध्यायेनार्थज्ञानं जायत इति नियमोऽपि न सम्भवतीति तदर्थो विधिः। अतोऽध्ययन. ४. ति विश्वजिन्न्यायेन, ५. . देशत्वात्. घ.

इति तदनुष्ठानस्य वैधत्ववैधुर्याद् तदनुरोधेन वैधस्य स्नानस्योत्कर्षासम्भवान्नाध्ययनानन्तरं तद्धेतुका धर्मजिज्ञासा कर्तव्येति पूर्वः पक्षः ।

सिद्धान्तस्तु—

अर्थबोधादिरूपस्य दृष्टस्य सति सम्भवे ।
फलस्य न फलं स्वर्गः कल्पनामधिरोहति ॥

दृष्टार्थत्वे[1] सम्भवत्यदृष्टार्थत्वस्यान्याय्यत्वाद्, अर्थबोधादेश्च दृष्टस्यैव फलस्य सम्भवान्न विश्वजिन्न्यायेन स्वर्गस्यावकाशः । न चाधीतात् स्वाध्यायादर्थबोधादिसिद्धेः सामर्थ्यलभ्यत्वाद्विध्यानर्थक्यमिति वाच्यं, नियमार्थत्वाद्विधेः । नचाक्रत्वर्थत्वान्न नियम इति वाच्यम्, अक्रत्वर्थेषु[3] द्रव्यार्जनादिषु पुरुषार्थेष्वपि नियमदर्शनात् । यत्त्वर्थबोधादेर्दृष्टत्वात् तत्र नियमविधौ प्रमाणान्तरविरोध इत्युक्तं, तदयुक्तं; सर्वनियमविधीनां दृष्टैकगोचरत्वात् । न हि प्रमाणान्तरागोचरे क्रतौ नियमः सम्भवति, तत्र नखनिर्लुञ्चनादेरुपायान्तरस्याप्राप्तेः पक्षेप्राप्त्यसम्भवादेवावघाता-दिनियमानुपपत्तेः । ननु दृष्टे तण्डुलादिस्वरूपेऽपि नियमो न सम्भवति प्रमाणान्तराविरोधादित्युक्तम् । सत्यम्; अत एव अवघातादेस्तण्डुला-दिस्वरूपे साधनत्वमेव विधिविषयः, नियमस्त्ववाक्यार्थ एव फलपात्रम्, इति नियमविदां रहस्यम् । भज्येत तह्यज्ञातज्ञापनमिति चेन्नैवं, यावद्धि तण्डुलादिसाधनत्वमेवावघातादेरन्वयव्यतिरेकमूलां व्याप्ति-मवगम्य पक्षधर्मत्वादिकञ्चानुसन्धायानुमातव्यं तावदतिशीघ्रया "व्रीही-नवहन्ति" इत्यादिकया श्रुत्यैवावघातादेस्तण्डुलादिसाधनत्वस्य प्रथम-मवगतेः । श्रुतेर्लिङ्गतः शीघ्रप्रवृत्तेः । ननु त्रिकालाप्राप्तविषयो विधिः

---

१. त्वे भव. ग. २. त्वादनियम. ख. ग. ३. र्थेष्वपि द्र. क. घ. ४. क्षव्या. ग. ५. व्रतया. घ.

पश्चादपि सामर्थ्यलभ्यमर्थं विदधाति। मैवम्, नियमविधीनामनन्यलभ्यविषयत्वाभावात्। भावे वा पूर्वोक्तनयेन नियमविधित्वभङ्गप्रसङ्गात्। अतस्तण्डुलाद्यर्थिनां नखनिर्भुञ्जनाद्युपायान्तरसम्भवेऽपि अवघातादेव नियमेन प्रवृत्तिरिति योऽयन्नियमः स विधेः फलं, तस्य च स्वयमफलस्य फलान्तराननुगुणत्वेऽपि विधिफलत्वानुपपत्तेः फलान्तरं कल्प्यं, तच्चावघातादिषु प्रकृतत्वात् क्रतुरेव। याजनादिषु तु फलान्तरस्याप्रकृतत्वादुपायान्तरप्रवृत्तौ प्रत्यवाय एव। अतोऽध्ययनमन्तरेणोपायान्तरप्रवृत्तौ प्रत्यवायकल्पनात् तत्परिहारायाध्ययन एव प्रवृत्तिरिति योऽयं नियमः तत्सिद्ध्यर्थमन्यलभ्यमेवार्थज्ञानसाधनत्वमध्ययनस्य विधिरवबोधयतीति न काचिदनुपपत्तिः।

नचैवमध्ययनस्य स्वाध्याये तस्य चार्थबोधेऽपि विनियोजकाभावादसंस्कार्यत्वम्, अस्यैव विधेर्विनियोजकत्वात्। तर्ह्यध्ययनस्यार्थज्ञानेन विनियोग इति चेत्, मैवं; यथैव "चरुमुपदधाती"त्यत्र चरोः स्थलशेषत्वे चरुशेषत्वे चोपधानस्य प्रमाणान्तरासम्भवेऽपि चरूपधाने स्थलशेषतया विनियुक्ते चरुमन्तरेणोपधानस्य तत्साधनत्वानुपपत्तेर्दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वस्यान्याय्यत्वात् चरोः स्थलशेषत्वमुपधानस्य तु तत्संस्कारतया तद्द्वारेण स्थलशेषत्वमिति स्थलनिष्पत्तिपर्यन्तो विनियोगः, यथा वा "साम्ना स्तुवीते"त्यत्र स्तुतावक्षराणां विनियोगान्तराभावेऽप्यक्षराण्यन्तरेण स्तुतिसाधनत्वानुपपत्तेर्दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वस्यान्याय्यत्वाच्च साम्नोऽक्षराभिव्यक्तिद्वारेण तत्संस्कारतया

---

१. भ्यत्र विदधाति. ख. ग. भ्यमर्थं नावदधाति. घ. २. पायसम्भवेऽपि. घ. ३. तादावेव क. ४. यो नियमः ख. ग. ५. त्वे विधिपरत्वा. ख. ६. ल्पना। तत्परि. ग. घ. ७. ति नियमः ८. मनन्य ख. ग. ९. चार्थावबोधेऽपि. ख. ग. १०. स्थलनिष्पत्तिशेष. क. ग. ११. नियोजकान्त. १२. रेणैतत्सं. घ.

स्तुतिसाधनत्वमिति तत्पर्यन्तो विनियोगः, एवं स्वाध्यायस्यार्थज्ञानादौ । तत्र चाध्ययनस्य विनियोजकान्तराभावेऽपि स्वाध्यायाध्ययनस्यार्थज्ञानादौ विनियोगादन्तरेण च स्वाध्यायमध्ययनमात्रात् तदनिष्पत्तेर्दृष्टार्थत्वे च सम्भवत्यदृष्टार्थत्वस्यान्याय्यत्वात् स्वाध्यायोऽर्थज्ञानादौ साधनम्, अध्ययनन्तु तद्द्वारेण तत्संस्कारतया तत्साधनम्, इति संस्कारविधित्वेऽप्यर्थज्ञानपर्यन्तो विनियोग इति ।

नचैवं संस्कारविधेः संस्कार्यविनियोगपर्यन्तत्वे होमविधेरपि संस्कार्यसक्तुविनियोगपर्यन्तत्वेन संस्कारविधित्वं भवेदिति वाच्यं, तत्र दृष्टसामर्थ्यानुसारस्य सहकारिणोऽसम्भवादेव संस्कार्यविनियोगपर्यन्तत्वेनापि संस्कारविधित्वानुपपत्तेः ।

स्यादेतत्। स्वयमफलस्यार्थज्ञानस्य फलवत्कर्त्वनुष्ठानोपायत्वात् फलत्वम्, इत्यनुष्ठानानुपयोगिक्षत्रियाद्यधिकाराश्वमेधादिप्रतिपादकानां वेदभागानामनर्थकानां च हुँमादीनां नार्थज्ञानार्थमध्ययनमिति तत्र तस्यादृष्टार्थत्वे कल्प्ये सर्वत्रादृष्टार्थत्वमेव युक्तम्[5] । मैवम्; तत्रापि जपधारणपारायणादेर्दृष्टस्यैव विध्यन्तरापेक्षितत्वेन फलत्वाङ्गीकरणात्। न च फलभूयस्त्वाद्विनियोगभूयस्त्वं, यदेव किञ्चिद्विध्यन्तरापेक्षितं स्वाध्यायेन शक्यसम्पादं तत्सर्वमधीतेन स्वाध्यायेन कुर्यादिति भूयस्त्वेऽप्येकोपाधिपरिगृहीतानामेकत्वादेषां च फलानां बहुत्वेऽपि दृष्टत्वेन कल्प्यत्वाभावाद् "एकं वा चोदनैकत्वाद्" इति न्यायस्यानवकाश एव।

---

१. गान्त. ग. २. स्कारपर्यन्तत्वे. विनि. ग. स्कारवि. घ. ३. ष्ठानोप. घ. ४. हुमादीनाञ्च नार्थं ख. ग. हूमादीनां घ. ५. क्तम्। न युक्तम्; तत्रापि. ख. ग. ६. स्वेऽप्येको घ.

ननु फलवदर्थज्ञानसाधनत्वेन फलभूतस्य स्वाध्यायस्यैव [1]समनन्तरपदोपात्तत्वात् किमिति न भाव्यत्वम्? उच्यते—स्वयमफलस्य फलान्तरसाधनतया [2]फलत्वम्, अव्यवहितव्यवहितयोरव्यवहितस्यैव मुख्यत्वमिति स्वाध्यायादव्यवहितस्यार्थज्ञानस्यैव [3]भाव्यत्वम् इति। अतोऽध्ययनविधेर्याजनादिविधिवत् पुरुषार्थनियमविधित्वात् सिद्धमध्ययनस्यार्थज्ञानार्थत्वम्। तथा च तस्येतिकर्तव्यताभूतं विचारमन्तरेणाध्ययनमात्रादनिष्पत्तेस्तदनुष्ठानमपि [4]विधिरवबोधयतीति तदनुरोधेन स्मार्तस्य स्नानस्योत्कर्षादध्ययनानन्तरं [5]तद्धेतुका धर्मजिज्ञासा कर्तव्येति।

एकदेशिनस्त्वाचार्यकरणविधिप्रयुक्तिलब्धानुष्ठानस्याध्ययनविधेरधिकारपरत्वचिन्तायां प्रथमावगतत्वेनाचार्यकाधिकारपरत्वमाशङ्क्यान्तरङ्गत्वादर्थज्ञानाधिकारपरत्वमेवेति वर्णयन्तः शास्त्रारम्भं समर्थयन्ते। तच्चायुक्तम्, अध्यापनविधेरेवाभावात्। कः खल्वध्यापनविधिः।

"उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते॥"

ईति स्मृत्यनुमित उपनीयाध्यापनेनाचार्यकं [6]भावयेदित्येवंरूप इति चेत्, मैवम्; एवंविधायाः श्रुतेरनेवंविधया स्मृत्यानुमातुमशक्यत्वात्। [7]इयं ह्युपनीयाध्यापयितारमाचार्यं [8]वदन्तीति प्रतिपादयति।

---

१. समानवाक्योपात्तत्वात्. ख. २. भाव्यत्वम्. ३. तयोरप्यव्यव. ख. ४. तस्यैवार्थज्ञानस्यैव. ५. त्वमतो. ख. ६. विधिरेव बोधयति। इति तदनुरोधेन स्मार्तस्नानस्यो. ग. ७. रं धर्म. ख. घ. ८. इति स्मरणानुमित आचार्यकञ्काम उपनीयाध्यापयेदित्येवंरूप. ग. ९. नेन चचार्यकं. ख. १०. इयमुपनीया. ग. ११. यतीति. ख.

न पुनरध्यापनं विधत्ते। विधिपरत्वे तु यो द्विजस्तमाचार्यं प्रचक्षत इत्यंशेनैकवाक्यत्वविरोधात् । न चोपनीयाध्यापयेदिति विधिमुक्त्वा विधिप्रसिद्धमर्थं यस्त्विति निर्दिश्याचार्यलक्षणमिति वाच्यं, स्वरसतो विधित्वाप्रतिपत्तौ वाक्यभेदेनापि विधित्वाश्रयणे मूलाभावात्[1]। यत्पुन-"र्विहितानेकनियमसहितोपनयनयुक्ताध्यापने कृत आचार्य इत्युक्तं, तद्यदि क्रियागर्भोऽध्येत्रध्यापकसम्बन्धोऽप्यनुवर्तते, तथापि न तावन्मात्रे शब्दः, दृष्टस्यानियमे नियमे[2] चाभेदाददृष्टादेव भेद इत्यलौकिक शब्दः, तदलौकिकं विध्यर्हं फलम्, [3]इयमेव यूपाहवनीयादिविधे" त्युक्तम्; तदयुक्तम्। नहीदं वचनमनेकनियमोपेतोपनयनयुक्ताध्यापन साध्यमाचार्यकमित्याह। किन्तु[4] उपनेयशेषभूतसनियमकोपनयनयुक्ताध्यापनक्रियाकर्तृस्वरूपमाचार्यशब्दवाच्यमिति। तथाच पाचकादिपदवदाचार्यपदमपि लौकिकार्थमेव। यूपाहवनीयादिकं तु द्वितीयाश्रुत्यादिभिरनेकनियमकतक्षणाधानादिसाध्यत्वेनावगतमिति तत्साध्यस्य दृष्टस्यादर्शनाद्युक्तं तद्वाचिनो यूपाहवनीयादिपदस्यालौकिकार्थत्वम्।

यदप्याहुः—अध्यापनक्रियानिवृत्तावप्या[5]"चार्याय वरो देय"इति श्रुतेस्तदानीमाचार्यपदस्य भूतार्थोपलक्षकत्वमुन्मुच्य मुख्यार्थत्वायालौकिकार्थत्वमाश्रयणीयमिति, तदाचार्यकोत्पत्तेः पूर्वमध्यापनक्रियावेलायामेव "अचार्यस्य बाहुमात्रे स्थित्वाधीयीत" इति श्रुतेस्तदानीमाचार्यपदस्य भाव्यर्थोपलक्षकत्वमुन्मुच्य मुख्यार्थत्वायोपनयनोपक्रमाध्यापनान्तसनियमैकक्रियासन्तानयोगित्वमेवार्थत्वेन स्वीकरणीयमिति वैपरीत्यापादनेन

---

१. लासम्भवात्. ख. ग. २. मे वा. ग. ३. इत्ययमेव च. ग. इयमेव च. घ. ४. न्तूपनयनशे. ग. ५. षसनियमको. घ. ६. निर्वृत्तावाचार्याय. ख. निवृत्तौ वाचार्याय. ग. निवृत्तावप्याचार्यवरो देय. घ. ७. मक्रिया. क. ख.

परिहरणीयम्। जघन्या च भूतलक्षणातो भाविलक्षणा, सामग्रीविघटन-सम्भवेन भाविनोऽर्थस्य सन्दिग्धत्वात्। तस्मादाचार्यत्वस्य यूपादिवद-लौकिकत्वादुत्पत्तिविधानं युक्तमिति रिक्तं वचः।

किञ्च योऽध्यापयेदिति यच्छब्दयोगो विधित्वमुपहन्ति। न च यदाग्नेय इत्यादौ यच्छब्दस्यानुपघातकत्वं, तत्रापि यच्छब्दयुक्तस्य विधित्वभङ्गेनार्थवादादिपरिकल्पितस्यान्यस्यैव विधित्वस्वीकारात्। अतो-न तावद्"उपनीय तु यश्शिष्यम्"इत्यादिस्मृत्यनुमितं वचनमध्यापन-विधौ प्रमाणम्।

स्यादेतत्—"अष्टवर्षं ब्राह्मणमुपनयीत" "तमध्यापयेत्" इति श्रवणादुपनयन आचार्यकरणप्रयोजन आत्मनेपदस्मृतेरध्यापनविधिरपे-क्षिताचार्यकरणविधिरेवेति। तदयुक्तं; द्रव्यार्जनाद्यर्थतयैव प्राप्तस्या-ध्यापनस्य विध्यनर्हत्वात्। न चाचार्यकस्यालौकिकत्वात् तत्साधनत्वेना-प्राप्तमध्यापनं विध्यर्हमिति वाच्यम्; अलौकिकस्याचार्यकस्यान्यतोऽसिद्धेः। नचोपनयीतेत्यात्मनेपदात् सनियमकोपनयनशेषित्वप्रतीतेराचार्यकमलौ-किकमिति वाच्यम्; उपनयतेराचार्यकरणे वर्तमानादकर्त्रभिप्रायार्थत्वादा-त्मनेपदविधानस्य। अन्यथा कर्त्रभिप्राये क्रियाफले "स्वरितञित"इत्या-दिनैवात्मनेपदप्राप्तेः 'सम्मानन'सूत्रानर्थक्यप्रसङ्गात्। यत्पुनः क्रियाफलस्य कर्त्रभिप्रायत्वन्नाम न कर्त्रभिलषितत्वं किन्तु कर्तृगतत्वमित्यङ्गीकृत्योपनयन-क्रियाफलस्य माणवकगतत्वेनाकर्त्रभिप्रायत्वात् पूर्वोक्त एवार्थे पदसाधुत्व-न्निरूढमिति, तदयुक्तम्। एवं सत्याधानक्रियाफलस्याग्निगतत्वेनाकर्त्रभि-

---

१. कार्थत्वात्. ग. २. र्थविधि. ख. ग. घ. ३. धानफल. ख. ग. घ.

प्रायत्वात् क्रियाफलस्य "स्वरितञ्जित" इत्यादिनात्मनेपदासम्भवादधीनादधीतेति न स्यात् । न चोपनयनक्रियाफलस्य संस्कारस्य माणवकाभिलषितत्वादेवाकर्त्रभिप्रायत्वम् ; आचार्येनभिलषितत्वेन तस्य क्रियाफलत्वानुपपत्तेः । न च क्रियाजन्यं यस्य कस्यचिदभिलषितं वा क्रियाफलम्, किन्तु कर्तुरभिलषितं सत् क्रियाजन्यं क्रियाफलम् । अन्यथा श्रमादिरूपमपि क्रियाजन्यमहितस्य कस्यचिदभिलषितमेति "स्वर्गकामो यजेत" इत्येवमादावकर्त्रभिप्रायत्वात् क्रियाफलस्यात्मनेपदं न स्यात् । न चास्मत्पक्ष इव माणवकसमीहितसाधनत्वेनैवोपनेतुरुपनयनक्रियाफलमभिलषितम्; येन क्रियाफलस्याकर्त्रभिप्रायत्वं स्यात् । आचार्यकामस्य तत्साधने माणवकाधिकारे समीहानुपपत्तेः । उपपत्तौ वा माणवकाधिकारस्यैवानुसंहितस्य प्रयोजकत्वम्, नाचार्यकाधिकारस्येति स्यात् । अत आत्मनेपदात् क्रियाफलस्याकर्त्रभिप्रायत्वावगतेरकर्तृभूतमाणवकसमीहितसाधनत्वेनैवोपनयनस्य प्रतीतिः ।

न च शिष्यमुपनीयाध्यापयेदिति क्त्वाप्रत्ययादाचार्यकशेषत्वमुपनयनस्य स्वध्यवसानम् ; स्मृतिगतो हि क्त्वाप्रत्ययः, स च स्वतस्समानकर्तृकत्वमेवाह । तच्च प्रयोगैक्यम् । तत्पुनरङ्गाङ्गित्वमिति प्रत्यक्षवेदगतत्वेन साक्षादङ्गाङ्गिभावविषयत्वेन च क्त्वाप्रत्ययतो बलीयस्या "वसन्ते ब्राह्मणमुपनयीत" इति द्वितीययोपनयनस्योपनेयशेषत्वप्रतीतेः । नचोपनेयसंस्कारस्याचार्यकशेषत्वात् तद्द्वारेणोपनयनस्यापि तदङ्गत्वं क्त्वाप्रत्ययोऽवगमयतीति वाच्यम् ; उपनेयसंस्कारस्याचार्यकार्थत्वे माण-

---

१. त्वम् . घ. २. र्योभिलषितत्वे तस्य कि. ग.घ. ३. दौचाकर्त्र. ग.घ. ४. गतेऽकर्तृ ग.घ. ५. कर्तृत्व क. ६. यस्त्वाद्व ख. ग. यःस्याद् . घ. ७. पनयनशे. ग. ८ पनयन• ख. घ. ९. कार्थत्वात् घ. १०. यो गम. ग.

वकार्थत्वे च सोपयोगत्वसाम्येऽपि पुरुषान्तरगामित्वेन बहिरङ्गादाचार्यकादेकपुरुषगामित्वेनाध्ययनमन्तरङ्गमिति तदर्थत्वसिद्धेः। यदि चैवं स्मार्तक्त्वाप्रत्ययानुरोधेनान्तरङ्गत्वं बाध्येत[1], ततो भवत्पक्षेऽध्यापनविधिप्रयुक्तस्याध्ययनविधेः किमधिकारपरत्वमिति चिन्तायाम्[2] "अधीत्य स्नायाद्" इति स्मार्तक्त्वाप्रत्ययानुरोधेनान्तरङ्गत्वयुक्तेर्बाधादाचार्यकाधिकारपरत्वं स्यात्[3]। अतोऽकर्त्रभिप्रायविहितात्मनेपदबलादन्तरङ्गत्वयुक्तेश्चोपनयनमध्ययनाङ्गमिति कथमुपनयनाङ्गत्वादाचार्यकमलौकिकम्? अत "एतयाऽऽग्नेयकामं याजयेद्" इत्यादाविव प्रयोजकव्यापारगतो विधिशब्दः प्रयोज्यव्यापारविधिपर एव।

यत्पुनर्वैषम्यमत्रोक्तम्, "एतयाऽऽग्नेयकामं याजयेद्" इति तु कामिनं एव विध्यपेक्षया याजनमनुवादो युक्त इति। तदयुक्तम्; "निषादस्थपतिं याजयेद्" इत्यत्र कामिश्रवणाभावेऽपि प्रयोज्यव्यापारविधिपरत्वाङ्गीकरणात्। अत एवमादावन्यतः प्राप्तिरेवाऽविधेयत्वे हेतुः। स च प्रकृतेऽपि समान एव। एतेन

"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।
वेदमध्यापयेदेनं शौचाचारौंश्च शिक्षयेत्॥"

इत्यादि वचनं व्याख्यातम्। स्मृत्यन्तरञ्च—

"उपनीय ददद्वेदमाचार्यस्स उदाहृतः।"

इति क्रियायोगमेवाचार्यशब्दार्थत्वेन व्यक्तमुपदर्शयति। अतो नाचार्यविधिर्नाम कश्चित्।

---

१. बाध्यते. क. २. यां वेदमधीत्य. ग. घ. ३. स्यात्। अकर्त्र. ख. घ. ४. दापि. ग. ५. रञ्च. ग. घ. ६. इति वचनं. ग. ७. योगित्वमे. घ. ८. पनयति. ग.

किञ्च सत्यप्यध्यापनविधौ कुतस्तत्प्रयुक्तमध्ययनं न स्वविधिप्रयुक्तम् ? अध्ययनविधौ नियोज्याभावादिति चेत्, कल्प्यतां तर्हि विश्वजिदादिवन्नियोज्यः। नचानुष्ठानार्थत्वान्नियोज्यस्यान्यतस्तत्सिद्धौ न नियोज्याश्रयणमिति वाच्यम्; अनुष्ठानार्थत्वादधिकारस्य । अन्यतस्तत्सिद्धौ नाधिकाराश्रयणमित्यर्थबोधाधिकारासम्भवेन तन्मूलस्य मीमांसाश्रवणस्याप्यसम्भवप्रसङ्गात् । अथान्यतोऽनुष्ठानलाभेऽपि विधित्वार्थमेवाधिकारापेक्षा । विधिर्हि प्रवृत्तिहेतुः कार्यरूपः[3]। प्रवृत्तिहेतुत्वञ्च स्वसाधनैश्वर्यापादनक्षमत्वम्, ईश्वरस्य स्वत एवं प्रवृत्तेः । अतोऽनुष्ठानलाभेऽपि प्रवर्तकत्वमन्तरेण विधित्वमनिरूढमिति विधित्वसम्पत्तयेऽधिकारपर्युपासनमिति चेत्, तर्ह्यन्यतोऽनुष्ठानलाभेऽपि कार्यार्थमेव नियोज्यापेक्षा । कार्यं हि कृत्युद्देश्यम् । उद्देश्यञ्च कस्यचिदेव किञ्चित्, नैं सर्वं सर्वस्य । अतोऽन्यतोऽनुष्ठाने सिद्धेऽपि कृत्युद्देश्यत्वमन्तरेण विधित्वमनिरूढमिति तदर्थंनियोज्यपर्यवसानम् । न च नियोज्याभावेऽप्याचार्यकृतिं प्रत्युद्देश्यत्वादध्ययननियोगस्य कृत्युद्देश्यत्वमप्यस्तीति शङ्कनीयम्; आचार्यकामस्यातत्साधनेऽध्ययननियोगे कृत्युद्देश्यत्वासम्भवात्। अतः प्रयाजादिनियोगवदसत्यपि साक्षान्नियोज्ये संमीहितसाधनत्वेन कृत्युद्देश्यत्वासम्भवादर्थज्ञानस्य च विषयफलत्वेनातत्कामस्य नियोज्यत्वानुपपत्तेः, इत्युद्देश्यत्वार्थमध्ययनविधौ नियोज्यः कल्प्य एवेति सनियोज्यत्वादध्ययनस्य स्वविधिप्रयुक्तिरेव युक्ता ।

किञ्चाध्ययनविधौ यदि नियोज्यो न भवेत्, कथन्तर्हि प्रबुद्धस्य स्वाधिकारप्रयुक्तिर्मध्येऽधिकारश्च स्याताम् ? नहि नियोगसाधने कर्मण्य-

---

१. त्यध्या. ख. ग. २. ज्यत्वाभा ग. ३. पप्रवृत्तिहेतुत्वञ्च स्वसाधनैश्वर्यापादन ईश्वरस्य. ख. ४. वाप्रवृत्तेः, ग. ५. अतोऽन्यता. घ. ६. तर्ह्यतोऽनुष्ठा. घ. ७. न सर्वस्य. ग. ८. यनं नियोज्यस्य. ख. ९. सन्निहित. घ. १०. न तत्का. ख. ग. घ.

नियोज्यस्य नियोगप्रतिपत्त्यभावादैश्वर्यं सम्भवति, अनीश्वरश्च कथमध्ययनं विचारं वाऽनुतिष्ठेत्? न च प्रबुद्धस्य स्वविधिप्रयुक्तिर्मध्येऽधिकारश्च न स्त एवेति वाच्यम्; विधिपर्यवसानार्थमध्ययनात् परतो मीमांसातश्च[1] पूर्वमवगतस्य स्वीकारान्मध्येऽधिकारो न वृथा[2], तथा यदा नाचार्यी[3]-बुभूषुः तदा माणवकः स्वसंस्कारं द्विजातिकर्मानुगुणं[4] प्रबुद्धः प्रयुङ्क्ते तद्धितार्थौ वेत्युक्तत्वात्। अतस्तत्राध्ययने नियोज्यो वाङ्गीकरणीयः, नियोगसाधने कर्मण्यनियोज्यस्याप्यधिकारो वाङ्गीकरणीय इति सिद्धम्[5]। तथा च तद्देवाध्ययने नियोज्यो भवेत्[6], अनियोज्यस्याप्यधिकारो वा भवेत्, इति स्वाधिकारत एव प्रयुक्तिलाभात् किमध्यापनप्रयुक्ति[7]-व्यसनेन।

किञ्च "अष्टवर्षं ब्राह्मणमुपनयीत" इत्यात्मनेपदद्वितीयाभ्यामुपनयनस्योपनेयसंस्कारत्वावगतेः संस्कर्तुस्य कर्तव्यापेक्षायामुपनयनं प्रक्रम्य तमध्यापयेदिति प्रयोजकव्यापारिगतस्यापि विधिशब्दस्य याजयेदिति-वदप्राप्तापेक्षितमयोज्यव्यापारविधिपरत्वावगमात् सोऽधीयीतेति वाक्यार्थ निष्पत्तेरष्टवर्षो ब्राह्मणो नियोज्यः श्रुत एवेत्यश्रुतनियोज्यमध्यापन-मध्ययनविधिरेव प्रयुङ्क्ते। न च बालेनावगन्तुमशक्यत्वादध्ययनाधि कारस्य[11], न तस्य प्रयोजकत्वम्, अपि तु विद्वदाचार्यावगतस्य[12] कल्प्य-स्याप्यध्यापनाधिकारस्यैवेति[13] वाच्यम्; हितकारिभिः पित्रादिभिरप्यनु-

---

१ सातः प्रागवगतस्य. घ. २. वृथा। यदा. घ. ३. चार्यावभूषुः. घ. ४. गुण; घ. ५. कर्मणि नियोज्यो वाङ्गीकरणीय इति सिद्धं. घ. ६. नियोज्यस्याप्यधिकारो वा भवेदिति स्वाधिकारत एव प्र०. ख. नियोज्यस्याधिकारो भवेदिति स्वाधिकारत एव ग. नियोज्यो वा भवेत् अनियोज्यस्याप्यधिकारो वा भवेत् इति स्वाधि०. घ. ७. किमध्ययन. ग. किमध्यापनविधिप्रयुक्ति०. घ. ८. तकर्त०. ख. ९. रस्यापि. ग. १०. तस्य प्र. घ. ११. स्य न प्र. ग. स्य न तत्प्र०. घ. १२. चार्यगतस्य घ. १३. वेतीति वाच्यम्. ग. घ.

संहितस्य माणवकाधिकारस्य प्रयोजकत्वलाभात्[1]। न चानुष्ठात्रैव प्रयोजको ज्ञातव्य इति वाच्यम्, अध्ययनाधिकारस्येवाध्यापनाधिकारस्यापि माणवकेनानवगतस्याप्रयोजकत्वप्रसङ्गात्[2]।

एतेन सोऽयन्तान्मूलिकश्शास्त्रार्थ[3] इत्यपास्तम्; उक्तेन न्यायेनतन्मूलत्वमन्तरेणापि शास्त्रार्थसिद्धेः। अपि च एकस्यां क्रियायां परस्परानुगुणस्य फलद्वयस्यानन्वयान्नियोगार्थस्याध्ययनस्याचार्यकमर्थबोधो वा[5] न फलमिति, द्वयोरन्यतराधिकारपरत्वमभ्युपगम्य किमधिकारपरो विधिरिति सन्देह एवानुपपन्नः।

नियोग एव फलम्, अर्थज्ञानन्त्वर्थप्राप्तमधिकारपर्यवसानाय विधिरनुमन्यत इति चेत्, तदसत्; अध्ययनार्थज्ञानयोः साध्यसाधनभावस्य शास्त्रार्थत्वे पूर्ववदेकस्यां क्रियायां परस्परानुगुणस्य फलद्वयस्यानन्वयः अध्ययनस्य नियोगार्थत्वे प्रधानकर्मत्वमर्थज्ञानार्थत्वे च संस्कारकर्मत्वमिति वैरूप्यञ्च स्यात्। अशास्त्रार्थत्वे तु न शास्त्रार्थस्य स्नानस्यैतदनुरोधादुत्कर्ष इत्युभयतस्पाशारज्जुप्राप्तेः।

कथञ्चाध्ययनमात्रादपि सिध्यन्नध्यापनविधिर्विहितमेवाध्ययनं[6] प्रयुञ्जीत? तस्यैव प्रकृतत्वादिति चेत्, तर्ह्यध्यापनविधिवाक्यप्रवृत्तिरध्ययनविधिवाक्यप्रवृत्तिपूर्विकैवेति[7] मूलमूलिभावस्य वैपरीत्यप्रसङ्गः। तस्मादाचार्योक्तावेव पूर्वोत्तरपक्षौ युक्तियुक्ताविति सर्वमवदातम्॥

इत्यध्ययनविधिवादः प्रथमः समाप्तः।

---

१. त्वाभावात्. ग. प्रयोजनलाभात्. घ. २. नावगतस्य. घ. ३. न्तान्मूलिकशास्त्रार्थसिद्धेः. घ. ४. र्थावबो. ग. ५. वा फलमिति. घ. ६. वाध्यापनं. घ. ७. त्तिपूर्विकैवाध्ययनविधिवाक्यप्रवृत्तीति मूल. ग.

[कार्यवादः ।]

कृत्या साध्यं तत्प्रधानञ्च कार्यं
मानैरन्यैरप्यदृष्टं लिङर्थः ।
उत्तीर्णाङ्गं तच्च भावार्थसार्था-
दित्याहुर्ये वक्ष्यते तन्निरासः ॥

अत्र हि प्राभाकराः कार्यस्यैव प्रवर्तकत्वमाचक्षाणाः प्रवर्तकवाक्येष्वेव व्युत्पत्तिरिति निबध्नन्तः तदनुरोधेन कार्यान्वितस्वार्थाभिधानमितरेषामर्थान्तरान्वितकार्याभिधानञ्च लिङादीनामिति वर्णयन्तः स्वर्गकामपदसमभिव्याहारात् क्रियोत्तीर्णमपूर्वमेव मुख्यो लिङाद्यर्थः, क्रियारूपन्तु लक्षणयेति व्यवस्थां प्रतिपेदिरे ।

तत्र तावत् प्रवर्तकत्वेनाभिमतं किमिदं कार्यनाम ? कृतिसाध्यं कृतिं प्रति प्रधानमिति चेत्, किं पुनः प्राधान्यम् ? यदि तदुद्देशेन कृतेः प्रवृत्तिस्तर्हि, मधुबोधाद्विषपाने प्रवृत्तस्य विषपानमपि कार्यं स्यात्; तदुद्देशेन कृतेः प्रवृत्तेः । न च तदस्य कार्यम्; नेदं कार्यमकार्यमेव तूद्दिश्य मोहादहं प्रवृत्त इत्युत्तरकालमनुसन्धानात् । कथञ्च प्रवृत्तिकारणनिरूपणावसरे प्रवृत्तिरुत्पन्ना कारणम् ? आत्माश्रयप्रसङ्गात् । अथ तदुद्देशेन कृतेः प्रवृत्त्यर्हत्वं प्राधान्यम्; तर्हि तदिष्टोपायताबोधैकार्थसमवायिकृतिविशेषजन्यत्वान्नान्यदिति कथं कृतिविशेषजन्यत्वादन्यत् प्राधान्यं स्यात् ? किञ्च तत्र प्रमाणं न तावदनुमानादीनि; तत्प्रतिबद्ध-

---

१. रस्य दृष्टं. ग. २. व हि प्रव. घ. ३. कार्यम्; अकार्यमेव तूद्दिश्य. घ. ४. तत्प्रमाणं. घ. ५. बन्धलिङ्गा. ग.

लिङ्गाद्यसम्भवात्, अनभ्युपगमाच्च। नापि प्रत्यक्षम्; कृत्यर्हत्वस्य कृतियोग्यपर्यायत्वात्, तस्य च प्रत्यक्षानर्हत्वात्। किञ्च प्रत्यक्षमपि न चक्षुरादिकं[1] कृतिप्राधान्यं गोचरयतीति मानसमभ्युपगमनीयम्। मनश्च न बाह्यस्य कृतिप्राधान्यं गोचरयति[2]; तस्य बहिरस्वातन्त्र्यात्। नापि सुखादेः; आन्तरस्य संयुक्तसमवेतसमवायस्यानभ्युपगमात्, अन्यस्य च सन्निकर्षस्याभावात्।

एतेन कृतिगतमेवोद्देश्यप्रतियोगिकं शेषत्वं[3] प्राधान्यमित्यपास्तम्; उक्तेन क्रमेण तत्रापि प्राधान्यस्य दुरवगमत्वात्।

ननु यदाकारं वस्तु प्रतिपद्य पुंसां प्रवृत्तिः तदौत्सुक्यं वा जायते तदाकारयोगित्वमेव तस्य प्राधान्यम्; तच्च तदाकारावेदकप्रमाणेनैव शक्यावगममिति न तत्र प्रमाणाभावोऽपि। मैवम्। एवं हि फलं तत्साधनं वाधिगम्य[5] तत्र प्रवृत्तिः तदौत्सुक्यं वा जायत इति न तदतिरिक्तकार्यसिद्धिः। अथ फलतत्साधनयोः परस्परव्यभिचारादुभयानुगतं प्रयोजनत्वमेव कार्यत्वं[6], तर्हि तन्नान्यदभिलषणीयत्वादिति कथं तदतिरिक्तकार्यसिद्धिः? अस्तु तदेव कार्यमिति चेत्, न; तन्मात्रस्य प्रवर्तकत्वानुपपत्तेः, अप्रवर्तकस्य च कार्यत्वानभ्युपगमात्। तन्मात्रस्य कुतो न प्रवर्तकत्वमिति चेत्[10], सुखदुःखाभावयोः स्वात्मन्यप्रवर्तकत्वादिति ब्रूमः। न च तयोः[11] स्वात्मन्यप्रवर्तकत्वेऽपि स्वोपाये प्रवर्तकत्वमिति वाच्यम्; अनव-

---

१. पर्यवसायित्वात्. ग. २. रादि कृति. ग. ३. रयतीति. ग. ४. शेषित्वं. ग. ५. मात्. ख. ग. ६. वावगम्य. ग. ७. गतत्वं प्रयो०. क. ८. हिं न तन्मा०. क. ९. कत्वस्य. ख. १०. योरात्मन्य०. ख. ११. योरेव स्वात्मनि प्रवर्तकत्वाभावेऽपि. ख. योः स्वात्मन्याहत्य प्र०. ग. योः स्वात्मनि अप्रवर्तकत्वेऽपि. घ.

गततदुपायभावस्यापि तदुपाये प्रवृत्तिप्रसङ्गात् । अथ फलोपायताज्ञानमपि कारणम्; तर्हि तदेवास्तु कृतमितरैरिति सुनिरूपितः कार्यवादः। ननु नोपायमात्रं प्रवर्तकम्; अनिष्टोपायेऽपि तत्प्रसङ्गात्। फलावच्छिन्नस्य तु प्रवर्तकत्वे फलस्यापि प्रवर्तकत्वमेव । सत्यम् । वयमपि फलमात्रस्य प्रवर्तकत्वमेव निषेधयामः, न तु प्रवर्तकोपायावच्छेदकत्वेनापि फलस्य प्रवर्तकत्वं, इति न तदतिरिक्तं कृत्युद्देश्यत्वं नाम किञ्चित् ।

स्यादेतत्— अस्ति तावन्ममेदं कार्यमिति धीः, न चेयं कृतिसाध्यतामात्रविषया; दुःखतत्साधनयोरपि कार्यबुद्धिविषयत्वप्रसङ्गात्। नापि फलोपायत्वविषया; कृत्ययोग्येषु फलोपायेष्वपि कार्यबुद्ध्यनुत्पादात् । न च फलत्वं विषयः; फलसाधनेऽपि तद्धीदर्शनात् । नाप्यभिलषितत्वम्; मलयमारुतादेरभिलषितस्यापि कार्यबुद्धिविषयत्वाभावात्। अतः पूर्वोक्तकृतिसाध्यत्वाद्याकारातिरिक्तमेव किमपि कार्यधीवेद्यमङ्गीकरणीयमिति। तदयुक्तं; यन्ममेदं कार्यमिति चिकीर्षैवेयम्, न धीभेदः ।

यत् पुनः कार्यधियमन्तरेण चिकीर्षैव नोदेति; कृतिसाध्यत्वादिबोधस्यानन्तरोक्तक्रमेण तदजनकत्वादिति मतम्, तदयुक्तं; कृतिसाध्येष्टोपायताबोधस्यैव चिकीर्षोत्पत्तिहेतुत्वस्थितेः । अतो न पराभिमतं कार्यं नाम किञ्चित् । अस्तु वा, तथापि कथं तत्रैव शब्दानां व्युत्पत्तिः? ननु गामानयेति प्रयोजकवृद्धवाक्यश्रवणात् प्रयोज्यवृद्धस्य प्रवृत्तिमुपलभ्य तस्याः स्वात्मनि कार्यबोधाधीनतावधारणात् प्रवृत्तिहेतुत्वेन कार्यधियमनुमाय, तत्कारणगवेषणायामन्यस्याप्रतीतेः शब्दस्य च दृष्टत्वात् तस्यैव

---

१. कत्वमपीति. ग. २. क्तकृत्यु. ख. ग. ३. त्वमपि. ग. ४. स्यापि. ख. ५. तेस्तस्यैव. ख. ग.

हेतुत्वं कल्पयन्नावापोद्वापाभ्यां[1] गवादेः कार्यान्वितस्वार्थाभिधायित्वं लिङादेरर्थान्तरान्वितकार्याभिधायित्वञ्च निश्चिन्वन्, वेदे स्वर्गकामपदसमभिव्याहारात् क्रियोत्तीर्णमपूर्वमेव मुख्यो लिङाद्यर्थ इति व्युत्पद्यते, सेयं लोकप्रारम्भा वेदावसाना व्युत्पत्तिरिति । तदसारम्,

व्युत्पत्तिलाभात्[2] सिद्धेऽर्थे क्रियायाः कार्यतान्वयात् ।
कामिनोऽनन्वयाभावादपूर्वानभिधानतः ॥

लभ्यत एव सिद्धेऽप्यर्थे पदानां व्युत्पत्तिः । पुत्रजन्म दृष्ट्वा तन्निवेदनाय धावन्तं भृत्यमनुधावन् पुत्रस्ते जात इति भृत्यवचनानन्तरं पितुर्मुखविकासं पश्यन् तस्य प्रियार्थप्रतीतिहेतुत्वमवधारयन् स्वस्मिन्निव परस्मिन्नपि वदनविकासहेतुत्वेन प्रियार्थप्रतीतेरनुमानात्, तस्याश्च कादाचित्कत्वेन स्वात्मनि हेत्वपेक्षायां स्वात्मनि पुत्रजन्मनो हर्षहेतुत्वावधारणात्, अन्यस्य[3] च हर्षहेतोरनुपलम्भात्, पुत्रजन्मनश्च दृष्टत्वात् तस्यैव[4] हर्षहेतुत्वमवधारयन्, तद्बोधसाधनत्वेनान्यस्यानुपलब्धेः, वचनस्य[5] दृष्टत्वात् तस्यैव तदुपायत्वमवधारयन्नावापोद्वापाभ्यां[6] पुत्राद्यर्थे पुत्रादिपदं व्युत्पद्यत इति । न च हर्षहेतुबोधकत्वेनादृष्टादेरपि शङ्कितत्वाद्वचनस्य तद्बोधकत्वं दुरवगममिति वाच्यम्; गामानयेति प्रवर्तकवाक्येऽपि प्रवृत्तिहेतोः कार्यबोधस्यादृष्टाद्यधीनत्वशङ्कया वचनजन्यत्वनिश्चयाभावप्रसङ्गात् ।

---

१. पोद्धाराभ्यां. ख. ग. २. त् सिद्धत्वे. ग. ३. स्य हर्ष. ग. ४. स्य च. दृष्ट. घ. ५. पोद्धाराभ्यां. ग. ६. त्पत्स्यत इति. ग.

अथ गामानयेति वाक्यप्रयोगे सति गवानयनकार्यबोधस्यासकृद् पलब्धेर्दृष्टस्य चान्यस्य तद्धेतोः सर्वत्रानुगतस्यादर्शनादृष्टहेतुसम्भवे चादृष्ट हेतुकल्पनानुपपत्तेः वचनस्य हेतुत्वं कल्प्यम्[1]। तर्हि तेनैव क्रमेण हर्षहेतु बोधोत्पादकत्वमपि पुत्रस्ते जात इति वचनस्य सुतरां कल्प्यम्[2]।

यत्पुनर्गवानयनविषयायाः प्रवृत्तेस्तत्कार्यबोधनियतत्वाद्युक्तं तय तदनुमानम्, मुखविकासस्य[3] तु पुत्रजन्मलक्षणहर्षहेतुविशेषप्रतीत्या नियमानुपलम्भात् कथं ततस्तदनुमानं? प्रियासुखप्रसवादेर्दृष्टस्यापि हर्षहेतोरनेकस्यापि सम्भवात्[4] परिशेषासिद्धिरिति। तन्मन्दं; पूर्वोक्तेन नयेन हर्षहेतुप्रतीतेर्भृत्यवाक्यजन्यत्वस्थितौ सामान्यतस्तावत् पदानां सिद्धार्थत्वस्यावगतत्वात्, प्रियासुखप्रसवादिव्यतिरेकेऽपि भूयो भूयः पुत्रजन्मनिवेदनप्रवृत्तभृत्यप्रयुक्तवाक्यश्रवणानुविधायिनो वदनविकासस्य पुत्रजन्मलक्षणहर्षहेतुविशेषप्रतीतिजन्यत्वस्य सुपरिशेषत्वाच्च। यदि चैवमप्यदृष्टहेतुशङ्क्या[5] परिशेषाभावः, तर्हि कार्यधियोऽप्यदृष्टहेतुशङ्क्या[6] गामानयेत्यादिवाक्यजन्यत्वपरिशेषो न स्यात्[7]। किञ्च गामानयेत्यादिवाक्यश्रवणात् प्रयोज्यवृद्धे प्रवृत्तिमुपलभ्य तद्धेतुपरिशेषस्य स्वतो दुष्करत्वेऽप्यात्मनि स्वतन्त्रप्रवृत्तेः कार्यबोधाधीनत्वनिश्चयात् कार्यबोधमेव तद्धेतुत्वेनावगच्छतीति वाच्यम्, अन्यथा परिशेषानुपपत्तेर्हेत्वभावः[8], वाक्यस्यैव[9] वा कादाचित्कस्याहत्य प्रवृत्तिहेतुत्वं[10] वेति प्रसङ्गात्[11]। तथा च कार्यबोधस्यात्मनि समीहितोपायतावबोधाधीनत्वनिश्चयात् परगतस्यापि कार्य-

---

१. ल्प्यतां. घ. २. स्य तत्पुत्रजन्म. घ. ३. त् कथं परिशेषासिद्धिरिति. स. परितोषसिद्धिरिति. ग. ४. सुकरपरि. ख. ग. ५. शङ्काया. घ. ६. दिवचनज. स. वचनजन्यस्य परि०. ग. ७. येति वाक्य. ख. ग. ८. वृत्तौ. ग. ९. वः, एवं वाक्य. ख. १०. व कादा. घ. ११. तुत्वं वेति न इति. ग

बोधस्य समीहितोपायताबोधमेव हेतुत्वेन निश्चिनोतीति[1] तद्बोधस्यानन्य[2]हेतुत्वात् तत्रैव पदानां शक्तिं कल्पयेत्, शब्दार्थस्यानन्यलभ्यत्वस्थितेः। न चेष्टोपायता[3]बोधाधीनत्वं कार्यबोधस्यानभ्युपगतम्; इष्टोपायताधियाँ हि ममेदं कार्यमिति बुद्ध्वा तत्र प्रवर्तत इत्युक्तत्वात् कामिनियोज्यक्रिया[4]कार्ययोर्वैधर्म्याभावेन[5] तन्निबन्धनापूर्वव्युत्पत्तिभङ्गप्रसङ्गाच्च। कथञ्च प्रवर्तकवाक्येभ्यो भवन्ती कार्यान्वितधीर्लिङादिसन्निधानादेवाकाङ्क्षाद्युपलक्षितार्थान्तरान्वितस्वार्थाभिधानमात्रगोचरयापि पदशक्त्या सम्भवन्ती कार्यरूपं विशेषणमपि शक्यकोटौ निवेशयेत्, कथन्तरां लाघवस्यैवैकरूपत्वस्याप्यनुग्राहकस्य कार्यान्वितस्वार्थाभिधानमितरेषामर्थान्तरान्वितकार्याभिधानञ्च लिङादेरिति, शक्तेर्गौरवमिव वैरूप्यमपि प्रतिकूलमङ्गीकारयेत्?

यत्पुनः कार्यान्वित एव धीदर्शनात् तदन्वित एव शक्तिः, नहि वह्निजातीयनिर्मिते फले द्रव्यमात्रे शक्तिरित्यवादि; तन्मन्दम्। तत्र हि द्रव्यमात्रगोचरतया कल्पायामपि शक्तौ वह्निफलस्य दाहादेः वह्निमन्तरेण द्रव्यमात्रादनुत्पत्तेः वह्नावपि शक्तौ कल्प्यायां लाघवात्तत्रैव शक्तिः, न द्रव्यमात्र इति[6] युक्तम्। इह तु कार्यान्विताभिधानस्य पदानामर्थान्तरान्वितस्वार्थाभिधानमात्रगोचरेण शक्त्योपपत्तेर्न युक्तं विशिष्टशक्ति कल्पनमिति। भवतु वा कार्यान्विते पदानां शक्तिः, तथापि कथं सर्वत्र[7] क्रियाया एव कार्यत्वेनान्वयात्तदुत्तीर्णमपूर्वं लिङाद्यर्थः स्यात्? क्रियाकार्यस्य क्षणभङ्गुरत्वेन काम्यमानानुपायस्य स्वर्गकामनियोज्यान्वयानुपपत्तेः क्रियोत्तीर्णमपूर्वमेव मुख्यो लिङाद्यर्थ इति चेत्, मैवम्;

---

१. नोति त. ग. २. स्यानन्यलभ्यत्वात्तत्रैव. घ. ३. ताधीनत्वं. ग. ४. या ममेदं. क. ख. ५. वैधर्म्याभावेन. घ. ६. भावे त. क. ख. ७. जातिनि. घ. ८. ति, तदयुक्तं. क. ९. रतया. ख. १०. सर्वक्रियाया एव. घ.

यथा गोशब्दस्य गोत्वमात्रे शक्तस्य परिचिततरतत्तद्व्यक्तिबोधेऽपि व्यक्तिविशेषपर्यन्तबोधाधायकत्वं प्रतीत्यपर्यवसानलभ्यं न स्वशक्त्यपेक्षं, एवं लिङादेरपि क्रियारूपमुन्मुच्य स्थिरास्थिरसाधारणकार्यमात्रे शक्तिग्रहात् क्रियारूपविशेषबोधेऽपि स्थायिकार्यविशेषस्य कार्यप्रतीत्यपर्यवसानलभ्यतया स्थायित्वस्य लिङाद्यनभिधेयत्वापत्तेः। नियोज्यान्वयवैधव्यं हि नियोगस्य शब्दार्थप्रतीतिविषयतया समाधेयं, न पुनः शक्तिप्रतियोगितया। तथा च लोके क्रियाकार्येऽपि लिङादिर्मुख्य एव स्यात्। युक्तश्चैतत्। अन्यथा लौकिकवाक्येषु मुख्यार्थस्य पदस्याभावादमुख्यार्थस्य चानभिधानात् अभिधानमेव पदानामव्युत्पन्नमिति वेदे लिङादेः कामिनियोज्यान्वितकार्याभिधानेवैधव्यानवगतेः तन्मूला स्थायिकार्ये व्युत्पत्तिरपि भज्येत इति व्युत्पत्तिविरहादनभिधानमेव लोकवेदयोरिति स्यात्।

यत्पुनर्लिङादिव्यतिरिक्तानां पदानां स्थिरास्थिरसाधारणकार्यमात्रे शक्तिरिति स्वीकारात् गामानयेत्यादिषु गवादिपदानां मुख्यार्थत्वेनान्विताभिधानव्युत्पत्तिरिति। तदयुक्तम्; एकेनैव प्रयोजकेन प्रथमावगतशक्तिषु कस्यचित् स्थायिकार्यं मुख्योऽर्थः कस्यचित् कार्यमात्रमिति विवेकस्य दुरभ्यूहत्वात्। नियोज्यान्वयवैधव्यस्य च लिङादेः कार्यमात्रे शक्तत्वेऽपि पूर्वोक्तनयेन सुपरिहरत्वात्। कथञ्च मानान्तरागोचरे लिङादेः सम्बन्धिग्रहणनिबन्धनः सम्बन्धावगतिः स्यात्? लिङा-

---

१. तत्र. ख. ग. २. तद्व. घ. ३. याविशेष. ग. ४. वैधव्यमपि नियोगस्य. घ. ५. वात् मुख्या. घ. ६. स्याभिधानाभावात्. ग. ७. न वैधव्या. घ. ८. कार्यो व्यु. क. कार्येऽपि व्युत्पत्तिरपि. घ. ९. वैधव्यस्य च. घ. १०. नः सम्बन्धः. क. ग. नसम्बन्धग्रहः. घ.

दिभिरेवावगतावन्योन्याश्रयप्रसङ्गात् । मानान्तरेणावगतौ मानान्तरापूर्वव्याकोपात् ।

यत्तु विमर्शारूढे[1] स्थायिकार्ये व्युत्पत्तिरिति, तदयुक्तम् । विमर्शो[2] नाम कश्चिदन्यतरकोटिपक्षपाती सन्देहविशेषः नूनमिदमेवामिति[3], न पुनरेवमेवेति नियमरूपः; तद्रूपत्वे तस्य संस्कारानधीनत्वेन प्रामाण्यप्रसङ्गात् । अतः स्थायिनि विमृष्टे सम्बन्धो विमृष्ट एव स्यात्, न तु निश्चितः; सम्बन्धनिश्चयस्य सम्बन्धिनिश्चयाधीनत्वात् । किञ्च यागक्रियायाः कार्यत्वं तावदवश्याभ्युपगन्तव्यम्; अन्यथा तत्र कार्यबोधाभावे तन्निबन्धनानुष्ठानस्याप्यसम्भवप्रसङ्गात् । अस्तु यागः कार्यं[4] इति चेत् तत्र प्रष्टव्यम्—किं नियोगप्रसूतस्तत्र कार्यबोधः, किं वा फलप्रसूत इति । न तावत् नियोगप्रसूतः, काम्येषु करणस्यापि विध्यनुष्ठाप्यत्वप्रसङ्गात् । नापि फलप्रसूतः, क्षणभङ्गिनो यागस्य फलसाधनत्वानुपपत्तेः । न च स्वर्गसाधनापूर्वसाधनत्वात् कार्यत्वम्; साधनसाधने साध्यार्थिनः कार्यबोधानुत्पादात् । उत्पत्तौ[5] वा विमर्शस्थेन स्थायिना साधनसाधनत्वेन यागेऽपि कामिनः कार्यबोधो जायत इति पूर्वावगतक्रियाकार्यव्युत्पत्त्यनुसारेण क्रियाकार्यस्यैव लिङाद्यभिधेयत्वप्रसङ्गात् । अतः कामाधिकारवाक्येषु फलप्रसूतत्वाद्यागकर्तव्यत्वस्य यागस्वर्गयोः साध्यसाधनभावो[6] वा साधनसाधनेऽपि साध्यार्थिनः[7] कार्यबोधो वाङ्गीकरणीय इति न यागातिरिक्तस्य लिङाद्यभिधेयत्वसिद्धिः[8] ।

---

१. मार्गारूढे. ग. २. मार्गो हि नाम. ग. ३. ति हि सम्भवति. ख. ति सम्भवति. ग. ति हि भवति. घ. ४. गमनीयम्. ग. ५. कार्यमिति चेत्. ख. ग. ६. का. ग. ७. त्पादे वा वि. ख. ग. त्पत्तावपि, घ. ८. नसाधनेऽपि साध्यार्थिनः कार्यबोधो वा. घ. ९. ना. ग. १०. ङभि, क. ख. घ.

अपि च, यदि विप्रकृष्टकालत्वान्न स्वर्गस्य यागसाध्यत्वं[1], तर्हि प्राच्योदीच्याङ्गसव्यपेक्षतया[2] विप्रकृष्टकालस्याधिकारापूर्वस्याग्नेयादिरसाधनं स्यात्। असाधनमेव, तस्य करणत्वादिति चेत् न; करणत्वस्य साधनत्वावान्तरविशेषत्वात् सामान्यनिवृत्तौ करणत्वस्यापि निवृत्तिप्रसङ्गात् स्वर्गं प्रति यागेऽपि तस्य सुवचत्वाच्च। अधिकारापूर्वं प्रत्युत्पत्त्यपूर्वाण्येव करणानि, आग्नेयादयस्तु करणमपि न[3] सम्भवन्तीति चेत्, मैवम्; नियोगं प्रति विषयभूतस्यैव तत्करणत्वमिति नियमाभावप्रसङ्गात्। अवान्तरापूर्वाण्येवाधिकारापूर्वस्य विषयोऽपि इति चेत्, मैवम्; कामाधिकारवाक्ये हि कामिनियोज्यान्वयवैधेय्यालिङादेरपूर्वाभिधानव्युत्पत्तौ सिद्धायां आग्नेयादिवाक्यैरुत्पत्त्यपूर्वाण्यभिधेयानि, ततश्च करणीभूतस्यैव विषयत्वात्तेषां कैरणत्वमालोच्य सविषयाधिकारैर्नियोगप्रतिपत्तिरिति परस्पराश्रयचक्रकयोः प्रसङ्गात्। अतः प्रत्ययार्थमधिकारापूर्वं प्रति प्रकृत्यर्थस्य यागस्यैव विषयत्वात्, तस्य च करणीभूतस्यैव तत्त्वात् आग्नेयादिः करणीभूत इत्यभ्युपगमनीयम्। तथा च तद्वदेव यागस्य स्वर्गं प्रत्यपि करणत्वं प्रतिपन्नकैरणत्वनिर्वाहाय उत्पत्त्यपूर्ववत्[11] परमापूर्वकल्पनञ्च सम्पत्स्यत इति कथं तस्य मानान्तरापूर्वत्वं लिङर्थत्वं वा?

यत्पुनरधिकारापूर्वस्याग्नेयादिसाध्यत्वन्नात्यन्तमयोग्यं, तस्य तदनन्तरमुत्पत्तेरपि सम्भावितत्वात्, स्वर्गस्य तु यागसाध्यत्वमत्यन्तमयोग्यं; तस्य कालान्तरभावित्वेन प्रसिद्धत्वादिति वैषम्यमुक्तं[12];

---

१. साधनत्वं, तर्हि. घ. २. र्त्वं; कथन्तर्हि. ग. ३. न भवन्तीति. ग. ४. यभूत ख. ग. ५. वैधत्यालिङादेः घ. ६. तस्य विषयत्वात्. ग. ७. कार. घ. ८. रप्रतिपत्तिरिति. ख. घ. ९. यो (ज्य? ज) नप्रतिपत्तिरिति. ग. १०. कारणत्व. घ. ११. त्वं वा। यत्पुन. १२. मुक्तम्; स्वर्गस्यापि. ख. ग.

तदयुक्तम्। स्वर्गस्यापि कालदेशदैर्विप्रकृष्टत्वमर्थवादेतिहासपुराणपर्यालोचनाधीनमिति तदप्यालोचयतां न यागानन्तरजत्वमयोग्यम्। अपूर्वस्यापि स्विष्टकृदाद्युत्तराङ्गसव्यपेक्षतया विप्रकृष्टकालत्वमालोचयतामाग्नेयाद्यनन्तरजत्वमसम्भावितमिति सम्भावनासम्भावनयोरुभयत्र तुल्यत्वात्। अवश्याभ्युपगमनीयश्च यागावगोरणस्य नरकपातसाधनत्वम्। नहि तत्र प्रत्यवायापूर्वस्य शब्दाभिधेयत्वं क्लृप्तं, येन तस्यैव नरकपातसाधनत्वं, अवगोरणस्य त्वपूर्वसाधनत्वमेवेत्युच्येत। किन्तु कल्प्यं, कल्पकश्च न स्यात् अतो नरकपातस्यावगोरणसाध्यत्वात्।

यत्पुनः कामाधिकारवाक्येषु प्रथममपूर्वप्रतिपत्तेर्विमृश्यमानापूर्वद्वारमवगोरणस्य नरकपातसाधनत्वं सुबोधं, कामाधिकारवाक्येषु प्रथममन्यत्रापूर्वाप्रतिपत्तेस्तद्वारमपि यागस्य स्वर्गसाधनत्वं दुर्बोधमिति। तन्मन्दं; कामाधिकारवाक्येष्वपि लिङादेरपूर्वव्युत्पत्त्यर्थं कामिनियोज्यान्वयवैधव्यतोऽपूर्वविमर्शस्य प्रथममभ्युपगतत्वात् तद्द्वारेण यागस्यापि स्वर्गसाधनत्वोपपत्तेः, परस्परानपेक्षवाक्यद्वयप्रवृत्तौ पौर्वापर्यनियमानुपपत्तेश्च। किञ्च यदि विप्रकृष्टकालसाध्यत्वात् स्वर्गो न यागसाध्यः, तर्हि क्षणभङ्गिन्याः कृतेर्विप्रकृष्टकालत्वात् अपूर्वं न साध्यमिति कृतिसाध्यत्वलक्षणं कार्यत्वमेव भज्येत। यागावान्तरापूर्वद्वारेणं तु तस्य साध्यत्वे स्वर्गस्याप्यधिकारापूर्वद्वारा यागसाध्यत्वमिति सर्वं समानम्।

ननु यदि कार्यं न प्रवर्तकं[11] न च तल्लिङाद्यर्थः, किन्तर्हि प्रवर्तकं लिङाद्यर्थः? उच्यते —

---

१. यागान्तर. घ. २. क्षयोर्विप्रकृ. ग. ३. ते सम्भावनासम्भावन. घ. ४. त्वादिति। अवश्या. ग. ५. त्वं, येन. ख. ६. मार्गस्य. ग. ७. नत्वानुपपत्तेः क. घ. ८. त्तेः। किञ्च ख. ग. ९. ण यागसाध्यत्वमिति स्वर्ग. घ. १०. द्वारेण. ग. ११. न तल्लिङाद्यर्थः. ख. ग.

प्रवृत्तिहेतुः सर्वेषां कर्तव्यत्वैकसंश्रया ।
इष्टाभ्युपायता सैव लिङाद्यर्थो विधिर्मतः ॥

यदवगतं हि प्रवृत्तिं जनयति, तत् प्रवर्तकम् । इष्टोपायत्वं चावगतं प्रवृत्तिं जनयति । न च फलैर्व्यभिचारः, फलप्रवर्तकत्वस्य कार्यप्रवर्तकत्व-निरासवेलायामेव निरस्तत्वात् । न चेष्टोपायत्वस्य भूतादौ प्रवृत्त्य-जनकत्वात् अप्रवर्तकत्वं, कर्तव्यत्वैकार्थसमवायित्वेन विशेषणात् । अतः शब्दतद्व्यापारयोरन्यत्र प्रवृत्तिहेतुत्वाभावादिहैव तयोरन्यतरस्य प्रवृत्तिहेतुत्वकल्पनं दृष्टानुसारविरुद्धं गौरवाय चेति तयोरप्रवर्तकत्वात्, इच्छायाश्चोत्पत्तित एव प्रवर्तकत्वात्, कार्यफलयोः प्रवर्तकत्वस्य प्रागेव परास्तत्वात् । समीहितोपायता कर्तव्यत्वैकार्थसमवायित्वेन ज्ञाता सर्वत्र प्रवर्तिका; सैव च विधौ विहितस्य लिङादेरभिधेया इति सिद्धम् । अत एव—

श्येनस्वरूपं नानर्थस्तत्फलस्य त्वनर्थता ।

इत्युक्तं; श्येनस्वरूपस्य समीहितोपायतया लिङभिधेयस्य विधेयत्वादनर्थत्वानुपपत्तेः । ननु न विधेयः श्येनः तस्य विध्य-नुष्ठाप्यत्वाभावात् । यस्य हि विधिः स्वांसिद्ध्यर्थमनुष्ठानमाक्षिपति तद्विधेयम् । काम्ये च फलत एवानुष्ठानसिद्धौ विध्यनुष्ठाप्यत्वा-भावात् । मैवम्; एवं सति काम्येष्वङ्गानुष्ठानस्याऽपि फलप्रयु-क्तया विधेयत्वाभावात् अग्नीषोमीयहिंसायामप्यधर्मत्वापत्तेः । अङ्गानां फलसाधनत्वस्यानवगतचरत्वात् । तत्र न फलमनुष्ठापकमिति चेत्, न; करणेऽपि समत्वात् । अथ कृतितत्साध्यैमध्यस्थस्य

---

१. त्वेन संश्रया. ग. २. गतं प्रवृत्तिं. घ. ३. फले. घ. ४. न च भूतादौ. ख. ग. ५. तयोः प्रवर्त. घ. ६. दनर्थतापत्तेः घ. ७. स्वविध्यर्थ. ग. ८. तयैवानु. घ. ९. वं काम्येषु. ख. १०. समानत्वात्. ग. ११. ध्ययागादेः. घ.

यागादेर्विषयत्वात्, तस्य च कामिकार्ये काम्यमानोपायत्वेनावगतस्यैव कामिकृतिव्याप्यतया विषयत्वात् प्रथमतः कामोपायत्वे प्रतिपन्ने तदेव तत्र प्रवर्तकमिति मतम्, तर्हि तत्र प्रष्टव्यं; किमङ्गोपेतस्य प्रधानस्य फलंकरणत्वमुताङ्गविधुरस्य? इति। यद्यङ्गविधुरस्य तर्हि काम्येष्वङ्गविधुरस्य भावार्थमात्रस्यैव फलकरणत्वेन[2] विधिविषयत्वात् कतिपयाङ्गविधुरेऽपि[3] विषयविलयाभावान्नित्यकाम्यवैषम्यं न घटते। अथ अङ्गोपेतस्य भावार्थस्य फलकरणत्वं, तर्हि फलंमेव करण इवाङ्गेऽप्यनुष्ठापकं इति श्येनाग्नीषोमीयविभागो भज्येत। इत्युभयतस्पाशा रज्जुः स्यात्। किञ्च—

आकाङ्क्षासत्तियोग्यत्वैः पदार्थानां मिथोऽन्वयः।
न च स्वर्गेण यागस्य त्रयमप्युपपद्यते॥

पदार्थानां हि परस्परान्वयस्तावदाकाङ्क्षादित्रयनिबन्धन इत्यविवादम्। तत्र यागस्वर्गयोरन्वये न त्रितयमप्यस्ति; यागस्वर्गयोर्नियोगस्यैव साध्यतया साधनतया च परस्परमाकाङ्क्षाभावात्, क्षणविनश्वरस्य यागस्य कालान्तरभाविस्वर्गसाधनायोग्यत्वात्, पदावयवभूतप्रत्ययेन साक्षात् साध्यत्वेनोपात्तादपूर्वात् नियोज्यविशेषणतया पदान्तरोपात्तस्य कल्प्यसाध्यभावस्य स्वर्गस्य विप्रकृष्टतरत्वाच्च। यदि चैवमपि यागस्वर्गयोः साध्यसाधनभावोऽवगम्यते ततोऽवगतस्वर्गोपायभावं यागमेव कामी कार्यतया बोद्धुमलमिति कामिनियोज्यान्वय-

---

१. लोपायत्वं. ख. ग. ङ. लकारणत्वं. घ. २. न विषयत्वात्. ख. ङ. ३. विरहेऽपि. ङ. ४. ल एव. ग. ५. गम्येत. ङ. ६. कामिकार्यतया. घ.

वैयर्थ्यादपूर्वे व्युत्पत्तिशास्त्रस्याऽस्तवो भज्येरन्। अतो यागस्वर्गयोरुपायोपेयभावस्य दुरवगमत्वात् कथं तन्मूला करणेषु फलतः प्रवृत्तिः? कथन्तरामविध्यनुष्ठाप्यतया विधेयत्वाभावः? कथन्तमामविधेयत्वाच्छयेनस्य विधेयाग्नीषोमीयवैषम्यम्? नन्वग्नीषोमीयहिंसायाः विधेयत्वेऽपि सामान्यतो "न हिंस्याद्" इति निषिध्यमानत्वादधर्मत्वं स्यात्। न च पदाहवनीयन्यायेन सामान्यशास्त्रस्य बाधसङ्कोचयोरन्यतरसम्भवः; तयोर्विरोधमूलत्वात्। न च प्रकृते विरोधोऽस्ति; "न हिंस्याद्" इति सामान्यशास्त्रेण हिंसायाः प्रत्यवायहेतुत्वावगमेऽपि "अग्नीषोमीयं पशुमालभेत"इति विशेषशास्त्रत एव क्रतूपायत्वावगमस्याविरुद्धत्वात्। न च क्रतोः समीहितत्वात् समीहितक्रतूपायत्वं प्रत्यवायोपायत्वेन विरुध्यत इति वाच्यं; समीहितोपायस्यापि वेश्यासंवेशादेः प्रत्यवायोपायत्वावगमादिति। तदयुक्तम्। तथाहि— यद्यपि सामान्यविशेषशास्त्रयोः प्रत्यवायोपायत्वं क्रतूपायत्वञ्च विषय इति विषयभेदान्न प्रतिबेलायां विरोधः, तथाप्यनुष्ठानपर्यन्तत्वाद्विधेस्तद्विरोधेऽपि विरोधो भवत्येव। न च नास्त्येवानुष्ठानविरोधोऽपीति वाच्यं; हिंसायाः क्रतूपायत्वावगमेऽपि प्रत्यवायोपायत्वावगतौ नियमेन तत्राप्रवृत्तेः। न च वेश्यासंवेशादाविव प्रवृत्तिरिति वाच्यम्; अतुल्यत्वात्। वेश्यासंवेशस्य हि सुखोपायत्वमन्वयव्यतिरेकावसेयत्वान्न सन्दिग्धं, नातादात्विकञ्च। प्रत्यवायोपायत्वन्तु श्रुतिगम्यत्वादनतिश्रद्दधानानां सन्दिग्धं देहदेशकालैर्विप्रकृष्टञ्चेति विप्रकृष्टात् सन्दिग्धाच्च प्रत्यवायादसन्दिग्धं प्रत्यग्रञ्च सुखं बलवदिति युक्तं तस्य तत्र प्रवर्तकत्वम्। अग्नीषोमीयहिंसायाः क्रतूपायत्वं प्रत्यवायोपायत्वञ्च प्रमाणतो विप्रकर्षतश्च तुल्यमिति विषाविले मधुनीव न तत्र चेतनस्य प्रवृत्तिः स्यात्। न च प्रत्यवायस्याल्पत्वं, क्रतुफलस्य

---

१. त्तिः शास्त्रस्य. ङ. २. फलप्रवृत्तिः. ग. ३. भेदोन्न. ख. ङ. ४. नातात्विकञ्च. क. न तादात्विकं च. घ. ५. ष्टत्वात् सन्दिग्धत्वाच्च. ग. ६. स्य भू. ङ.

तु भूयस्त्वमित्यत्र प्रमाणमस्ति, येनाविगणय्य प्रत्यवायोपायत्वं क्रतवे यतेत । तस्मात् सामान्यविशेषशास्त्राभ्यामविशेषेण हिंसाया नरकोपायत्वं स्वर्गोपायत्वञ्चाविदितमिति न तत्र कश्चिदपि प्रवर्तेतेति भवत्येवानुष्ठान-विरोध इति युक्तमेवं षडाहवनीयन्यायेन सामान्यस्य बाधाद्धर्मत्वमग्नी-षोमीयहिंसायाः ।

ननु "न हिंस्याद्" इति निषेधोऽनारभ्याधीतत्वात् पुरुषार्थः, स कथं क्रत्वर्थां हिंसां निषेधेत्, क्रत्वर्थहिंसानिषेधे क्रत्वर्थत्वप्रसङ्गात् । अनि-षेधंश्च कथं विरुध्येत अविरुद्धश्च कथं बाध्येत ? मैवम् ; पुरुषार्थस्य निषेधस्य हिंसामात्रोद्देशेन प्रवृत्तेः । नचैवं क्रत्वर्थत्वापत्तिः ; क्रतु-प्रकरणानाम्नानात् । अग्रहणन्तु क्रतुप्रकरणाधीनत्वात् तदङ्गं, न क्रत्वङ्गग्रहणनिषेधरूपत्वात् । अन्यथा सर्वत्र निषेधस्य निषेध्यसाध्या-ङ्गत्वनियमे भोजनादिनानाप्रयोजनाङ्गं हिंसेति पुरुषार्थः तन्निषेधोऽपि भोजनाद्यङ्गं स्यादित्यलमतिदूरगमनेन । प्रकृतमनुसरामः ।

किञ्चापूर्वाभिधायित्वं लिङादेर्यद्युपेयते ।
न हन्यादिति वाक्यस्य स्यादबोधकता तव ॥

यदि हि लिङादेः केवलस्य नञनुबद्धस्य च कर्तव्यत्वैकार्थसम-वेतमिष्टोपायत्वमनिष्टोपायत्वञ्चार्थ इत्यनभ्युपगम्य सर्वत्रापूर्वकार्यमेवार्थ इत्यङ्गीक्रियते, ततो "न पिबेद्" इत्यादिषु निषेधशास्त्रेषु "यावज्जीवमग्निहोत्रं

१. वायत्वं. घ. २. यतते. ग. ३. ज्ञावेदि. ङ. ४. व यदा. घ. ५. र्थः कथं. ग. ६. त्वर्थान्न हिंस्यान्निषेधेत. ङ. ७. धे तत्त्वार्थः. क. ८. षेध्य कथं. घ. धांश्च ङ. ९. द्धंश्च. क. १०. णानधीतत्वान्. ख. णाम्नानात्. ग. ११. स्य साध्याङ्गत्वनियमे. घ. १२. ङ्गकत्व ख. १३. न्निरोधोऽपि. ग. १४. क्रियापूर्वाभिधेयित्वं. ग. १५. बन्ध. घ. १६. येत. ग.

जुहोति"इत्येवमादिषु नैमित्तिकाधिकारेषु च सर्वथा कार्यार्थस्य दुरुपपादत्वात् अकार्यरूपस्य च शब्दार्थत्वानुपपत्तेः अबोधकत्वमेव तस्य स्यात्। नहि हिताहितप्राप्तिपरिहारतदुपायताविधुरस्य कार्यत्वं दुःखस्येव श्रुतिशतेनापि शक्यं बोधयितुम्; असतोहितस्य कृत्युद्देश्यत्वानुपपत्तेः असुखस्यादुःखपरिहारस्यातत्साधनस्य च समीहितत्वानुपपत्तेः, व्यापकभूतसुखदुःखपरिहारतदुपायत्वनिवृत्तौ व्याप्यस्य समीहितत्वस्य निवृत्त्या तद्व्याप्यस्य कृत्युद्देश्यत्वस्यापि निवृत्तेः। न च निरपेक्षागमावसितकृत्युद्देश्यत्वबाधनाय व्याप्तिर्न प्रभवतीति वाच्यम्; वाक्यवृत्तिमूलस्य योग्यत्वस्यैवानुमानेन विघटितत्वात्। अन्यथा सहस्रसंवत्सरकर्तव्यत्वयोरन्योन्यान्वययोग्यत्वबोधकस्य प्रमाणस्य तदन्वयावेदकेनागमेन विरुद्धार्थत्वात् सहस्रसंवत्सरपदं न मुख्यवृत्ति, किन्तु जघन्यवृत्त्या सहस्रदिवसपरमिति न स्यात्। प्रकृतिप्रत्यययोरेकपदत्वात् तदर्थायोग्यत्वं न वाक्यार्थप्रत्ययं निरुणद्धीति चेत्, मैवं; प्रकृतिप्रत्यययोरेकपदत्वेऽपि तदर्थयोरन्वयानर्हत्वे तत्र व्युत्पत्त्यसम्भवेन पदार्थस्यैवाप्रतिपत्तेस्तन्मूलस्य वाक्यार्थप्रत्ययस्य सुतरामसम्भवात्। न च स्वर्गकामवाक्ये कामापायत्वादपूर्वस्य लिङाद्यभिधेयत्वसिद्धौ नैमित्तिकनिषेधाधिकारयोरपि लिङादेस्तत्त्वेन प्रत्यभिज्ञानात् अपूर्वप्रतिपत्तिरिति वाच्यम्; एवं सति फलशिरस्कत्वादेवापूर्वस्य लिङाद्यभिधेयत्वव्युत्पत्तिः, नापरथेति नैमित्तिकनिषेधाधिकारयोरपि लिङादेस्तत्त्वेन प्रत्यभिज्ञानादपूर्वस्य फलाशिरस्कत्वमेव स्यादिति नियोज्यवत् फलमपि नियोगप्रतिपत्तिनिर्वाहकमिति नियोज्या-

---

१. जुहुयादित्यादिषु ख. जुहोतीत्यादिषु. ग. ङ. २. दुरुपपादकत्वादकार्यरूपत्वस्य च. ग. ३. कार्यार्थत्वं. ख. ङ. ४. सिः प्रभवतीति. ख. ग. ङ. ५. रं न मुख्यवृत्ति, किन्तु. ख. ङ. ६ ख्यार्थवृत्तिः. घ.

भाव इव फलार्थावे तत्र वेदस्याबोधकत्वमेवेति प्राप्तत्वात्। भवेतु वा फलरहितस्यापूर्वस्य यावज्जीवादिवाक्येषु कथञ्चिदभिधेयत्वम्। "न हन्यात्" "न पिबेद्" इत्यादिषु[1] तु निषेधाधिकारेषु कथमस्यावगमः स्यात्? नं हि निर्विषयो नियोगः प्रत्येतुं शक्यते। न च भावार्थादपरस्य विषयत्वम्। न च नञर्थो भावार्थः, तस्य प्रागभावरूपत्वात्। न च प्रागभावरूपस्यऽपि परिपालयत्वादिरूपेण कथञ्चित् साध्यत्वाद्दध्यादिवद्विधिविषयत्वमाशङ्कनीयं, परिपालनाद्यवच्छिन्नस्यापि प्रागभावस्य भावार्थत्वानुपपत्तेः। कृतिर्हि पुरुषप्रयत्नः, स च साध्यरूपमपि न वस्त्वन्तरं साक्षाद्व्याप्नोति, किन्तु यागादिरूपभावार्थमेवेति कृतिस्वभावालोचनया भावार्थादितरस्य कृतिव्याप्यत्वाभावादकृतिव्याप्यस्य च विधिविषयत्वानुपपत्तेः। दध्यादावपि दधिविभक्तस्य होमस्यैव विषयत्वं न होमविभक्तस्य दध्नः तथा। गोदोहनेऽपि तद्विभक्तस्य प्रणयनस्यैव विषयत्वम्। द्रव्यदेवतासम्बन्धस्तु भावार्थरूप एव यागप्रणादिकया कृतिव्याप्यो विषय इति सर्वथा भावार्थादितरस्य विषयत्वायोगः। न चात्रापि प्रागभावावच्छिन्नस्य पालनादेर्निवृत्तिमूलस्य प्रयत्नस्य भावार्थस्यैव विधिविषयत्वं; परिपालनादेर्भावार्थस्य नञर्थत्वानुपपत्तेः। प्रसज्यप्रतिषेधसम्भवेऽपि लक्षणाया अन्याय्यत्वात्। न्याय्यत्वे वा सर्वत्र

---

१. भावेऽपि. घ. २. फलतु. घ. ३. षु निषे. घ. ४. न निर्विषयो. क. न हि निर्विषयो निषेधः प्रत्येतुं शक्यः. ग. न हि गीर्विषयो ङ. ५. तिवाच्यत्वा. ङ. ६. स्य विधि. ख. ङ. ७. मस्य विषयत्वं. ख. ङ. ८. व विधिविषयत्वम्. घ. ९. व विधिविषयत्वं. ग. १०. व्याप्यो विधिविषय इति. ग. व्याप्तो विषय इति ख. घ. ङ. ११. स्य विधिविषयत्वायोगात्. ग. १२. ब्रस्य वा भावार्थस्यैव. ग. ब्रभावार्थस्यैव. घ. १३. वे च. ख. घ. ङ.

प्रसज्यप्रतिषेधभङ्गप्रसङ्गात्। प्रजापतिव्रतादौ[1] "नेक्षेतोद्यन्तमादित्यं" इत्यादौ "तस्य व्रतं" इत्यधिकारात् प्रसज्यप्रतिषेधोऽसम्भवादनीक्षणसङ्कल्पः पर्युदासवृत्त्या लक्ष्यत इति युक्तम्। सति सम्भवे तु लक्षणाया अन्याय्यत्वात् क्वचिदपि प्रसज्यप्रतिषेधो नास्तीत्यङ्गीकरणीयम्, अङ्गीकरणीयं वा निषेधाधिकारेषु विषयाभावादपूर्वप्रतिपत्तिर्नास्तीति। तस्मादुक्त एव मार्गो लिङाद्यभिधेयनिर्णये सुन्दर इत्यास्तान्तावत्॥

इति कार्यवादो नाम द्वितीयवादः समाप्तः।

[स्वतः प्रामाण्यवादः।]

वेदानां कर्तृभावे गुणविधुरतया बाधि मा मानतेति
प्रामाण्यस्य स्वरूपं प्रमितिजननयोस्तच्च तस्य स्वतस्त्वम्।
मानानां लक्षणं तद्विषयविभजनं तद्ग्रहिष्वन्तरत्वे
इत्यत्राचार्यगुह्यं प्रणिहितमनसस्तत्त्वतो वर्णयामः॥

इह हि प्रामाण्याप्रामाण्ययोः स्वतस्त्वपरतस्त्वे प्रति विप्रतिपद्यन्ते वादिनः। केचिदाहुः—स्वतोऽसतामसाध्यत्वात् उभयं स्वत इति। वदन्ति च—यदसत् तत् न क्रियते, यथा शशविषाणम्। असच्चेत् कारकव्यापारात् पूर्वं कार्यं तर्हि न क्रियेत[4] क्रियते[5] च, अतः सदेव पूर्वमपि। किञ्च तन्तुभिः पटः सम्बद्धो वा स्यादसम्बद्धो वा? सम्बद्धश्चेदसतः

---

१. दौ तु. ख. ङ. २. धसम्भवाद. ग. ३. स्मादसमदुक्त एव. ङ. ४. पप्र. ङ. ५. त अतः. ग. ते क्रियते च अतः. घ. ६. येत. ङ.

सम्बन्धानुपपत्तेः प्राक् सत्कार्यत्वम् । असम्बद्धश्चेत्तन्तूनामेवोपादानत्वं, न वीरणादेः पटस्यैवोपादेयत्वं, न विश्वस्य इत्युपादानोपादेयनियमो न स्यात् । असत्वासम्बन्धयोरविशेषात् ।

यथाहुः—

असत्वान्नास्ति सम्बन्धः कारकैस्सत्वसङ्गिभिः ।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥

इति । स्यादेतत्—शक्तितो नियमान्नोपादानोपादेयनियमभङ्ग इति । तदयुक्तम्; शक्तेश्शक्ताश्रयायाः शक्येनासम्बन्धे पूर्ववदनियमापत्तेः, सम्बन्धे चास-तस्सम्बन्धानुपपत्तेः पूर्ववत् सत्कार्यत्वप्रसक्तेः । अपि च कारणभावाच्च । नहि कार्यादभिन्ने कारणे सति कारणादभिन्नं कार्यमसज्जति; विरोधात् । न च कार्यस्य कारणादभिन्नत्वमसिद्धम्; तन्तुभ्यः पटो न भिद्यते, तत्कार्य-त्वात्, यद्यतो भिद्यते न तत् तस्य कार्यं, यथा गौरश्वस्य । तन्तु कार्यश्च पटः तस्मान्न तन्तुभ्यो भिद्यते । तथा यद्यतो भिद्यते तेन तस्य संयोगोऽप्राप्तिर्वा यथा कुण्डबदरयोः, मेरुविन्ध्ययोर्वा । न च तन्तुभिः पटस्य संयोगोऽप्राप्तिर्वा । तस्मात् न तन्तुभ्यो भिद्यते पट इत्यादिभि-रभेदसाधनात् । अतस्सिद्धं सत्कार्यत्वं इति ।

अत्रोच्यते—न तावत् क्रियमाणत्वं सत्वसाधनम्; तस्य सत्वेऽप्यनु-पपत्तेः असत्वेऽप्युपपत्तेश्चासाधारणत्वात्, सन्दिग्धविपक्षव्यतिरेकित्वाच्च ।

---

१. न्धत्वा. ग. २. पायत्वं, अविश्वस्य. ग. ३. त्वसङ्गिभिः घ. ४. इति शक्तितो. क. घ. ५. दर्थनियमापत्तेः. ङ. ६. यमोपपत्तेः. ग. ७. णे कार. ङ. ८. ते तेन पट. घ. ९. र्यन्तदिति. ग. १०. पत्तेश्चासाधारणत्वात्. ग.

तथाहि[1]—न सतो घटादेः क्रियमाणत्वं दृष्टम् ; कृते कारकव्यापारानुपपत्तेः। नाप्यसतः क्रियमाणत्वमनुपपन्नम् ; असतोऽपि समवहित पुष्कलकारणस्य क्रियमाणत्वाविरोधात्।

यत् पुनः कारकैरसम्बद्धस्य कार्यस्योत्पत्तावुपादानोपादेयनियमभङ्ग इति। तन्मन्दम् ; किञ्चिदेवोपादानं कस्मिंश्चिदेव कार्ये शक्तमिति शक्तिनियमात्। न च शक्तिरपि शक्येनासम्बद्धा न नियन्त्रीति वाच्यम् ; शक्तेश्शक्ताश्रयायाः शक्येनासम्बन्धेऽपि प्रतिनियतशक्यानुकूलस्वभावत्वात्। अन्यथा भवन्मतेऽपि प्रधानोपादानत्वाद्विश्वस्य सर्वं सर्वरूपेण सर्वत्र सर्वदा सत् इति कथं विलक्षणव्यवहारोपपत्तिः? विवेकहेतोरभावात्। अथ सत्त्वाविशेषेऽपि तत्तदभिव्यञ्जकहेतुसामर्थ्यनियमात् तदभिव्यक्तिनियमः, तर्हि तन्नियमादसदुत्पत्तिरपि भवेन्तीति[2] न विरोत्स्यते[3]।

यत् पुनः कारणाभेदादिति, तदसिद्धमेव। यानि तु तदभेदसाधनानि तानि प्रत्यक्षेण तन्तुपटयोर्भेदोपलब्धेस्तद्विरुद्धानि न दूषणान्तरं प्रयोजयन्ति। किञ्च कारकव्यापारात् प्रागपि यदि तन्तुषु पटः स्यात् किमिति नोपलभ्यते? अनभिव्यक्तत्वादिति चेत्, किमियमभिव्यक्तिः पूर्वमसतो सती वा? सती चेत्, पूर्वमप्युपलब्धिः, असती चेदसत्या एवाभिव्यक्तेरुत्पत्तिरिति कथमसदुत्पत्तिनिषेधः? तस्मात् सत्कार्यत्वनिषेधात् प्रामाण्याप्रामाण्ययोः परस्परपरिहारित्वेन किञ्चित् प्रमाणं किञ्चिदप्रमाणमिति व्यवस्थानुपपत्तेश्च नोभयं स्वतः। किन्तु अप्रामाण्यं

---

१. हि सतो. ग. २. कार्योत्पत्ता. ग. ३. मादुत्पत्तिरपि. ग. ४. वाति. न. घ. वन्तौ न विरोत्स्यते. ङ. ५. ते। तत्पुनः कारणाभेदादिति. घ. ६. कारणभेदादिति. क. ख. ७. ती वा सती चेत्. घ. ८. किञ्च. ग.

स्वतः प्रामाण्यं परत इत्यपरे । तथा हि—यदि प्रामाण्यं स्वतोऽवसीयते कथं तर्हि वस्तुवृत्त्या प्रमाणे प्रामाण्याप्रामाण्ये शङ्क्येयाताम् ? न ह्यन्यतरकोटिनिर्धारणे[1] शङ्कावतरति; अतिप्रसङ्गात् । अतो गुणज्ञानादर्थक्रियाज्ञानाद्वा प्रामाण्यावगमः । न च प्रथममर्थतथात्वानिश्चये कथं प्रवृत्तिः, तन्निश्चये वा कथं प्रामाण्यानिश्चय इति वाच्यम् ; कृष्यादाविवार्थसन्देहादेव प्रवृत्त्युपपत्तेः । प्रवृत्तस्य चार्थक्रियोपलब्धौ पूर्वावगतस्यार्थस्य[2] अर्थक्रियाकारित्वलक्षणं सत्त्वं निश्चितमिति तद्विषयस्य पूर्वज्ञानस्यापि[3] तदर्थसमुत्थत्वेन पश्चात् प्रामाण्यं निश्चीयते । यथोक्तम्—

तस्मिन् सदपि मानत्वं विनिश्चेतुं न शक्यते ।
उत्तरार्थक्रियाज्ञानात् केवलं तत्प्रतीयते ॥ इति ।

न चैवमर्थक्रियाज्ञानस्याऽपि स्वविषयार्थक्रियापरिनिश्चये परापेक्षा; येनानवस्था भवेत्, तस्य फलरूपत्वात् । फलार्थं हि सर्वं परीक्ष्यं, न फलमन्यापेक्षमिति[4] । अतः स्फुटाविकल्परूपत्वात्[5] फलरूपत्वाच्चार्थक्रियाज्ञानं[6] स्वत एव स्वविषयतथात्वावधारकं प्रमाणञ्च । न चैवं प्रामाण्यावगमस्य प्रवृत्त्यङ्गत्वात् प्रवृत्त्युत्तरकालमर्थक्रियया तन्निर्णयो निष्फल इति वाच्यम्; ज्ञानान्तरेषु निश्शङ्कप्रवृत्त्यर्थं विसंवादिज्ञानव्यावृत्तप्रमाणप्रतिबद्धरूपविशेषाकलनाय प्रवृत्त्युत्तरकालीननिर्णयस्योपयोगात्[7] । प्रतीयते हि प्रवृत्तावभ्यासवत्यामाद्ये ज्ञाने फलस्याप्राप्तावप्यर्थक्रियारूपं फलमविषयीकुर्वतो विज्ञानान्तरादविसंवादिभ्यो व्यावृत्तं वैलक्षण्यम्[8] । यथाहुः—

---

१. रनिर्धारणे. ग. २. स्यार्थाक्रिया. घ. ३. पि सदर्थ घ. ४. म. स्यार्थमि. ङ. ५. मित्यत्र स्फुटा. ग. ६. त्वाच्चार्थक्रियाज्ञानं. ग. ७. ज्ञानस्य व्यावृत्त. घ. ८. बन्ध. ग. घ. ९. फलं विषयीकुर्वतो. ग.

वृत्तावभ्यासवत्यां तु वैलक्षण्यं प्रतीयते ।
अतद्विषयतो ज्ञानाद्यद्येऽप्राप्तेऽपि तत्फले ॥ इति ।

तस्मात् झटिति निश्शङ्कप्रवृत्तिरपि तत्र तत्र विसंवादिव्यावृत्तप्रमाणप्रतिबद्धरूपविशेषालिङ्गकानुमानादेवेति न स्वतः प्रामाण्यावभासः। अत्राभिधीयते—

भवेत्प्रामाण्यसंवित्तिरर्थयाथार्थ्यनिश्चयात् ।
तन्निश्चयस्तु संवादाद् गुणज्ञानाच्च नेष्यते ॥

प्रमितिसाधकतमत्वं हि प्रामाण्यम् । प्रमितिश्चानधिगततथाभूतार्थावधारणम्। न चैवमिन्द्रियादेरेव प्रामाण्यं न ज्ञानस्य, तस्यावधारणरूपत्वेनावधारणान्तरसाधकतमत्वानुपपत्तेरिति वाच्यम् ; ज्ञानप्राकट्ययोः कार्यकारणभावेनादूरविप्रकृष्टयोरेकरूपेव्युत्पत्त्यर्थमवधारणशब्देन तन्त्रेणोपादानात् । ततश्चायमर्थः सम्पद्यते–द्विविधरूपमवधारणं; ज्ञानरूपं प्राकट्यरूपञ्च । तत्रानधिगततथाभूतार्थगोचरत्वेन प्राकट्यरूपावधारणसाधकतमत्वं ज्ञानस्य प्रामाण्यं, तादृशार्थगोचरत्वेन ज्ञानरूपावधारणसाधकतमत्वं इन्द्रियादेः प्रामाण्यम् इति। साधकतमत्वञ्च तादृशार्थावधारणानुगुणः प्रमाणगतः शक्तिभेद एव। तथा चानधिगततथाभूतार्थावधारणं प्रमितिः, तत्साधनं प्रमाणं, तद्भावः प्रामाण्यमिति नाशब्दार्थत्वमपि । तदेवमनधिगततथाभूतार्थावधारणशक्तिः अनेवं-

---

१. वृत्त्याम. ङ. २. यतज्ञा. ग. ३. तत्फलम्. ग. ४. ले। तस्मात्. घ. ५. त्र विसंवादि. ग. ६. बन्ध. ग. घ. बद्धरू पीविशेषाङ्गकानु. ख. ङ. ७. थात्म्य. ग. ङ. ८. प्रतीतिसा. ग. ९. पप्रामाण्यव्यु. ख. ग. ङ. १०. धिगत. ग.

विधार्थावधारणशक्तिश्च प्रमाणाप्रमाणगोचरे प्रामाण्याप्रामाण्ये[1]। ते च तथाभूतोऽयमर्थ[2] इत्येवंरूपात् तथात्वावधारणादतथाभूतोयमर्थ इत्येवंरूपादतथात्वावधारणाच्च चकास्तः। तत्र तथाभूतार्थावधारणमर्थक्रियाज्ञानादिलक्षणपरानपेक्षत्वेन ज्ञानस्वरूपमात्राधीनमिति[3] तदवसेयं प्रामाण्यमपि स्वतोऽवसीयत[4] इत्युच्यते[5]। अतथाभावावधारणन्तु ज्ञानस्वरूपमात्रानधीनत्वेन[6] कारणदोषावगमादिलक्षणपरापेक्षमिति तदवसेयमप्रामाण्यमपि परतोऽवसीयत इत्युच्यते।

न चातथाभावावधारणमपि ज्ञानस्वभावाधीनम्; भ्रमबाधयोरसम्भवप्रसङ्गात्। न च शुक्तौ रजतमतथाभूतमिति गोचरयतो[7] ज्ञानस्य भ्रमत्वं बाधसम्भवो वा। तदेवमतथाभूतस्यापि तथाभूतत्वेनैव[8] ज्ञानस्वभावादवधारणम्, अतथाभूतत्वेन[9] तु कारणदोषावगमात् बाधकप्रत्ययाद्वा परत इति सिद्धम्। न चैवं इन्द्रियं स्वविषय[10]तथात्वावधारणायापि गुणज्ञानमर्थक्रियाज्ञानं वा परमपेक्षते ज्ञानम्; तथा सति तयोरपि स्वविषयतथात्वावधारणाय[11] परापेक्षत्वेन तत्राप्येवमित्यनवस्थापातात्। न चैवमर्थक्रियाज्ञानस्य स्वत एव स्वविषयतथात्वावधारणादवधृततथाभावेन तद्विषयेण साधनज्ञानविषयतथाभावावधारणं[12], तेन च

---

१. ण्ये तथा। ते तथाभूतोऽय. ग. ण्ये तथाभूतो. ङ. २. थारूपोऽय. क. ३. नत्वेनकारदोषावगमादि लक्षणपरापेक्षमिति तदवसेयमप्रामाण्यमपि परतोऽवसीयत इत्युच्यते। न चातथाभूत०. क. ४. वधीयत. ङ. ५. ते। कारणदोषावगमादि. घ. ६. त्राधीनत्वेन. ख. ङ. ७. पि तथात्वेनैव. ख. ग. पि अतथाभूतत्वेनैव ज्ञानस्वरूपावधारणम्. घ. ८. व ज्ञानवत् ज्ञानस्वभावस्याद. ग. ९. न कारण. ख. घ. ङ. १०. याव क. ११. यापि. ख. ग. १२. ज्ञाने विषयतथात्वावधारणम्. घ.

तत्प्रामाण्यावधारणात् परत एवाप्रामाण्यावगमः[1]। नचानवस्थापीति वाच्यम्; विशेषाभावात्। स्फुटाविकल्पत्वं विशेष इति चेत्, न; साधनज्ञानेऽपि साम्यात्। साधनप्रत्ययानन्तरजत्वं[2] फलप्रत्ययत्वञ्च विशेष[3] इति चेत्, न; स्वप्ने कामिनीरूपसाधनज्ञानानन्तरभुवः तत्परिरम्भलक्षणफलज्ञानस्य[4] स्वत एव स्वविषयतथात्वावधारकत्वेन स्वतःप्रामाण्यप्रसङ्गात्। अथ स्वप्ने सुखदुःखयोरेव फलत्वादेतयोश्च सतोरेव ज्ञानविषयत्वात्, फलज्ञानस्य स्वविषयतथात्वावधारणं प्रामाण्यञ्च स्वत एव। यद्येवम् अस्तु तर्हि फलज्ञानस्य[5] स्वविषयतथात्वावधारकत्वम्, अवधृततथात्वात्तु तद्विषयात् न साधनज्ञानविषयस्य तथात्वावधारणं युक्तम्; अतथाभूतादपि साधनज्ञानविषयात् कामिनीसङ्गमविभ्रमादिलक्षणात्[6] सुखदुःखादिरूपस्य फलस्योपपत्तेः[7]। अथोपप्लुतस्वप्नावस्थोत्पन्नफलप्रत्ययविषयतथात्वस्य व्यभिचारेऽप्यनुपप्लुतजागरावस्थोत्पन्नफलप्रत्ययविषयतथात्वादव्यभिचारिणः साधनज्ञानविषयतथात्वावधारणं, तर्हि दूरत्वादिषु, विषयदोषेषु तिमिरत्वादिषु करणदोषेषु, पारिप्लवादिषु मनोदोषेषु वा सत्सु जायमानस्य व्यभिचारेऽपि त्रिविधदोषाभावे जायमानस्य साधनज्ञानस्य स्वविषयतथात्वावधारणमस्तु कृतमितरापेक्षया। किञ्च फलज्ञानमिव साधनज्ञानमपि कुतः स्वविषयतथात्वं नावधारयति? सन्देहग्रस्तत्वादिति चेत्, किमिदानीं सर्वमेव साधनज्ञानं स्वविषयतथात्वमतथात्वञ्च घटयत् सन्देहरूपम्? यद्येवं कुतस्तर्हि साधनज्ञानस्य परतो

---

१. वावगमः. क. २. जन्यत्वं. घ. ३. षण. ख. ४. स्य विषयतथात्व. ग. ५. स्य विषयतथात्वावधारकमवधृततथात्वं तु विषयान्त. ङ. ६. ज्ञविभ्र. ङ. ७. स्योत्पत्तेः. ख. ग. ८. गरितात्व. ग. ९. स्तु, किमितरा. ग.

विषयतथात्वावधारणम्? अर्थक्रियाज्ञानादिति चेत्, न; तस्य स्वविषय-तथात्वमात्रव्यापारात्[1]। अथार्थक्रियाविषयादेव[2] ज्ञानादवधृततथात्वात् साधनज्ञानविषयतथात्वमनुमेयम्; तर्हि साधनज्ञानविषयतथात्वस्यार्थ-क्रियाज्ञानविषयतथात्वस्याप्यव्यभिचारावगमाय[3] प्रथमतः प्रमाणान्तरेण निश्चयो वाच्य इति सिद्धं साधनज्ञानस्यापि[4] स्वविषयतथात्वावधारकत्वम्। न च तत्राप्यविनाभावसापेक्षत्वम्; परस्पराश्रयप्रसङ्गात्। अतोऽभ्यास-दशापन्नस्वविषयतथात्वप्रतिबद्धरूपविशेषलिङ्गानुमेयं विषयतथात्वमित्य-पास्तम्; ज्ञानगतस्य तादृशरूपविशेषस्यादर्शनात्। उक्तेन क्रमेण व्याप्त्येवगमानुपपत्तेश्च। ततसिद्धं ज्ञानानि स्वविषयतथात्वावधारणे न परापेक्षाणीति।

नन्वेवं यदि ज्ञानानि स्वत एव स्वविषयमुपस्थाप्य तथात्वमवधार-यन्ति कुतस्तर्हि सन्देहः? उच्यते—न तावत्सर्वत्र[5] सन्देहः, त्रिविधदोषा-भावे ज्ञायमानेषु विषयेषु सन्देहस्यैवाभावात्। यत्रापि क्वचित् सन्देहः तत्रापि ज्ञानस्वरूपादेवं स्वविषयतथात्वावधारणं, किन्तु काचादिषु दोषेषु सत्सु शुक्तिकारजतादावतथाभूतेऽपि तथात्वावधारणदर्शनाद् भवति सन्देहः—किं दोषसन्निधेरतथाभूत एव तथात्वावधारणमिदं उत तथाभूत एव[6] इति। ततश्चातथाभूते एव तथात्वावधारणव्यापकं कारणदोषबाधप्रत्यययोः सद्भावं प्रयत्नेनापि जिज्ञासमानो यदि नाकलयेत् ततो योग्यानुपलम्भेन तदभावमवधारयंस्तव्याप्यस्यातथाभूत एव तथात्वावधारणस्याप्यभावमव-

---

१. पारत्वात्. ख. ग. २. यादेवाज्ञानादवधृत. ख. याज्ञानविषयादेवावधृत. ग. ३. स्याव्यभिचारावगमात् प्रथमतः. ग. ४. नस्यापि. ङ. ५. प्त्यनुगमानु. क. ६. तावदत्र सन्देहः. घ. ७. व विषय. ग. ८. एव तथात्वावधारण. क. ग.

धारयति। ततश्चासञ्जातशङ्कमिवोत्पन्नध्वस्तशङ्कमपि स्वत एव स्वविषयतथात्वावधारकम्। एवञ्च बाधकारणदोषयोरभावावगमस्याप्यतथाभावशङ्कोच्छेदमात्रव्यापारत्वात् सिद्धं स्वविषयतथात्वावधारणं परानपेक्षत्वलक्षणमनपेक्षत्वमपि। तस्मात् स्वशब्दस्यात्मीयववचनत्वेन ज्ञानस्वरूपाधीनात् तथात्वावधारणादवसीयमानं प्रामाण्यं स्वतोऽवसीयत इत्युक्तम्। नन्वेवमतथाभूतेऽपि तथात्वावधारणदर्शनात् कथं ततः प्रामाण्यानुमानम्? यथा बाष्पे धूमभ्रमदर्शनेऽपि धूमाद्धूमध्वजानुमानमित्यवगम्य तुष्यतु भवान्।

यत्पुनः प्रामाण्यं परतो ज्ञायते, अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत्, इत्यादि प्रामाण्यस्य परतोऽवगमसाधनम्; तदस्मन्मतेऽपि तथात्वावगमरूपात् परत एव तदवगतेरसिद्धसाधनं द्रष्टव्यम्।

ननु प्रामाण्यस्य ज्ञप्तावनपेक्षत्वेऽप्युत्पत्तौ सापेक्षत्वमेव। तथा च नैयायिका वदन्ति—यदि ज्ञानहेतुमात्राधीनं प्रामाण्यं भवेत्, तर्ह्यप्रमाणमपि प्रमाणमेव भवेत्; न हि तत्र ज्ञानहेतवो न सन्ति, तथा सत्यप्रमाणे ज्ञानत्वस्याप्यसम्भवप्रसङ्गात्। अथ दोषाभावस्य प्रामाण्यहेतुत्वात् सति दोषे तदभावान्नातिप्रसक्तिः, तर्हि दोषाभावमधिकमासाद्य प्रामाण्यमपि जायत इति कथं ज्ञानहेतुमात्रजत्वम्?

---

१. णे न परापेक्षणमनपेक्षत्वमपि. क. णे परानपेक्षलक्षणमनपेक्षत्वमपि. घ-णे परापेक्षत्वलक्षण. ङ. २. त् ततोऽप्रमाणमपि प्रमाणमेव भवेत्. ख. त् अप्रमाण. ङ. ३. नस्याप्य. क. घ. ४. प्यभावप्रसङ्गात्. ग. ५. ति च दोषे. ग. ६. मपि न जायत इति कथं ज्ञानहेतुत्वमात्र. ङ.

अथ दोषाभावस्य प्रामाण्यहेतुत्वेऽपि गुणस्य तदहेतुत्वात् तदभावेऽपि वेदानां स्वतः प्रामाण्यं, तर्हि गुणस्य प्रामाण्यहेतुत्वेन दोषाभावस्य तदहेतुत्वात् तद्भावेऽपि गुणाभावादप्रामाण्यं वेदानां स्वतः प्रसजेत् । नहि गुणदोषयोः प्रमाण्याप्रामाण्ये प्रत्यन्वयव्यतिरेकयोर्विशेषमुपलभामहे । तत्सिद्धमुभयमुभयस्मात् परत इति ।

अत्राभिधीयते—यत्कार्यगता हि या शक्तिः तस्या बाधकाभावे तत्कारणमात्राधीनत्वं, न हेत्वन्तराधीनत्वमित्येव न्याय्यम् ; अन्यथा दाहकत्वस्य वह्निकारणमात्रानधीनत्वेन हेत्वन्तराधीनत्वप्रसङ्गात् । एवञ्च तथाभूतार्थावधारकत्वशक्तिः प्रामाण्यं अतथाभूतार्थावधारकत्वशक्तिरप्रामाण्यं च ज्ञानगते इति तयोरपि ज्ञानहेतुमात्राधीनत्वे प्रामाण्यस्यैवाप्रामाण्यप्रसङ्गादेकं ज्ञानहेतुमात्राधीनम्, इतरत्तु हेत्वन्तराधीनमिति प्राप्तम् । तत्र च ।

प्रामाण्यमनुवृत्तत्वाल्लाघवाच्च स्वतो धियाम् ।
दोषान्वयित्वाद्वैचित्र्यादप्रामाण्यञ्च न स्वतः ॥

तद्धि तत्सामग्रीजन्यम्, यद्यस्यां सत्यामनुवर्तत एव । न चाप्रामाण्यं ज्ञानसामग्र्यां सत्यामनुवर्तते प्रमाणज्ञानेषु तददर्शनात् । अनुवर्तते तु प्रामाण्यमिदं रजतमित्यादिज्ञानेऽपि पुरोवर्तित्वैत्रिकोणत्वाद्यंशे तथाभूतार्थावधारकत्वलक्षणम् । न चैतावता प्रमाणाप्रमाणविभागभङ्गः ; केवलसत्यरूपस्य प्रमाणत्वं सत्यासत्यरूपस्य चाप्रमाणत्वमिति विभागात्, लाघवाच्च ज्ञानहेतूनां ज्ञानजनकत्व-

---

१. स्य हेतुत्वेऽपि. ङ. २. तदहेतुत्वेन. घ. ३. त् तद्भावेऽपि क. ४. तुत्वे दोषा. ग. ५. ण्यमपि. ख. ग. ६. त्राधी. ङ. ७. स्याप्रामा. ङ. ८. तत्र प्रामाण्य. ग. ९. त्वसत्वशुक्लत्वभास्वरत्वाद्यंशे. ग. त्वसत्वशुक्लभास्वरत्वाद्यंशे. घ. १०. प्रमाप्रमाणविभाग. क. प्रमाण्याप्रामाण्यविभाग. घ. ११. कैवल्यसत्यरूपस्य प्रमाणत्वं सत्यासत्यरूपस्य चाप्रमाणत्वमिति विभागात् ।

शक्तौ कल्प्यायां प्रमाणज्ञानानुगुणत्वेन कल्पने शक्यस्यैवाधिक्यं न शक्तेरिति लाघवम्। गुणदोषाभावयोरन्यतराधीनत्वे तु प्रामाण्यस्य ज्ञानहेतूनां ज्ञानजननशक्तिः, गुणदोषाभावयोरन्यतरस्य च प्रामाण्यजननशक्तिरिति शक्त्याधिक्यं भवेदित्यर्थः। अप्रामाण्यन्तु न ज्ञानहेतुमात्राधीनम्; दोषान्वयित्वात्। कामिलादौ दोषे सत्येव हि तद् भवति। न च गुणानां प्रामाण्यहेतुत्वात् गुणाभावे ज्ञानहेतुभ्य एवाप्रामाण्येमिति वाच्यम्; सत्यपि गुणे ज्ञानोत्पादनाय ज्ञानहेतूनामैवैकल्यात् तन्मात्रनिबन्धनस्याप्रामाण्यस्य प्रमाणेऽपि प्रसङ्गात्, वैचित्र्याच्च। सन्तमसे भूतले संयुक्तायामेकस्यामेव वारिधारायां स्रक्सर्परज्जुरूपेण अतथाभूतार्थावधारकत्वलक्षणस्याप्रामाण्यस्य वैचित्र्यात्तत्र तत्र विचित्रा दोषा एव तद्धेतवः, नैकरूपा चक्षुरादिका ज्ञानसामग्री; कार्यवैचित्र्यस्य कारणवैचित्र्यं विनानुपपत्तेरिति। स्यादेतत्—यदि ज्ञानहेतुमात्राधीनं प्रामाण्यं भवेद्, भवेत्तर्हि स्मृतेरपि प्रामाण्यम्। तन्न; प्रामाण्यशब्देनात्र प्रामाण्यावयवभूतस्य तथाभूतार्थावधारकत्वशक्तिमात्रस्यैवोपादानात्, तस्यैव च ज्ञानहेतुमात्राधीनत्वसमर्थनात्, अन्यथा नैयायिकमतेऽप्यप्रामाण्यस्य दोषहेतुत्वात्तदभावे स्मृतावप्रामाण्यासम्भवप्रसङ्गात्।

यत्पुनः प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् इत्यनुमानम्, तत् प्रमा गुणदोषाभावयोरन्यतराधीना

---

१. वात्. ग. घ.　२. तरस्य च प्रामाण्य. ङ.　३. ण्यज्ञानहे. ग.　४. न्तु. ज्ञान. ङ.　५. ण्यमपीति. ख.　६. मवैलक्षण्यात्. ग.　७. त्रस्यैव च ज्ञानहेतु. ग.　८. ण्यसम्भवप्र. ङ.　९. माणज्ञानहत्वेतरिक्त. ग.

न भवति ज्ञानत्वात् अप्रमावत्, इत्यनेन निर्विशेषणहेतुजत्वेन विशेषविषयत्वेन च शीघ्रप्रवृत्तेन बाधितविषयं[3] करणीयम्। अत उत्पत्तावपि ज्ञानहेतुमात्राधीनत्वात् स्वत एव प्रामाण्यम्, अप्रामाण्यन्तु दोषाधीनत्वात् परत इति सिद्धम्। सिद्धञ्च वेदानामपौरुषेयत्वेन गुणाभावेऽपि दोषाभावमात्रात् प्रामाण्यम्, इति सर्वमनवद्यम्।

इति स्वतःप्रामाण्यवादो नाम तृतीयवादः
समाप्तः।

[कालप्रत्यक्षतावादः।]

किं पुनः प्रमाणम्? अनधिगततत्त्वज्ञानं[3]मिति ब्रूमः। न चानधिगतगन्तुः प्रामाण्ये धारावाहिकेषु ज्ञानेषु[4] पूर्वगृहीतार्थगोचरत्वादुत्तरेषामप्रामाण्यम्; तत्रापि कालभेदस्याधिकस्य वेद्यत्वात्। न च कालभेदस्यातिसौक्ष्म्यादनवगमः; तदवगमपरिपन्थिसौक्ष्म्यासिद्धेः। उपाधिसौक्ष्म्यनिबन्धनत्वादौपाधिकसौक्ष्म्यस्य[5], उपाधेश्च सूक्ष्मस्य प्रत्यक्षस्याग्रे वक्ष्यमाणत्वात्। न च कालो न प्रत्यक्षः; अमनस्त्वे सति विभुत्वाद्, आत्मवदेवेति तत्प्रत्यक्षत्वसाधनात्[6]। किञ्च यदि कालो न प्रत्यक्षः स्यात्, न स्यादेव तर्हि, तत्सद्भावावेदकप्रमाणानुपपत्तेः।

---

१. यं पराकरणीयम्. ख. ङ. २. षान्वयित्वात्. क. ३. नं प्रमाणमिति ब्रूमः. ग. ४. षु परिगृहीतार्थ. घ. ५. स्य उपाधेश्च प्रत्य०. क. स्य उपाधेश्चासूक्ष्मस्य प्रत्य०. घ. ६. त्वसाधनत्वात्. क.

स्यादेतत्—परापरव्यतिरेकयौगपद्ययौगपद्यचिरक्षिप्रप्रत्ययरूपैर्लिङ्गैरनुमेयः कालः। तथाहि—युवस्थविरयोर्दिङ्निबन्धनपरत्वापरत्वे[3]प्रत्ययेन परत्वापरत्वदर्शनात् निमित्तं विना च तदनुपपत्तेः, इनपरिवृत्तीनाञ्च सम्बन्धाभावेन तन्निमित्तत्वासम्भवात्, अविभोश्च पिण्डाभ्यामिनपरिवृत्तिभिश्च सह सम्बन्धासम्भवात्, इनपरिवृत्तिसम्बद्धं पिण्डद्रव्यसंयुक्तं विभुद्रव्यमेव निमित्तमङ्गीकरणीयम्। न च तदात्माकाशयोरन्यतरत्; आत्माकाशाविनपरिवृत्तीनां पिण्डेन सह सम्बन्धोत्पादकत्वेन परत्वापरत्वनिमित्ते न भवतः विशेषगुणयोगित्वाद् घटवादिति बाधकसम्भवात्। न च दिशो निमित्तत्वं; तन्निबन्धनपरत्वापरत्ववैपरीत्यात्। अतः पारिशेष्यात् कालसिद्धिः इति। उच्यते—

असिद्धेः परिशेषस्य युक्तं कालस्य कल्पनम्।
न परत्वापरत्वाभ्यां यौगपद्यादिभिर्न च॥

स्यादेतदेवं यदि परत्वापरत्वाभ्यां कालपरिशेषः सिध्येत्, नचासौ सिध्यति; पिण्डाश्रितयोः परत्वापरत्वयोरिनपरिवृत्तीरेव निमित्तीकृत्योत्पत्तेरुपपत्तेः। असम्बद्धस्य निमित्तत्वेऽतिप्रसङ्गात् सम्बन्धाय कालापेक्षेति चेत्, न; सम्बद्धस्य निमित्तत्वेऽपि कालस्य विश्वसम्बन्धित्वेनातिप्रसङ्गस्य तादवस्थ्यात्। अथ सम्बद्धस्यापि शक्तस्य निमित्तत्वान्नातिप्रसङ्गः; तर्ह्यसम्बद्धस्यापि शक्तस्य निमित्तत्वमिति कुतोऽति-

---

१. व्यतीत. क. व्यतिकर, ख. ङ. २. त्वव्यत्य. क. ३. त्तेः इतीनपरि. ख. ग. घ. ङ. ४. म्बन्धकं पिण्ड. घ. म्बन्धं पिण्ड. ङ. ५. ङसंयुक्तं. ग. ६. रम्. ग. ७. म्बन्ध. ख. ग. घ. ङ. ८. म्बन्ध. ख. ग. घ. ङ. ९. म्बन्ध. ग. घ. ङ. १०. म्बन्ध. ग. घ. ङ.

प्रसक्तिः ? अथान्यत्र सम्बद्धस्यैव निमित्तत्वदर्शनात् इहापि व्याप्तिबलेन सम्बन्धाय द्रव्यान्तरकल्पनम्, तर्हि यस्मै सम्बन्धाय द्रव्यान्तरं कल्प्यं तस्य सम्बन्धस्यैवान्तरङ्गत्वात् कल्पनमस्तु किं सम्बन्धिद्रव्यकल्पनया ? सम्बन्धस्य सतस्संयोगसमवायादिष्वेवान्तर्भावात्, अनन्तर्भावे वा तत्त्वानुपपत्तेः पिण्डेन सहेनपरिवृत्तीनां तेष्वन्यतमस्याप्यसम्भवात् सम्बन्धकल्पनं प्रमाणबाधितमिति चेत्; तर्हि द्रव्यस्य सतः पृथिव्यादिष्वेवान्तर्भावात्, अनन्तर्भावे वा द्रव्यत्वानुपपत्तेर्द्रव्यकल्पनमपि प्रमाणबाधितमेव । भवतु वा द्रव्यकल्पनम्, तथापि कथमात्माकाशातिरिक्तसिद्धिः ? तयोर्विशेषगुणयोगित्वेन निमित्तत्वबाधादिति चेत् न, कार्यान्तरेऽप्यनिमित्तत्वप्रसङ्गात् । इनपरिवृत्तीनां पिण्डेन सह सम्बन्धोत्पादकत्वलक्षणकार्यविशेषे घटादेरिव विशेषगुणयोगिनो निमित्तत्वं बाधितमिति चेत्, तर्हि द्रव्यमात्रस्यापि घटादिवन्निमित्तत्वं बाधितमिति कथं द्रव्यान्तरसिद्धिः ?

यत्पुनर्युगपदादिप्रत्ययाः काले लिङ्गमिति । तत्र प्रष्टव्यम्— किमसौ कालविषयाः अन्यविषयो वेति । कालविषया अपि किमीक्षजन्या लिङ्गजन्या वेति । न तावदीक्षजन्याः कालविषयाश्च; कालस्य प्रत्यक्षत्वप्रसङ्गात् । नापि कालविषया लिङ्गजन्याः; लिङ्गस्य युगपदादिप्रत्ययरूपत्वेनात्माश्रयप्रसङ्गात् अथान्यविषयाः कथन्तर्हि कालसिद्धिः ? चक्षुरादिवन्निमित्तत्वेनेति चेत् न; परत्वापरत्वाभ्यामिवोक्तेन क्रमेण

---

१. म्बन्ध. ग. घ. ङ. २. त्मादिव्यति. ख. ङ. ३. न्धोपपादकत्व. ग. ४. या वा कालविषया अपि. ख. ग. ५. मक्षि. ख. ङ. ६. दक्षि. ख. ङ. ७. वत्तन्नि. ग.

युगपदादिप्रत्ययैरपि कालैपरिशेषस्य दुष्करत्वात् । अनेनैव क्रमेण दिश्योऽपि पूर्वापरादिप्रत्ययानुमेयत्वं निरसनीयम् ।

यत्तु स्पर्शवत्त्वे सति महत्त्वं बाह्यप्रत्यक्षत्वस्य व्यापकमिति तन्निवृत्तौ बाह्यप्रत्यक्षत्वस्यापि निवृत्तिः, तथा दिक्कालावप्रत्यक्षौ विशेषगुणशून्यद्रव्यत्वात् मनोवत् इत्यादि; तदुक्तेन क्रमेण दिक्कालयोः अप्रत्यक्षत्वे स्वरूपस्यैवासिद्धेः तत्स्वरूपसिद्ध्यन्यथानुपपत्तिप्रसूतार्थापत्ति-बाधितविषयत्वादसाधनमेव ।

स्यादेतत्—अस्तु कालः प्रत्यक्षः, तथापि तस्यैकत्वान्नाधिक-विषयत्वम् । तन्न; कालभेदस्य ग्रहणात् । न चोपाध्यग्रहे कथं तद्ग्रह इति वाच्यम्; उपाधेः प्रकाशस्य प्रत्यक्षेण ग्रहणात् । अस्ति हि भवतामस्माकञ्च ज्ञानरूपः प्राकट्यरूपो वा प्रत्यक्षः प्रकाशः ।

स्यादेतत्—स्फटिके लौहित्यस्येव कालभेदस्याप्यतात्त्विकत्वात् तदवगाहिनां भ्रान्तित्वप्रसङ्ग इति । तदयुक्तम्; उपाधिद्वारेण भेदस्य कालसम्बन्धितामात्रेण प्रतिभासात्, तावन्मात्रेण च सत्यत्वात् । स्फटिके तु लौहित्यस्य तादात्म्यमसदेवेति तदवभासो भ्रान्तिः । तत्राप्युपाधिद्वारा लौहित्यस्य सम्बन्धमात्रमभ्रान्तमेवेति ।

---

१. लविशे. ख. ङ. २. यत्पुनः स्पर्श. ग. ३. क्षव्याप. ग. ४. न्यत्वात्. ङ. ५. तत्सिद्ध्यन्य. ख. ङ. ६. त्तिबाधितविषयत्वात्. घ. ७. त्वम्। न; औपाधिकभेदस्य ग्रहणात्. ख. ङ. त्वम्। तन्न; औपाधिकभेदस्य ग्रहणात्. ग. त्वम्। तन्न, औपाधिकभेदस्य ग्रहणात्। अस्ति हि भवतामस्माकञ्च. घ. ८. कलौहित्य. ग. ९. न्मात्रस्य च. ग. न्मात्रे च. घ. १०. भ्रान्तः. क. ग. घ. ११. न्धमभ्रान्तमेव। यत्तु. ख. ङ. न्धमभ्रान्तमेवेति. घ.

यत्तु यत्र नित्यानां प्रथममेव कालत्रयसम्बन्धित्वमवगतं तत्र कथं पुनरुत्तरेषां प्रामाण्यमवगतमिति। तन्मन्दम्; उक्तेन क्रमेण तत्रापि तत्तदुपाधिसम्बन्धभेदेन कालभेदानुप्रवेशात्।

यत्पुनरगृहीतग्राहिणः प्रामाण्ये अगृहीते कालभेद एव प्रामाण्यं, न गृहीते वस्तुरूप इति। तदयुक्तम्; न ह्यनधिगतपदेनाधिगतस्पर्शो व्यावर्त्यः किन्तु, अनधिगतास्पर्शः। स च प्रकृतेऽपि नास्तीति कथमप्रामाण्यम्?

इति कालप्रत्यक्षतावादो नाम चतुर्थो वादः
परिसमाप्तः।

[अन्यथाख्यातिवादः।]

स्यादेतत्—अस्तु स्मृत्यनुवादयोर्व्युदसनायानधिगतपदं सार्थं, तत्त्वपदन्तु व्यर्थमेव; अतत्त्वविषयज्ञानस्याभावात्। शुक्तौ रजतार्थि-प्रवृत्त्यन्यथानुपपत्त्या हि तत् कल्प्यं, सा च प्रवृत्तिर्भेदाग्रहादेवोपपन्ना। भेदाग्रहश्च यद्रूपं ज्ञातं सत् रजतार्थिनः शुक्तौ प्रवृत्तिं वारयति तस्य विशेषरूपस्याग्रहे सति साधारणाकारग्रहः, स च सत्यरजतज्ञान-सारूप्यात् पुरोवर्त्तिनि रजतार्थिनं प्रवर्तयति। न च भेदाग्रहात् प्रवर्तक-

---

१. तदुपाधि. ख. २. यज्ञानाभवात्. घ. ३. तार्थप्र. ख. ४. नि प्रव. ङ.

ज्ञानसारूप्यान्निवृत्तिरपि स्यात्, इति वाच्यम्; यतो न प्रवर्तकज्ञान-सारूप्यं प्रवृत्तिहेतुः किन्तु प्रवृत्तिहेतुसारूप्यम्। प्रवृत्तिहेतुश्च भेदाग्रहः; स चोभयत्रापि सरूप एव। नचैवमभेदाग्रहो निवृत्तिहेतुः; येन तत्सारूप्यान्निवृत्तिरपि स्यात्, किन्तु भेदग्रहः, स च प्रकृते नास्तीति न युगपत् प्रवृत्तिनिवृत्तिचोद्यप्रसङ्ग[१] इति[२]। तदयुक्तम्—

ग्रहणादग्रहाद्वाऽपि न भेदाभेदयोर्यतः।
निवृत्तिस्सत्यरजते युज्यते रजतार्थिनः॥

यदि भेदाग्रहात् प्रवृत्तिः कुतस्तर्हि निवृत्तिरित्युच्यताम्? यदि भेदग्रहात्, न तर्हि सत्यरजते नेदं रजतमिति भ्रान्तो निवर्तेत। नहि तत्र रजताद् भेदो गृह्यते[३]; तथा सत्यन्यथाख्यातिप्रसङ्गात्।

अथ भेदग्रहाभावेऽपि[४] भेदावगममात्रान्निवृत्तिः, अस्ति च तत्र भेदावगमः स्मृतिरूप इति। तर्हीदं रजतमिति प्रवर्त्तमानोऽन्तरा शुक्तिशकलं स्मरन् पश्यन् वा न प्रवर्तेत; शुक्तिकात्वस्य भेदस्यावगमात्। अथ निवृत्तिविषयाधिकरणत्वेन भेदकधर्मावगमो निवृत्तिहेतुः; तर्हि निवृत्तिभ्रमान्न निवर्तेत; तत्र निवृत्तिविषयाधिकरणत्वेन भेदक-धर्मस्यानवभासात्, अवभासे[५] वा विपरीतख्यातिप्रसङ्गात्।

यत्पुनर्निवृत्तिविषयेण भेदकधर्मस्य निरन्तरभानं निवृत्तिहेतु-रिति, तदत्रैवोपरिष्टान्निराकरिष्यामः। तत्सिद्धं[६] न भेदग्रहान्निवृत्ति-रिति।

---

१. त्तिचोद्यस्यावकाश इति. ङ. २. द्यस्यावकाश इति. ख. ग. ३. ह्येत. ग. ४. अभेदग्रहाभावेऽपि. घ. ५. तदवभासे वा. ग. ६. द्धं भेदग्रहो न निवृत्तिहेतुरिति. क.

स्यादेतत्— माभूद् भेदग्रहान्निवृत्तिरिति, भेदाग्रहादेव तु भविष्यति। न च प्रवृत्तिनिवृत्तिसाङ्कर्यम्; इष्टभेदाग्रहस्य प्रवर्तकत्वमनिष्टभेदाग्रहस्य तु निवर्तकत्वमिति विवेकादिति। तदयुक्तम्; शुक्ताविष्टाद्रजताद्भेदाग्रहतः प्रवर्तमानस्यानिष्टादरजतादपि भेदाग्रहतो निवृत्तेरपि प्रसङ्गात्। न हि तत्रारजताद् भेदो गृह्यते; तथा सत्यन्यथाख्यातिप्रसङ्गात्। अनिष्टमवगम्य तेन भेदाग्रहो निवृत्तिहेतुः। प्रकृते चानिष्टस्यारजतस्यानवगमान्न तेन भेदाग्रहो निवृत्तिहेतुरिति चेत् न; शुक्तिं पश्यतः स्मरतो वा शुक्त्यन्तरे रजतमिति भ्रान्तस्य निवृत्तिप्रसङ्गात्। निवृत्तिविषयाधिकरणत्वेनानिष्टमवगम्य तेन भेदाग्रहो निवृत्तिहेतुरिति चेत्, न; निवृत्तिभ्रमे तदसम्भवात्। सम्भवे वा विपरीतख्यातिप्रसङ्गात्। निवृत्तिविषयेण निरन्तरत्वेनानिष्टमवगम्य तेन भेदाग्रहस्य निवर्त्तयितृत्वमग्रे निराकरिष्यामः। तत्सिद्धं भेदाग्रहो न निवृत्तिहेतुरिति।

यत् पुनरभेदग्रहस्य निवृत्तिहेतुत्वं, तदिष्टेनाभेदग्रहस्य निवृत्तिविरोधित्वादनिष्टेनाभेदग्रहस्यैव निवृत्तिभ्रमेष्वसम्भवादनाशङ्कनीयमेव।

ननु मा भूद् भेदग्रहस्य भेदाग्रहस्य वा निवृत्तिहेतुत्वं, मा च भूदभेदग्रहस्य; तथाप्यभेदाग्रहान्निवृत्तिरस्तु। मैवम्; शुक्तौ रजताद् भेदाग्रहतः प्रवर्तमानस्यान्यथाख्यातिभयादभेदोऽपि न भासत इति युगपत् प्रवृत्तिनिवृत्तिचोद्यप्रसङ्गात्। अतस्सत्यरजते रजतार्थिनो निवृत्तिर्न भेदग्रहात्, नापि भेदाग्रहात्, न तरामभेदग्रहात्, न तमामभेदा-

---

१. न प्र. ङ. २. स्याव. क. ३. त्। विषयेण निरन्तरत्वेनानि. ख. ग. ४. स्य च नि. ङ. ५. वान्नाशङ्कनीयमेव, ग. ६. त्तिप्रसङ्गात्. ख. ग. ङ. ७. त् न भेदाग्रहात्. क.

ग्रहादिति, तदर्थमन्यथाज्ञानं कल्प्यम्। एतेनासंसर्गाग्रहस्य प्रवर्त्तकत्वमपि तत्र तत्र पूर्वोक्तव्यभिचारैरेव निवृत्तिहेतुत्वेनान्यस्य निरूपयितुमशक्यत्वात्[1], संसर्गाग्रहस्य निवृत्तिहेतुत्वमापाद्य पूर्ववद्युगपत् प्रवृत्तिनिवृत्तिचोद्यप्रसक्तेरपास्तं वेदितव्यम्।

अथोच्येत रूपरूपिनिरन्तरभानं प्रवृत्तिनिवृत्त्योर्हेतुः, इष्टरूपनिरन्तरभानात् प्रवृत्तिः, अनिष्टरूपनिरन्तरभानान्निवृत्तिरिति। तदयुक्तम्; पुरोवर्तिनोश्शुक्तिरजतयोर्युगपदक्षसन्निकर्षे सति शुक्तिरजते इत्युभयालम्बनत्वेनोदीयमानाज्ज्ञानात् शुक्तावपि प्रवृत्तिप्रसङ्गात्। अस्ति हि तत्र रजतजातेः स्वव्यक्त्येव शुक्तिव्यक्त्यापि निरन्तरभानं, तथापि शुक्तिव्यक्ते रजतजातेश्चान्तरा शुक्तिजातिरजतव्यक्त्योरपि भानान्निरन्तरभानाभाव इति चेत्, न; ज्ञानस्यैव भानत्वादेकत्र च ज्ञाने भानक्रमानुपपत्तेः। शुक्तिव्यक्तेः स्वजातिनिराकाङ्क्षत्वाद्रजतजातेश्च स्वव्यक्तिनिराकाङ्क्षत्वान्न परस्परसाकाङ्क्षत्वम्। परस्परसाकाङ्क्षरूपरूपिनिरन्तरभानञ्च प्रवृत्तिहेतुरिति चेत्, किन्तर्हि शुक्तिकारजतज्ञाने परस्परसाकाङ्क्षत्वन्नाम? किं रजतजातेश्शुक्तिव्यक्तेश्च शुक्तिव्यक्तिं रजतजातिञ्चानवगम्य स्वावगमाभावः? किं वा व्यक्तिमात्रं जातिमात्रञ्चानवगम्य? यद्वा स्वसम्बन्धितया व्यक्तिं[2] स्वसम्बन्धितया जातिञ्चानवगम्येति। न प्रथमः, न हि रजतजातिः शुक्तिव्यक्तिं रजतजातिञ्चानवगम्य नावगम्यते; तथा सति सत्ययोरपि शुक्तिरजतयोः परस्परानवगमेनावगमप्रसङ्गात्[3]। नापि द्वितीयः; शुक्तिरजते इत्युभया-

---

१. त् असंसर्गा. ङ. २. क्तिं रजतस्य सम्ब. ग. ३. गमप्रसङ्गात्. क.

लम्बनज्ञानेऽपि रजतजातेश्शुक्तिव्यक्तेश्च व्यक्तिमात्रं जातिमात्रञ्चानवगम्यावगमाभावेन परस्परसाकाङ्क्षत्वं निरन्तरभानञ्चाप्यस्तीति शुक्तावपि प्रवृत्तिप्रसङ्गात्। नापि तृतीयः। नहि शुक्तिरजतज्ञाने रजतजातिः शुक्तिव्यक्तिश्च स्वसम्बन्धितया व्यक्तिं स्वसम्बन्धितया जातिञ्चानवगम्य नावगम्येते ; भवतां तथा सत्यन्यथाख्यातिप्रसङ्गात्।

एतेन रजतजातेः शुक्तिव्यक्तेश्च स्वरूपेणापि परस्परसाकाङ्क्षत्वं निरस्तं वेदितव्यम्।

स्यादेतत्—निरन्तरभानमेव प्रवृत्तिहेतुः। न च पूर्ववदुभयालम्बनज्ञाने शुक्तावपि प्रसङ्गः; तत्र भेदस्याऽपि गृहीतत्वात्, भेदाग्रहसहितश्च निरन्तरभानं प्रवृत्तिहेतुरिति। यद्येवमुभयालम्बनज्ञानाद्रजतेऽपि न प्रवर्तेत; शुक्तित्वस्य भेदस्यापि ग्रहणात्। अथ व्यक्त्यन्तरगोचरतया भेदग्रहेऽपि न व्यवहारविषयव्यक्तिगोचरतया तद्ग्रहः, तत्रैव च भेदग्रहो निवृत्तिहेतुरिति। यद्येवं किमिदं तद्गोचरत्वम्? तत्रैव चेत्, किं तत्सम्बन्धित्वं तत्तादात्म्यं वा? न चोभयमपि व्यवहारविषयेण भेदस्य शक्यग्रहम्; समवायस्य भवतामप्रत्यक्षत्वात् तादात्म्यस्य चाभावात्। अस्तु वा तादात्म्यसमवाययोरन्यतरग्रहः तथापि यदि व्यवहारविषयेण भेदकधर्मस्य तादात्म्यसमवाययोरन्यतरग्रहणान्निवृत्तिः, तर्हि सत्यरजते नेदं रजतमिति न निवर्तेत। न हि तत्रारजतत्वस्य भेदस्य

---

१. न्विव्यक्ति. ख. ग. २. न्विजातिज्ञा०. ख. ग. ३. म्यते. ख. म्येत. घ. ४. अथ व्यक्तन्तरगोचरतया तद्ग्रहः तत्रैव च भेदग्रहो निवृत्तिरिति। यद्येवं. ग. ५. ये भेदक. ख. ङ. यभेदक. ग. ६. ग्रहान्नि. ख. ग. घ. ङ. ७. तत्र रजतत्वस्य. ग.

रजतव्यक्तौ[1] तादात्म्यसमवाययोरन्यतरग्रहस्सम्भवति; भवतामन्यथा-ख्यातिप्रसङ्गात्। अथ तत्रानिष्टरूपस्य भेदकधर्मस्य व्यवहारविषयेण निरन्तरभानमात्रन्निवर्तकं, तर्हि शुक्तिरजते इत्युभयालम्बनवेदने शुक्ति-जातेरपि व्यवहारविषयेण निरन्तरभानमात्रान्न रजतेऽपि प्रवृत्तिः स्यात्। अथ व्यवहारविषयेण निरन्तरत्वेनानिष्टमवगम्य तेन तस्य भेदाग्रहो निवृत्तिहेतुः[2]। प्रकृते च रजतत्वभेदोऽपि गृह्यत इति न निवृत्तिः। तर्ह्युभयालम्बनज्ञानाच्छुक्तेरपि न निवर्तेत; रजतत्वस्य[3] भेदस्यापि ग्रहणात्। अतो निरन्तरभानं प्रवृत्तिहेतुरिति रिक्तं वचः[4]। किञ्च यदि ग्रहणस्मरणरूपं ज्ञानद्वयमिदं, तर्हि स्मरणं स्वविषय एवेच्छाञ्जनयेत्, सा च स्वविषय एव प्रयत्नं, स च स्वविषय एव स्पन्दमिति कुतः पुरोवर्तिनि प्रवृत्तिः? न चेदंमिति ग्रहणात्; अन्यत्रापीदमिति ग्रहणमात्रेण[6] सर्वादावपि प्रवृत्ति-प्रसङ्गात्।

अथेदंमिति ग्रहणेन निरन्तरभानमगृहीतभेदं[7] वा रजतस्मरणमेव पुरोवर्तिनीच्छाप्रयत्नावुपजनय्य[8] प्रवर्तयतीति[9] मतम्। तन्न; न हि निरन्तर-भानात् भेदाग्रहाद्वा[10] वस्तुसामर्थ्यस्याऽन्यथाभावः। न हि माषबीजं मुद्गबीजेन[11] निरन्तरभानं[12] अगृहीतभेदं[13] वा मुद्गाङ्कुराय प्रभवति। तस्माद्य-द्विषयिणी प्रवृत्तिः तद्विषयिण्येवेच्छा, यद्विषयिणी चेच्छा तद्विषयमेव तद्धेतुभूतज्ञानमिति बलाद्रजतज्ञानस्य शुक्तिविषयत्वं सिद्धम्। किञ्च यदि शुक्तिरजतादौ भेदाग्रहान्निरन्तरभानाद्वा विशिष्टज्ञानमन्तरेणापि

---

१. व्यक्तेः. ग. २. तेऽपि. ग. ३. तस्य. ख. ग. ङ. ४. चः। किञ्च ग्रह. क. चः। यदि ग्रह. ग. ५. दं मति. ग. ६. ण गवादावपि. घ. ७. दम्मति. क. ८. त्य निवर्तयतीति. ग. ९. ति। तन्न. घ. १०. दग्र०. घ. ११. तं. क. १२. दं यथामुद्गाङ्कराय. ख. १३. द्गान्तराय. क.

विशिष्टव्यवहारसिद्धिः, तर्हि पदस्मारितानां[1] पदार्थानां परस्परं भेदाग्रहान्निरन्तरभानाद्वा वाक्यार्थेषु विशिष्टव्यवहारः सिध्यति, सिध्यति च व्याप्तलिङ्गदर्शनस्मारितानां धर्माणां धर्मिभिर्भेदाग्रहान्निरन्तरभानाद्धानुमेये विशिष्टव्यवहार इति कृतं शब्दानुमानकल्पनव्यसनेन।

यत्पुनर्व्यवहारमात्रं प्रति भेदाग्रहस्य निरन्तरभानस्य वा हेतुत्वेऽप्यसाधारणं विसंवादिरूपव्यवहारविशेषं प्रत्यसाधारणं विशिष्टज्ञानमेव[2] हेतुः, विसंवादिनं प्रति तु भेदाग्रहो निरन्तरभानं वा हेतुरिति। तदयुक्तम्; व्यवहारमात्रं प्रति भेदाग्रहस्य निरन्तरभानस्य वा हेतुत्वे व्यवहारविशेषं प्रत्यपि तद्विशेषस्यैव हेतुत्वानतिवर्तनात्। न ह्यङ्कुरमात्रं प्रति बीजमात्रस्यैव[3] हेतुत्वेऽङ्कुरविशेषं प्रत्यपि तद्विशेषं विहायान्यस्य[4] हेतुत्वं सम्भवति। अतो यत्रासत एव भेदस्याग्रहणं निरन्तरयोर्वा अनिरन्तरभानं तत्राविसंवादिव्यवहारः। यत्र तु दोषवशात् सत एव भेदस्याग्रहणं अनिरन्तरयोर्वा निरन्तरभानं तत्र विसंवादिव्यवहार[5] इति नाविसंवादिव्यवहाराय विशिष्टज्ञानं कल्प्यम्[6]। अथान्यत्राविसंवादिव्यवहारस्य विशिष्टज्ञानपूर्वकत्वव्याप्तिदर्शनात् तद्बलेन तदनुमानं, तर्हि व्यवहारमात्रस्याप्यन्यत्र[7] विशिष्टज्ञानपूर्वकत्वव्याप्तिदर्शनात् तद्बलेन शुक्तिकारजतादावपि विशिष्टज्ञानानुमानात् सिद्धमन्यथाज्ञानम्। प्रयोगश्च भवति, विवादाध्यासिता प्रवृत्तिः स्वविषयरजतज्ञानपूर्विका रजतसाधनज्ञानानधीनत्वे सति रजतार्थिप्रवृत्तित्वात् या उक्तसाधना सा उक्तसाध्या यथा सत्यरजतज्ञानपूर्विका प्रवृत्तिरिति।

---

१. रभे. क. १. त्वेऽसाधारणविसं. ङ. ३. त्रस्य हेतुत्वे. ख. ग. ङ. ४ प्रति बीजविशेषं विहायान्यस्य. ख. ग. ङ. ५. हाराय विशिष्ट. ङ. ६. ल्प्यम्। तथान्य. क. ७. न्यत्रापि विशि. ङ.

यत्त्वन्यथाख्यातिपक्षे तदाशङ्क्या नाश्वास इति। तन्मन्दम्; भेदाग्रहपक्षेऽपि भेदाग्रहशङ्क्याऽनाश्वासस्य साम्यात्। न चासत्ख्याति-प्रसक्तिः; संसर्गमात्रस्यासतः ख्यातिरन्यथाख्यातिः संसर्गिणोरप्यसतोः ख्यातिरसत्ख्यातिरिति विवेकात्।

यत्तु विवादपदं यथार्थं ज्ञानत्वात् उभयसिद्धवत् इत्यादि, तदुक्तेन क्रमेण रजतार्थिप्रवृत्त्यन्यथानुपपत्तिप्रसूतार्थापत्तिबाधितविषयत्वादसाधन-मेव।

यत्पुनर्विषयत्वाऽन्यथाकरणेन रजतज्ञानस्य शुक्तिकाविषयत्वन्नाम रजतप्रतिबद्धव्यवहारानुगुणस्य शुक्तिकाप्रतिबद्धव्यवहारानुगुणत्वं, तच्च प्रतीतिविरुद्धमिति। तदस्मन्मते विषयत्वस्यान्यस्यैवार्थगतस्य समर्थ-नादपाकरणीयम्।

यत्पुनरिन्द्रियाणां यथार्थज्ञानहेतुत्वादोषाणाञ्च कार्यविहतिमात्र-परत्वादन्यथाज्ञानसामग्र्यभाव इति। तन्मन्दम्; भवन्मतेऽपि भेदा-ग्रहस्याऽन्यत्राबाध्यव्यवहारं प्रत्येव हेतुत्वमिति बाध्यव्यवहारं प्रत्यहेतुत्व-प्रसङ्गात्। अथान्यत्र तथादर्शनेऽपि व्यवहारान्यथानुपपत्त्या दोषसहायत्व-विशेषमुपधाय भेदाग्रहस्यैव हेतुत्वं कल्प्यम्; तर्ह्यस्मन्मतेऽपि प्रमाणसिद्ध-विपरीतज्ञानान्यथानुपपत्त्यान्यत्रेन्द्रियाणां यथार्थज्ञानजननस्वभावत्वेऽपि दोषोपहितानामयथार्थज्ञानजननसामर्थ्यं कल्प्यम्। किञ्च दग्धाद्बीजात् कदलीकाण्डोत्पत्तेः दोषस्य कार्यजनकत्वमपि द्रष्टम्।

---

१. बन्ध. क. ग. २. बन्ध. क. ग.

यत्त्वत्र दाहस्य वेत्राङ्कुरं प्रति दोषत्वेऽपि कदलीकाण्डं प्रति गुणत्वमेवेति परिहृतं, तद्दोषाणां यथार्थज्ञानं प्रति दोषत्वेऽप्यन्यथाज्ञानं प्रति गुणत्वमेवेति तुल्यमिति द्रष्टव्यम्। एवमेव स्थाणुर्वा पुरुषो वेत्यनियतकोटिद्वयविषयविशिष्टव्यवहारस्यानियतकोटिद्वयविषयविशिष्टज्ञानमन्तरेणानुपपत्तेः संशयज्ञानमपि कल्प्यम्। अतस्संशयविपर्ययव्युदासार्थं तत्त्वपदमपि सार्थम्। संशयविपर्ययसाधनादेवातिव्यापित्वेनानुभूतेः प्रमालक्षणत्वमप्यपास्तम्। अविसंवादित्वमपि प्रत्यक्षपरीक्षावसरे निराकरिष्यामः। तत्सिद्धमनधिगततत्त्वज्ञानं प्रमाणमिति।

इत्यन्यथाख्यातिवादो नाम पञ्चमवादः
परिसमाप्तः।

[साक्षात्प्रतीतिनिरासवादः।]

किं पुनः प्रत्यक्षम्? केचिदाहुः - साक्षात् प्रतीतिः प्रत्यक्षमिति। तदयुक्तम्; साक्षात्त्वस्यानिरूपणात्। स्वकालाकलितवस्त्ववभासित्वं साक्षात्त्वमिति चेत्, किं पुनस्तत्? यदि स्वकाल एव यत् सत् तदवभासित्वं, तर्हि घटज्ञानस्य स्वकालात् प्रागूर्ध्वञ्च घटस्थितेरसाक्षात्त्वप्रसङ्गः। अथ स्वकाले सदेव यत् तदवभासित्वं, तर्हि नित्यवस्तुविषयाणामनुमानादीनामपि साक्षात्त्वप्रसङ्गः।

---

१. प्ययथार्थज्ञानं प्रति. घ. २. यविशिष्ट. ख. घ. ३. म्। अतः संशय. घ. ४. ज्ञात्. क. ५. मादीनामपि. ङ.

स्यादेतत्— अनुमानादीनां स्वकाले सत एवार्थस्यावभासकत्वं न स्वाभाविकं, भूतभविष्यतोरप्यनुमानाद्यवभास्यत्वात्। स्वभावाधीनश्च तादृशार्थाऽवभासकत्वं साक्षात्त्वमिति चेत्, यद्येवं कुतोऽयं विवेकः इह स्वभावाधीनमिह नेति? यत्रानुमानादौ विषयस्याहेतुत्वं तत्र न स्वभावाधीनं, यत्र तु हेतुत्वं तत्राऽसतो हेतुभावाभावात् सत एवार्थस्यावभासकत्वं स्वभावाधीनमिति चेत्, तर्हि स्वात्मन्यसाक्षात्त्वप्रसङ्गः; स्वं प्रति स्वस्य विषयत्वहेतुत्वयोरनभ्युपगमादयुक्तत्वाच्च।

स्वकालविशिष्टार्थावभासकत्वं साक्षात्त्वमिति चेत्, न; निर्विकल्पके स्वात्मात्मनोश्चासाक्षात्त्वप्रसङ्गात्। न हि तत्र स्वकालो विशेषणविशेष्यभावश्च प्रतीयते।

स्यादेतत्—इदमहं जानमीति व्यवहारानुगुणत्वं साक्षात्त्वमिति चेत्, तन्न; निर्विकल्पकस्य तादृशव्यवहारानुगुणत्वाभावेनासाक्षात्त्वप्रसङ्गात्। अथ सविकल्पके दर्शनादैन्द्रियकज्ञानत्वेन निर्विकल्पकेऽपि तत् कल्प्यम्; तर्हि ज्ञानत्वेनानुमानादेष्वपि कल्प्यताम्। ऐन्द्रियकज्ञानेष्वेव तद्दर्शनाद्विशेषप्रयुक्तव्याप्त्युपजीवित्वेन ज्ञानत्वेनाऽनुमानादिषु तत्कल्पनमशक्यमिति चेत्, तर्हि सविकल्पकत्वविशेषप्रयुक्तव्याप्त्युपजीवित्वेनाप्यैन्द्रियकत्वेन तत्कल्पनमशक्यमेवेति प्राप्तमसाक्षात्त्वम्।

साक्षाद्धीः स्वरूपधीरक्षाद्धि स्वेन रूपेण भानं, लिङ्गानुपपन्नादिभ्यस्तु व्यापकोपपादकत्वादिरूपेण भानं, न स्वरूपेणेति न साक्षाद्धीरिति

---

१. तुत्वाभावात्. ग. तुताभावात्. घ. २. स्वविशिष्टा०. ख. ङ. ३. ल्पस्वात्मा०. ग. ४. ति त्रितयस्य व्यव०. ग. ति त्रितयव्यवहारानुगुणत्वं घ. ५. त्। न. घ. ६. त्वेनानुमानादिषु कल्पनमशक्यमिति चेत्, तर्हि. क. ७. पि तत् कल्प्यताम्. घ. ८. दिकल्पनमश०. क. ९. नं शक्य०. घ.

चेत् तर्हि सविकल्पके नामादिरूपेण भानं न स्वरूपेणेति न साक्षात्त्वम् । यत्तु निर्विकल्पके स्वरूपधीदर्शनात् सविकल्पकेऽपि तत्कल्पनम् ; तत् ज्ञानत्वेनानुमानादिष्वपि पूर्वोक्तेन नयेन स्वरूपधीप्रसङ्गेन पराकरणीयम् ।

यत्तु स्वरूपधियो व्याख्यानान्तरं स्वविषयानन्तर्गतार्थान्तरज्ञानाव्यवहितत्वमिति, तन्मन्दम् ; अनुमानज्ञानस्य स्वविषयानन्तर्गतार्थान्तरज्ञानोत्पाद्यस्य स्वात्मात्मानौ प्रत्यपि[२] तादृग्रूपत्वेनासाक्षात्त्वप्रसक्तेः । प्रकारान्तराणि तु स्वयूथ्यैरेव[३] निरस्तानि नास्माभिर्निरस्यन्ते । किञ्च किमिदं साक्षात्त्वं दीर्घह्रस्वत्वादिवत्[४] सप्रतियोगिकम्, उत घटादिवन्निष्प्रतियोगिकम् ? पूर्वत्र स्वस्य स्वस्मादनन्यत्वेन स्वप्रतियोगित्वाभावेन स्वस्मिन्नसाक्षात्त्वं स्यात्, ततश्च सर्वैव प्रतीतिरात्मस्वात्मनोस्साक्षात्कारवतीति रिक्तं वचः प्रसजेत् । उत्तरस्मिंस्तु निष्प्रतियोगित्वादनुमानज्ञानस्य ज्ञेयं प्रत्यपि साक्षात्त्वं स्यात् आत्मस्वात्मानौ प्रत्यपि न वा स्यात् । तस्मान्न साक्षात्प्रतीतिः प्रत्यक्षम् ।

इति साक्षात्प्रतीतिनिरसनवादो नाम
षष्ठवादः परिसमाप्तः ।

---

१. यान्तर्गत०. ग. २. पि तद्रूप०. ग. ३. सयूथ्यैरेव. क. घ.
४. स्वादिव. क. ग. ङ.

[कल्पनापोढनिरासवादः ।]

नापि कल्पनापोढमभ्रान्तं प्रत्यक्षम्; सविकल्पकस्याप्रत्यक्षत्वप्रसङ्गात्। नन्वप्रत्यक्षमेव सविकल्पकम्; अप्रमाणत्वात्। अप्रमाणत्वञ्चाविसंवादित्वाभावात्। तदयुक्तम्। तथाहि—किमिदमविसंवादित्वं, यस्य प्रमाणलक्षणत्वं; किं वस्तुविषयत्वं, किं वार्थक्रियासमर्थवस्तूपदर्शकत्वम्, उतार्थजत्वम्, उत बाधरहितत्वम्? इति। न प्रथमः; सामान्यादेर्वस्तुत्वे सविकल्पकस्यापि प्रामाण्यापत्तेः। अवस्तुत्वेऽनुमानस्याप्यप्रामाण्यप्रसङ्गात्। न द्वितीयः; भूतभविष्यतोरनुमानस्याप्रामाण्यप्रसङ्गात्। नापि तृतीयः। तथाहि—किं खल्वर्थजत्वमभिमतम्, किं साक्षात् उत परम्परयापि? पूर्वस्मिन्ननुमानस्याप्रामाण्यप्रसङ्गः; यतस्तत्र वह्निस्वलक्षणाद्धूमस्वलक्षणं, ततो धूमानुभवः, ततो धूमविकल्पः, तदनन्तरं वह्निविकल्पः। उत्तरस्मिन् सविकल्पकस्मृत्योः प्रामाण्यप्रसङ्गः; तयोरपि परम्परयार्थजत्वात्। न चतुर्थः; तत एव प्रसङ्गात्। किञ्च सविकल्पकस्याविसंवादित्वमवश्याङ्गीकरणीयम्; अविकल्पकस्यापि तद्द्वारेणैवाविसंवादात्; अन्यथा क्षणमात्रग्राहिणो निर्विकल्पकस्य स्वविषयप्राप्त्यादिरूपाविसंवादानुपपत्तेः। अतस्समानगोचरत्वेनाऽध्यवसायद्वारा निर्विकल्पकस्य प्राप्त्याद्यभ्युपगमादनुमानविकल्पवत् सविकल्पकस्याविसंवादिप्रामाण्ये दुरपह्नव एव। तथापि कथं प्रत्यक्षत्वमिति चेत्, प्रमाणत्वे सत्यपरोक्षत्वादिति ब्रूमः। ननु विकल्पा नापरोक्ष्यभाजः विकल्पत्वात्, सम्प्रतिपन्नविकल्पवत्।

---

१. पदेशकत्वम्. ग. २. न तृ०, ख. ग. न तृतीयः तथापि. ङ. ३. क्षमिति चेत्. ख. ग. ङ. ४. त्रवत्. घ. ङ.

यस्तु सविकल्पकेष्वापरोक्ष्यव्यवहारः नासौ विकल्पस्वभावकृतः किन्तु निर्विकल्पकसंसर्गकृतः; अन्यथानुमानादिविकल्पेष्वप्यपरोक्षव्यवहारप्रसङ्गात् । तदयुक्तम् ; परोक्षत्वापरोक्षत्वयोरक्षजन्यत्वानक्षजन्यत्वप्रयुक्तत्वात् । इतरथा मनोरथविकल्पवत् सविकल्पकानामपि परोक्षत्वेनैव व्यवहारप्रसङ्गात् । निर्विकल्पकसंसर्गकृतस्तत्रापरोक्षव्यवहार इति चेत् न; प्रमाणाभावात् । किञ्चाविसंवादित्वे सत्यक्षजत्वेनापि सविकल्पकानां प्रत्यक्षत्वं सिद्धम् । न चाक्षजत्वमसिद्धम् ; तदन्वयव्यतिरेकानुविधानस्य निर्विकल्पकवदेव सिद्धत्वात् । न च शब्दादिस्मरणव्यवहितत्वान्नाक्षजत्वम् ; तेषामक्षसहकारित्वात् सहकारिणाञ्च व्यवधायकत्वाभावात् । अतः सविकल्पकानामपि प्रमाणत्वप्रत्यक्षत्वयोरन्वयात्तद्व्यापित्वेन सौगतोक्तमप्यलक्षणमेव ।

इति कल्पनापोढनिरासवादो नाम सप्तमवादः

परिसमाप्तः ।

[योगरूढिवादः ।]

किन्तर्हि प्रत्यक्षं, कश्च तद्विषयः ? उच्यते—

मानमिन्द्रियजं योगोत्थमिह प्रत्यक्षमुच्यते ।
द्रव्यं जातिर्गुणः कर्म विषयश्च चतुर्विधः ॥

इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम् । तत्तु द्विविधम्, निर्विकल्पकं सविकल्पकञ्चेति । तत्रापातजं विशुद्धवस्तुविषयं निर्विकल्पकम् । तदनन्तरजं विशिष्टवस्तुविषयं सविकल्पकम् ।

---

१. कसविकल्पककृतः. ग. २. ष्वपक्षे व्य. क. ३. दन्वयव्या. ख. ङ. ४. क्षम् ? उच्यते. ख. ङ. ५. पयोऽस्य. घ. ६. कश्च । तत्रापा. ख. ङ. ७. जं शुद्धवस्तु. ख. ग. ङ.

ननु कथन्तर्हि सविकल्पकस्य प्रत्यक्षशब्दवाच्यत्वम्? तस्य निर्विकल्पकव्यवधानेन साक्षादक्षजत्वाभावात्। परम्परयाक्षजस्यापि तद्वाच्यत्वेऽनुमानादीनामपि[1] तद्वाच्यत्वप्रसङ्गात्। तदयुक्तम्; सविकल्पकानामपि निर्विकल्पकवदेव साक्षादक्षजत्वात्। भवतु वा परम्परयाक्षजत्वं तथापि नानुमानादिषु प्रसङ्गः; पङ्कजादिष्विव रूढिशक्तेरप्याश्रयणात्। ननु न पङ्कजादिषु रूढिरस्ति; अवयवशक्त्यैव प्रवृत्त्युपपत्तेः। न चान्यत्र सौगन्धिकादिष्वप्रयोगाय तदाश्रयणम्; अन्यत्राप्रयोगस्याप्रयोगादेवोपपत्तेः। न च यौगिकानामवयवार्थान्वयद्वारा वर्त्तमानानामवयवयोः स्वार्थे प्रयोगादितरस्य[2] प्रयोगस्याभावात् पङ्कजनिशब्दयोश्च पङ्कजन्मनोः प्रयुक्तत्वादप्रयोगोऽसिद्ध इति वाच्यम्; अवयवयोः स्वार्थे पृथक् पृथक् प्रयोगेऽपि सौगन्धिकादिष्वपृथक्प्रयोगस्यासिद्धत्वात्। किञ्च योगरूढिस्वीकारेऽपि सौगन्धिकादिषु पृथक् प्रयोगवशेन[3] पङ्कजशब्दस्य प्रयोगो दुर्वार एव। तत्र प्रयोगप्रतिबन्धकल्पनादप्रयोग इति चेत्तर्हि प्रतिबन्धादेवान्यत्राप्रयोगोपपत्तेः कृतं रूढिस्वीकारेणेति। अत्रोच्यते —

वृत्तिः पङ्कजशब्दस्य पद्मे रूढिर्न मुञ्चतः।
अप्रयोगो न चोत्पाद्यः प्रतिबन्धो न चादृतः॥

पुष्पभेदे हि तामरसत्वजातौ पङ्कजशब्दस्य[4] प्रवृत्तिरन्तरेण रूढिमवयवशक्तिमात्रान्नोपपद्यते; तन्मात्रस्य व्यभिचारित्वेनासामग्रीत्वात्। यस्यां सत्यां हि यज्जायत एव सैव तस्य सामग्री। न चावयवशक्तौ सत्याञ्जायत

---

१. पि निर्विकल्पवदेव तद्वा०. ध. २. व वृत्त्युपपत्तेः. ख. ङ. ३. स्य च प्रयोगस्याभावात्. घ. ४. योजनवशेन. घ. ५. बन्धि. ख. ग, ङ. ६. स्य वृत्तिमन्तरेण. ग.

एव पङ्कजशब्दस्य प्रवृत्तिः, सौगन्धिकादिष्वदर्शनात्। अतो न तन्मात्रं सामग्रीति तदतिरिक्तं शक्त्यन्तरं कल्प्यम्। सैव च रूढिरित्युच्यते। न च प्राचीनप्रयोगस्यापि प्रयोगहेतुत्वात् सौगन्धिकादिषु तदभावादेवाप्रयोग इति वाच्यम्; तथा सति सर्वत्र प्राचीनप्रयोगस्यैव प्रयोगहेतुत्वमित्यश्वकर्णादावपि रूढेरभावप्रसङ्गात्। अथ प्राचीनप्रयोगस्य न प्रयोगहेतुत्वमपि तु शक्त्यवगमकत्वम्, अवगता तु शक्तिः प्रयोगमूलमित्यश्वकर्णादिषु रूढिराश्रयणीया तर्हि पङ्कजशब्देऽपि प्राचीनप्रयोगः शक्त्यवगममात्रहेतुः, अवगता तु शक्तिः प्रयोगमूलमिति प्राप्तैव रूढिः। न च रूढेरेव प्रवृत्त्युपपत्तेरकारणं योगः; तस्यान्यत्र वृत्तिहेतुत्वस्थितेरिहापि तदबाधनात्। न हि सामग्रीत्वमिव कारणत्वमपि कार्यव्यभिचारो रुणद्धि। अतोऽन्ययौगिकेषु योगमात्रस्यैव प्रवृत्तिं प्रति कारणत्वसामग्रीत्वयोर्दर्शनेऽपि पङ्कजशब्दस्य वृत्तौ योगमात्रस्य सामग्रीत्वं सौगन्धिकादिषु व्यभिचारो बाधते, न कारणत्वमात्रमपीति कारणमेव योगोऽपि। तदिदमुच्यते—प्रतीतन्तु योगं न हातुं क्षमामहे इति। रूढ्यनङ्गीकारे कथं सौगन्धिकादिष्वप्रयोग इति प्रश्नस्याप्ययमेवार्थः यदुत यदि योगमात्रं वृत्तिसामग्री स्यात् तर्हि सौगन्धिकादिष्वपि प्रयुज्येत, न च प्रयुज्यते, अतः कथं योगमात्रं सामग्रीति। तथा च प्रश्नार्थे व्यवस्थिते यदुक्तमप्रयोगादेवाप्रयोग इति, तदुत्तरमेव; अप्रयोगहेतोरपृष्टत्वात् प्रयोगप्रागभावरूपत्वेन हेतुशून्यत्वाच्च।

---

१. स्य वृत्तिः. ख. ङ. २. श्री तद्. ग. ङ. ३. व हेतुत्व. घ. ४. अतः प्रा०. ङ. ५. व वृत्तिं प्रति. ख. ग. घ. ङ. ६. स्यायमर्थः तदुत. घ. ७. तदुक्तोत्तर. ग.

यत्पुनर्योगरूढिस्वीकारेऽपि सौगन्धिकादिष्वप्रयोगाय प्रतिबन्धशक्तिरादरणीयेति। तदयुक्तम्; योगरूढेः सामग्रीत्वस्थितौ सौगन्धिकादिषु सामग्र्येकदेशाभावादेवाप्रयोगोपपत्तेः। अतस्तामरसत्वजातेः पङ्कजशब्दवाच्यत्वं न केवलयोगो, नापि केवलरूढिः, किन्तु योगरूढिरिति सिद्धं, सिद्धञ्च तद्वदेव सविकल्पकानामपि प्रत्यक्षशब्दवाच्यत्वं न विरुद्धमिति।

इति योगरूढिवादो नामाष्टमो वादः

परिसमाप्तः।

[इन्द्रियवादः।]

कानि पुनरिन्द्रियाणि? चक्षूरसनघ्राणस्पर्शश्रोत्राणि मनश्च। तत्र रूपप्रतीतिहेतुत्वेन सिध्यतश्चक्षुषस्तेजोन्तरसाधारण्यात्तैजसत्वं, रसोपलम्भहेतुत्वेन सिध्यतो रसनस्य जिह्वोदकसाम्यादाप्यसत्वं, गन्धोपलम्भहेतोश्च घ्राणस्य चन्दनगतनिम्बत्वगनुलेपनसाम्यात् पार्थिवत्वं, स्पर्शोपलम्भहेतोः स्पर्शनस्य व्यजनानिलसाम्याद्वायवीयत्वं, शब्दोपलब्धिहेतोः श्रोत्रस्य बहिरिन्द्रियत्वेन चक्षुरादावनन्येन्द्रियोपादानजातीयभूतात्मकत्वनियमादाकाशात्मकत्वं, त्वगिन्द्रियसाम्याद्बहिरिन्द्रियत्वेन सर्वेषां प्राप्यकारित्वं, तद्बलादेव च पर्वतादिपृथुद्रव्यदृष्ट्या समकालदृष्ट्या च चक्षुषस्तन्ततत्वं पृथग्व्रत्वमदृष्टोपगृहीतेन बाह्यतेजसैकीभूय ग्राहकत्वमित्यादि सिद्धम्।

इतीन्द्रियवादो नाम नवमो वादः

परिसमाप्तः।

---

१. शभावादेव. ग. शभावादेवाप्र योगापत्तेः. घ. २. च्यत्वे. घ. ३. न विरूढमिति. क. नाविरूढमिति. ख. ग. नाविरुद्धमिति ङ. ४. दम्भसत्वं. ङ. ५. तोश्च. घ. ६. र्शस्य. व्यञ्जना ख. ग. र्शव्यञ्जनानि. ङ. ७. त्मत्वानि. क. ङ. त्मनि. ग. ८. पृथग्दृष्ट्या. ग.

[मनोवैभववादः ।]

कथं पुनरष्टस्य मनसस्सिद्धिः कथञ्च तद्वैभवम्? उच्यते—सुखाद्यापरोक्ष्यसाधनेन्द्रियत्वेन तावन्मनःसिद्धिः । वैभवन्तु मनो विभु स्पर्शनर्हद्रव्यत्वादनारभ्यारम्भकद्रव्यत्वाद्वा, ज्ञानासमवायिकारणसंयोगाधारत्वाद्वा, आत्मवत् । न चासिद्ध्यादिदोषसम्भवः ।

यत्तु विभुत्वं विभ्वन्तरासंयोगित्वेन व्याप्तमिति मनसो विभ्वन्तरसंयोगित्वाद्विभुत्वं विशेषविरुद्धमिति, तद्विभूनामपि परस्परसंयोगित्वस्येहैव वक्ष्यमाणत्वाद्व्याप्त्यसिद्धेरदूषणम् ।

ननु धर्मिग्राहकप्रमाणबाधितान्यनुमानानि । तथा हि—त्रेधा हि मनोधर्मिणो ग्रहणं सम्भवति; युगपज्ज्ञानानुत्पत्तेर्नित्यद्रव्यगतवैशेषिकगुणासमवायिकारणभूतद्रव्यान्तरसंयोगाश्रयत्वेन, सुखाद्यापरोक्ष्यसाधनेन्द्रियत्वेन वा इति । तत्र युगपदिन्द्रियैर्भूयसामर्थानां सम्बन्धे सति युगपज्ज्ञानानुत्पत्तिर्यदा मनसि लिङ्गं तदा विभुनो मनसस्सर्वार्थान् प्रत्यविशेषाद्व्यवस्थापकत्वाभावाददृष्टस्य च व्यवस्थापकत्वे मनःकल्पनावैयर्थ्यादणुत्वे चागन्तुकासाधारणसंयोगवशेन व्यवस्थोपपत्तेर्मनोग्राहकमेव प्रमाणमणुत्वमपि गृह्णातीति । यदा च ज्ञानं द्रव्यान्तरसंयोगासमवायिकारणकं अनित्यत्वे सति नित्यद्रव्यैगतविशेषगुणत्वात् पार्थिवपरमाणुरूपवदिति संयोगिद्रव्यत्वेन मनोनुमानम्; तदापि कारणाभावेन विभुनोस्संयोगाभावान्मध्यमपरिमाणस्य च कार्यत्वव्याप्तेः कार्यत्वस्य च बहुदोषत्वात् संयोगिद्रव्यत्वेन मनःसिद्ध्यदणुपरिमाणमेव सिद्ध्येदिति । यैरपि सुखा-

---

१. नसः सिद्धिः. क. ख. घ. ङ. २. नामेव. क. ३. नुपपत्तिर्यदा. ग. ४. व्यवि. ग. घ.

व्यापरोक्ष्यस्येन्द्रियत्वव्याप्तत्वादिन्द्रियत्वेन मनस्साध्यते, तैरपि विभुनोऽनुपहितस्येन्द्रियत्वायोगाच्छरीरावयवानाञ्चोपाधित्वे[1] तेषां क्वाचित्कत्वाच्चक्षुरादिवत्तन्निरोधे मनोनिरोधापत्तेःसकलशरीरोपाधित्वेऽपि[2] विभुकार्यस्यासमवायिकारणनियमादेव देशनियमादात्ममनस्संयोगस्य चासमवायिकारणत्वात्तस्य च सकलशरीरव्याप्तेश्शिरसि सुखं पादे वेदनेति सुखवेदनयोरव्याप्यवृत्तित्वप्रतीतिविरोधादन्यस्य चोपाधेरसम्भवाद्विभुत्वं परित्यज्यारभ्यत्वे प्रमाणभावात्, बलादणुपरिमाणमेव मनः स्वीकरणीयमिति सिद्धो धर्मिग्राहकप्रमाणबाध इति।

अत्रोच्यते—न तावद्युगपज्ज्ञानानुत्पादो मनसो लिङ्गम्; सिद्धेऽपि मनसि सम्यगभ्यस्तसमस्तशास्त्रार्थविषयसंस्कारनिकुरुम्बस्यात्मसमवेतस्य संयुक्तसमवायसम्बन्धेन मनसा युगपदधिष्ठितत्वात् स्मृतियौगपद्यमनिवार्यमिति। नच संस्कारोऽनुद्बुद्धः; तस्य प्रणिधानेनोद्बोधनात्। न च प्रणिधानमेव युगपदनेकविषयं न सम्भवतीति; तद्धीन्द्रियाणि स्वविषयेभ्यो व्यावर्त्य स्मृत्यपेक्षया मनसोऽवस्थानम्, तच्च सकलशास्त्रार्थविषयमपि युगपत्सम्भवत्येव। न च संस्कारस्य प्रणिधानमात्रमनुद्बोधकम्; अन्यत्राप्यनुद्बोधकत्वप्रसङ्गात्। अथ प्रणिधानस्य क्रमेण संस्कारोद्बोधकत्वं उद्बुद्धस्य संस्कारस्य वा क्रमेण स्मृतिजनकत्वं स्वभाव इत्यास्थेयम्, तर्हि लाघवाय सर्वत्र कर्तुरेव क्रमज्ञानजनकत्वं स्वभाव इति किमन्तर्गडुना तदर्थं मनःपरिकल्पनेन? नन्वेवं मनस्यकल्पे ज्ञानक्रिया कारणशून्या स्यात् चक्षुरादीनां व्यभिचारित्वेनाकारणत्वात्। एवन्तर्हि क्रियाकारणत्वेन मनस्सिद्धिः, न युगपज्ज्ञानानुत्पादोपपादनाय। किञ्च क्रियाकारणत्वेनापि न शरीरातिरिक्तस्य सिद्धिः; तस्य प्रमाणान्तरप्रतिपन्नस्याव्यभि-

---

१. षां कादाचित्कत्वात्. ग. २. रीरव्याप्तेश्शिरसि. ङ.

चारित्वेन कारणत्वोपपत्तेः नाप्रतिपन्नस्य कारणभाव इति । एवञ्च क्रमज्ञानजननस्वभावस्य कर्तृगोचरस्य कारणगोचरस्य वावश्याश्रयणीयत्वात् तेनैव युगपज्ज्ञानानुत्पत्तेरुपपत्तेर्न मनस्सिद्धिः, न तरान्धर्मिग्राहकप्रमाणबाध इति ।

यत्त्वनित्यत्वे सति नित्यद्रव्यगतविशेषगुणत्वात् संयोगिद्रव्यत्वेन मनोनुमानं, तत् सर्वत्र सपक्षे तेजोरूपसंयोगिद्रव्यस्य दर्शनान्मनसस्तेजोव्यतिरिक्तस्यानुमानं विशेषविरुद्धम् । किञ्च द्रव्यान्तरं शरीरमेवास्तु, किम्मनःपरिकल्पनेन? नचै कादाचित्कसंयोगव्याप्तेर्निश्चलशरीरस्य ज्ञानानुदयप्रसङ्गः; जीवच्छरीरस्य सर्वदैवोच्छ्वासादिभिरीषच्चलनस्यावश्यकत्वात् । अन्यथा शरीरत्वमेव हीयेत; चेष्टेन्द्रियाश्रयस्य तत्त्वेन स्वीकारात् । अतो नैवं धर्मिग्राहकप्रमाणबाध इति ।

यत्पुनः सुखाद्यापरोक्ष्यस्येन्द्रियजत्वव्याप्यत्वादिन्द्रियत्वेन मनोनुमानं तदनुमन्यामह एव । यच्च विभुनोऽनुपहितस्य नेन्द्रियत्वमिति तदप्यङ्गीकृतमेव, शरीरस्योपाधित्वात् । नच तदुपाधित्वे मनस्संयोगासमवायिकारणयोश्शिरःपादवेदनयोरव्याप्यवृत्तित्वविरोध इति वचनीयम्; अणुत्वेऽपि विभुकार्याणामसमवायिकारणनियमेन देशनियमात् । सकलशरीरसम्बन्धिदहनचन्दनजनितयोस्सुखदुःखयोः व्याप्यवृत्तित्वं युगपच्छिरःपादयोः कण्टकविद्धस्य वेदनायाश्च युगपदुभयवृत्तित्वञ्च विरुद्ध्यत इत्यतोऽणुत्वमहत्त्वयोर्गुणदोषतुल्यतया नाणुत्वमेवानेनाप्यनुमानेन स्वीकरणीयम् । तस्मात्सुखाद्यापरोक्ष्यमिन्द्रियमात्रसाधनं, विभुत्वाणुत्वे पुनस्तस्य प्रमाणान्तराधीने एव । तत्र विभुत्वे प्रमाणं प्रागेवोपन्यस्तम् ।

---

१. नः कल्पनेन. ग. २. च हेतोः कादाचित्क०. घ. ३. दङ्गी. ख. ङ. ४. त्तिविरोध ख. ङ. ५. नाग. ख. ङ.

यत्तु मनः परमाणुपरिमाणं नित्यत्वे सति विभुसंयोगित्वात् पर-[1]विशेषगुणासमवायित्वे सति नित्यत्वाद्वा तैजसपरमाणुवदित्यादि ; तदारम्भकत्वस्यानिन्द्रियत्वस्य भूतत्वस्य स्पर्शवत्त्वस्यं चाणुत्वेन व्याप्ते-[3]रनेवंविधे मनस्यणुत्वं गृह्णद्विशेषविरुद्धमेव । अतः स्थितं मनसो वैभवमिति ।

ननु यद्यपि सुखाद्यपरोक्ष्यसाधनत्वेनेन्द्रियमनुमितं तच्चान्त-र्मुखत्वाच्चक्षुरादिविलक्षणम्, इन्द्रियान्तरत्वान्न भूतारब्धं, करणत्वात् कर्तृविलक्षणञ्च तथापि दिक्कालयोरन्यतरदेव भवत् कथं द्रव्यान्तरम् ? इत्थं यदा हि मनः प्रमाणवशाद्विभुत्वेनेन्द्रियत्वेन ज्ञानमात्रकरणत्वेन च [4]स्थितं तदेन्द्रियं, यत्र प्रत्यक्षज्ञाने करणं[5] तत्र ग्राह्येण साक्षात्परम्परया वा सम्बद्धमेव करणीभवतीति प्रत्यक्षज्ञानोत्पत्ताववश्यमर्थेन मनस्सन्निकर्षोऽपि वाच्यः । एवञ्च यस्य प्रत्यक्षत्वं तस्य मनस्सम्बन्धित्वमेव, यस्य मनस्स-म्बधित्वन्तस्यैव प्रत्यक्षत्वमिति मनस्सम्बन्धिन एव ते, न मनः । तस्मान्मनो द्रव्यान्तरमिति सिद्धम् ।

इति मनोवैभववादो नाम दशमो वादः
परिसमाप्तः ।

[आत्मसंयोगवादः ।]

ननु विभुत्वे[6] मनसः कथमात्मना संयोग[7]: ? कथं न संयोगः ? विभुद्रव्यस्य विभुद्रव्येण संयोगादर्शनादिति चेत्, तर्हि विभुद्रव्यस्या-[8]

---

१. धिकारणावृत्तित्वे सति. क. घ. २. स्य वाणुत्वेन. ख. ङ. ३. मेवाव-स्थितं मनोवैभवमिति. घ. ४. तं तथेन्द्रियं. घ ५ क्षमिति. ग. ६. त्वेन मनसः ख. ङ. ७. गः विभुद्रव्यस्य. घ. ८. भुद्रव्येण संयोगो दृष्टः. घ.

विभुद्रव्येण संयोगो दृष्टः येनाविभुत्वे मनस्संयोगो युज्येत। न च घटादेराकाशादिसंयोगो दृष्ट इति वाच्यम् ; प्रत्यक्षाप्रत्यक्षसंयोगस्याप्रत्यक्षत्वात्। आत्मनो मानसत्वपक्षेऽपि द्रव्यान्तरस्य मानसत्वाभावान्मानसामानससंयोगस्यामानसत्वं असमानेन्द्रियग्राह्यतरुमरुत्संयोगवत्। अतः कथमविभुद्रव्यसंयोगसिध्येत्? न च विभुद्रव्यस्याविभुद्रव्यसंयोगेन विनाऽकिञ्चिदनुपपन्नं; येनार्थापत्त्या स कल्प्येत। अनुमानं तु संयोगस्य स्पर्शवद्द्रव्यैकाश्रितत्वनियमाद्विशेषविरुद्धमेव। अतः स्पर्शविधुरत्वादनारभ्यारम्भकद्रव्यत्वाच्च सामान्यादिवद्घटसंयोगं प्रत्याकाशादेरनर्हत्वमेवेति सकलमूर्त्तिमद्द्रव्यसंयोगित्वलक्षणं विभुत्वमेव हीयेत। तस्मात् क्लृप्तक्रियेण घटादिना विभुद्रव्यस्य संयोगाभाव इति दूरे स्पर्शविधुरत्वादनारभ्यारम्भकत्वाच्च विरुद्धक्रियेण क्रियाकल्पनापुरस्सरं मनसा संयोगसम्भव इति।

नन्वेवमस्मत्पक्षे विभुद्रव्यस्य विभ्वन्तरसंयोगवदविभुद्रव्येणापि माभूत् संयोगः। भवत्पक्षे वा कथं द्वयमुपपादनीयम्? इत्थं—प्रागाकाशमुदगाकाशं प्राचीनो घटः प्रतीचीनो घट इति च तुल्यतया दिगाकाशसंयोगस्य दिग्घटसंयोगस्य च प्रत्यक्षत्वाद्विभुद्रव्यस्य विभ्वन्तरसंयोगित्वमविभुद्रव्यसंयोगित्वञ्च दृष्टमित्यन्यत्रापि शक्यमनुमातुम्। तथा च विभुनी द्रव्ये परस्परसंयोगिनी अनारभ्यारम्भकेद्रव्यत्वे सति

---

१. ष्टः यदविभुत्वे. क. ख. ङ. २. ना यत्किञ्चिदनुपपन्नं. घ. ३. नारम्भकद्रव्याच्च. ग. ४. मूर्त्तिद्रव्य. ख. ङ. ५. द्रव्यसंयोगा. क. द्रव्येण. संयोगा. ग. ६ कद्रव्याच्च. ग. ७. ण घटक्रियाकल्प. ग. ८. त्रापि. घ ९. कत्वे सति. ग.

निरन्तरत्वात्, घटपटवत्[1]। तथाकाशं कालसंयोगि कालव्यतिरिक्तत्वे सति द्रव्यत्वाद् घटवदित्यादि द्रष्टव्यम्। न च संयोगस्यान्यतरकर्मज-त्वमुभयकर्मजत्वं संयोगजत्वं वेति नियमाद्विशेषविरुद्धत्वं[3]; प्रागुक्तेन न्यायेन नियमासिद्धेः, स्पर्शत्वद्रव्यसंयोगत्वप्रयुक्तव्याप्त्युपजीवित्वाच्च। तत्सिद्धमात्ममनस्संयोगस्य कारणाभावादजत्वं विभ्वन्तरसंयोगिनोऽपि मनसो वैभवञ्चेत्यलमतिविस्तरेण। प्रकृतमनुसरामः। सिद्धानि[4] तानि मनःषष्ठानीन्द्रियाणि सिद्धश्च तत्सन्निकर्षजं[5] प्रमाणं प्रत्यक्षमिति॥

इत्यजसंयोगवादो नामैकादशवादः
परिसमाप्तः।

[पवनाकाशप्रत्यक्षतावादः।]

कः पुनरस्य विषयः?

द्रव्यजातिर्गुणः कर्म विषयोऽस्य चतुर्विधः।

तत्र पृथिव्यप्तेजश्शब्दात्मनां[6] प्रत्यक्षत्वमविवादम्। दिक्काल-योस्तु[7] प्रमाणपरीक्षावसरे समर्थितम्। पवनाकाशयोस्तु समर्थ्यते— वायुः प्रत्यक्षः महत्त्वानिन्द्रियत्वे सति स्पर्शवत्त्वाद् भूतत्वाद्वा घटा-दिर्वदिति। किञ्च शीतोष्णानुष्णाशीतस्पर्शेषु स्पर्शनेनैकं वायुद्रव्यं

---

१. त् इत्यादि द्रष्टव्यम्. घ. २. त्वं संयोग. ङ. ३. रुद्धम्. ग. घ. ४. सिद्धन्तावन्मनःषष्ठा०. क. ख. सिद्धानि तावन्मनः०. घ. ङ. ५. जं प्रत्यक्षं प्रमाणमिति. ख. ङ. ६. ब्दानां. घ. ब्दानामविवादम्। कालदिशोस्तु. ङ. ७. कालदिशोस्तु. क. ख. घ. ङ. ८. वत्। किञ्च. क. ख. घ. ङ.

प्रत्यभिज्ञायते । न च तत्र स्पर्शमात्रं प्रत्यभिज्ञाविषयः; परस्परविलक्षणतया स्पर्शानुसन्धानसमय एव वायुद्रव्यस्यैकस्य प्रत्यभिज्ञानात् ।

यत्पुनरप्रत्यक्षो वायुः आत्मव्यतिरिक्तत्वे सति नीरूपद्रव्यत्वान्मनोवदित्यादि, तद्दिक्कालादीनां[1] प्रत्यक्षत्वसमर्थनेनानैकान्तिकीकरणीयम् । आकाशप्रत्यक्षत्वं[2] पुनराकाशप्रमित्यन्यथानुपपत्तिप्रसूतार्थापत्तिप्रमाणकम्[3] । न च शब्दस्य विशेषगुणत्वात् तदाश्रयत्वेन शब्दलिङ्गानुमानादेव[4] तत्सिद्धिः; शब्दस्य गुणत्वासिद्धेः । सिध्यतु[5] वा तथापि कथं दिक्कालातिरिक्तसिद्धिः ? भवत्यतिरिक्तासिद्धिः, तयोर्विशेषगुणशून्यत्वेनाश्रयत्वायोगादिति चेत्, तदयुक्तम्; शब्दाश्रयत्वेनाकाशस्यान्यतोऽसिद्धेः, असिद्धद्रव्यकल्पनापूर्वकाश्रयत्वकल्पनात् सिद्धद्रव्यगोचराश्रयत्वमात्रकल्पनस्यैव लाघवादिक्कालयोरेव शब्दाश्रयत्वप्राप्तौ विशेषगुणशून्यत्वासिद्धेः । न च बाह्येन्द्रियग्राह्यविशेषगुणस्य भूताश्रयत्वनियमात् भूतत्वेनाकाशसिद्धिः; भूतत्वस्यापि पूर्वोक्तक्रमेण दिक्कालावतिपतितुमेवाशक्तेः । किञ्चाकाशं प्रत्यक्षं अमनस्त्वे[6] सति विभुत्वादात्मवत् । न चेदमाकाशमप्रत्यक्षं अनात्मत्वे सत्यनवयवद्रव्यत्वात मनोवदित्यादिना सप्रतिसाधनं; प्रागुक्तेन न्यायेनाकाशप्रमित्यन्यथानुपपत्तिप्रभूतार्थापत्तिबाधितविषयत्वात् । तत्सिद्धं द्रव्याणीन्द्रियव्यतिरिक्तानि महान्ति प्रत्यक्षाणीति । जातिगुणयोस्तु प्रत्यक्षत्वे न विवादः । तदवान्तरविशेषप्रत्यक्षत्वविवादं तु विस्तरभयादप्रयोजनत्वाच्च नाद्रियामहे ।

इति पवनाकाशप्रत्यक्षतावादो नाम द्वादशवादः

समाप्तः ।

---

१. लाकाशादीनां. ग. घ. २. आत्माकाशप्रत्यक्षत्वं. ग. घ. ३. प्रमाणकम् . ङ. ४. तु तथा वा तथापि. ग. ५. पि दिक्कालातिरिक्तासिद्धिः. ङ. ६. स्त्वे विभु. ङ.

[कर्मप्रत्यक्षतावादः ।]

एवं कर्मणोऽपि प्रत्यक्षत्वमनन्यथासिद्धेन्द्रियान्वयव्यतिरेकानुविधानात् समर्थनीयम्। न च कर्मानुमानलिङ्गभूतयोस्संयोगविभागयोरेवान्यथासिद्धत्वादनन्यथासिद्धत्वमसिद्धमिति वाच्यम्; तयोरसमवायिमात्रापेक्षयोः कर्मासमवायिन[2] एवोपपत्तेः कर्मविलोपप्रसङ्गात्। नन्वसमवायित्वेन कर्मण्यभिमतस्संयोगस्तावन्नोदनाभिघातादिरूपोऽन्यत्र निश्चितस्वभावो यत् स्वाश्रये स्वाश्रयसमवेते वा करोति नान्यत्रेति, यथावयवसंयोगस्तावत्स्वाश्रयेऽवयविनं, प्रचयाख्यावयवसंयोगः स्वाश्रयसमवेतेऽवयविनि महत्त्वं, तन्तुतुरीसंयोगो युगपत् स्वाश्रयतत्समवेतयोः पटतुरीसंयोगमिति। अतो दर्शनबलात्[3] संयोगस्यासमवायित्वमेतन्नियमा[4]क्रमेणेति प्रयत्नवच्चेतनसंयोगस्य संयोगविभागौ प्रत्यतद्विधस्यासमवायित्वानुपपत्तेः तत्त्वेन कर्म कल्पनीयम्। कर्माणि तु पूर्वं नियमो नावधृतः। तस्य तदसमवायित्वं न प्रमाणविरुद्धम्। न चासमवायिकारणमात्रस्यायं नियमः; वेणुदलविभागजे खदलविभागे द्वित्वाद्युत्पत्तौ च व्यभिचारात्। तदयुक्तम्—

अनैकान्त्यात्तृतीयस्य प्रकारस्यापि सम्भवात्।
विशेषतो विरुद्धत्वात् स्थाणौ कर्मप्रसङ्गतः॥

असमवायिकारणभूतो हि संयोगः स्वाश्रये स्वाश्रयसमवेते वा कार्यमारभत इत्यनैकान्तिकम्; अणुद्वयसंयोगस्यानेवंविधे तृतीयाणा-

---

१. योस्सम. घ. २. कर्मसमवायिन. घ. ३. लादसंयोगित्वस्यासमवायित्वमेतन्नियमातिक्रमेणेति. ख. ङ. ४. मानतिक्रमेणेति. क.

वपि कर्मोत्पादकत्वदर्शनात् । न चाणुद्वयसंयोगः स्वाश्रयाश्रित-कार्यैकदेशद्वारा तद्धेतुरिति वाच्यम् ; कार्यस्यैकदेशान्तराभावात् । अवयवा एव हि कार्यस्यैकदेशाः, न च ते स्वयमेव स्वस्मिन् समवयन्ति । नापि स्वसंयोगारभ्याः ; अवयवव्यतिरिक्तांशान्तरस्वीकारे तु तत्संयोगानामपि तथैवारम्भकत्वेनानवस्थापातात् । अथैकस्मिन्नेव निरंशे प्रत्यभिज्ञाने ग्रहणस्मरणरूपांशयोरिन्द्रियसंस्कारावारम्भकाविति यथा तथेहापि कथन्न भवेत्? इत्थं न भवेत्—तत्र हि प्रत्यभिज्ञाने तदिदंरूपविसदृश-प्राक्तव्यलक्षणकार्यद्वयदर्शनात्तदनुगुणं शक्तिद्वयं प्रत्यभिज्ञानगतं कल्प्यम् । ते च शक्ती नेन्द्रियमात्रात् नापि संस्कारमात्रात्, अन्यत्रेन्द्रियमात्रजे संस्कारमात्रजे चादर्शनात् । अतः फलभेदाच्छक्तिद्वयं विभिद्यास्यां संस्कारः कारणमस्यामिन्द्रियमिति व्यपदिश्यते । ज्ञानस्वरूपे तु निरंशे न कोऽपि कार्यविभागः, नापि कारणविभागः । प्रकृते तु त्रसरेणौ नैवं किञ्चिदिति स्थितमेव तत्रानैकान्तिकत्वम् । ननु स्वाश्रय इत्यत्र स्वशब्दस्य समानजातीयत्वमर्थः न स्वरूपमात्रम्, अतस्तृतीयाणुसंयोगस्याप्येककार्य-हेतुत्वेनासमवायित्वेनाणुद्वयसंयोगसमानजातीयत्वात्तदाश्रयोऽपि स्वाश्रय एवेति । यद्येवन्तर्हि चेतनदेहसंयोगस्येव चेतनदेशसंयोगस्यापि संयोगविभागौ प्रत्यसमवायित्वाङ्गीकारेण समानजातीयत्वाच्चेतनदेह-संयोगस्य चेतनदेशसंयोगाश्रयोऽपि स्वाश्रय एवेति प्राप्तमेव तत्रारम्भ-कत्वम् । एतेनैकासमवायिविषयत्वाद्व्याप्तेश्चेतनदेहसंयोगस्य संयोगविभागौ प्रत्यजनकत्वमित्यपास्तम् ; प्रकृतेऽप्यसमवायिद्वयस्योक्तत्वात् । यत्पुनरस-मवायिकारणभूतः संयोगः संयोगमारभमाणो युगपत्स्वाश्रयतत्समवेतयो-

---

१. कार्योत्पा. घ. २. शः. घ. ३. त्रजैः. ग. ४. त्रजैर्वा. ग. ५. तुत्वात् सम. ख. ग. ङ. ६. तनसंयोगस्यापि. ख. ङ. ७. त्यक्षसम. ङ.

रेवारभत इति व्याप्तेश्चेतनदेहसंयोगस्यानारम्भकत्वमिति; तदवयविसंयोगारम्भकावयवसंयोगत्वप्रयुक्तव्याप्त्युपजीवित्वेन व्याप्त्याभासतया नियमासिद्धेः पराकरणीयम्। यत्तु चेतनदेहसंयोगस्य चेतनदेहयोरन्यत्रैवारम्भकत्वं चेतनदेहसंयोगत्वादान्तरत्वाद्वा इच्छावदात्मदेहसंयोगवदिति; तत्प्रयत्नस्य बहिरारम्भसहकारित्वात् प्रयत्नविधुरत्वप्रयुक्तं, न चेतनदेहसंयोगत्वप्रयुक्तं, नाप्यान्तरत्वप्रयुक्तम्। अपि च चेतनदेहसंयोगत्वादान्तरत्वाद्वा देहदेशसंयोगासमवायिव्यतिरिक्तारम्भकत्वनियमोऽपि तेनैव दृष्टान्तेन सुसाध इति यत्किञ्चिदेतत्। अतोऽर्वाचीनमार्गाणां क्षुद्रत्वादसमवायिकारणभूतः संयोगः स्वाश्रये स्वाश्रयसमवेते वा कार्यमारभते नान्यत्रेति महामार्गस्यैव विमर्दसहिष्णुत्वात्तत्रैव दोषानुदीरयामः। तत्र व्यभिचारः प्रागेवोक्तः। किञ्च तृतीयप्रकारोऽपि सम्भवत्येव। तथा हि—अवयवसंयोगस्य स्वाश्रय एवारम्भकत्वं प्रचयाख्यस्य त्ववयवसंयोगस्य स्वाश्रयसमवेत इति यथा तथा चेतनदेहसंयोगस्य देहदेशसंयोगारम्भकत्वमपि भवेत्, नं वा तदप्युभयं परस्परव्यभिचारात्। न चावयवसंयोगस्य प्रचयाख्यस्य वा अवयविनि महत्त्वे चान्वयव्यतिरेकयोस्तुल्यत्वादुभयमुभयत्रापि हेतुः, आत्मदेहसंयोगस्य तु व्यतिरेकादर्शनात् देहदेशसंयोगहेतुत्वन्नान्वयव्यतिरेकगम्यमिति वाच्यम्; आत्मदेहसंयोगस्य व्यतिरेकादर्शनेऽपि हस्तदण्डसंयोगस्य दण्डदेशसंयोगं प्रत्यन्वयव्यतिरेकयोर्दृष्टत्वात् तत्रैव च संयोगस्य स्वाश्रय-

---

१. प्रवृत्त. ग. २ न्यतरत्रैव. क. ३. दात्मसंयोगवादिति. घ. दात्मवदेहसंयोगवदिति. ग. ४. द्वा चेतनदेश. घ. ५. कत्वे नि. ख. ङ. ६. णः संयोगः. ग. ७. पि न. ग. ८. थाप्यव. ख. ङ. ९. था चेतन. ग. १०. न तावदुभयं. ख. ङ. ११. स्य व्यतिरेकादर्शनेऽपि हस्तदण्डसंयोगस्य. घ. १२. नाद्वा दे. ख. ङ. १३. गव्यति. ख. ङ.

तत्समवेतव्यतिरिक्तदेशेऽपि[1] जनकत्वस्थितेः । न च हस्तदण्डसंयोगस्य निमित्तत्वेन[2] कारणकारणत्वेन वाप्युपपत्तेरसमवायित्वमसिद्धमिति वाच्यम्; दण्डदेशसंयोगस्यासमवायिविशेषापेक्षत्वात्, कर्मणि[3] सिद्धपूर्वदण्डहस्त-संयोगस्य[4] तत्समवायित्वेनैव व्यवस्थानात् । अन्यथावयवसंयोगस्य प्रचयाख्ययोरवयविनि महत्त्वे च निमित्तकारणत्वेन[5] कारणकारणत्वेन वाप्युपपत्तेरसमवायित्वं न सिध्येत् । अतस्सिद्धमसमवायिसंयोगारम्भ-कत्वस्य तृतीयप्रकारोऽपि सम्भवतीति । किञ्च यदि संयोगस्य द्विप्रका-रत्वमेव भवेत्[6], एवन्तर्हि नोदनसंयोगश्शरज्यासंयोगविशेषः, तत्र किं शरावयवेन ज्यासंयोगः, उतावयविना, अथवोभयेन? न तावत् प्रथमः; अन्त्यावयवानां ज्यासंयोगाभावेन तेषु कर्माभावात् संयोगविभागौ न स्याताम् । अथैवमुच्येत–यद्यप्यन्त्यावयवानां ज्यासंयोगो न सम्भवति तथाप्याद्यावयवानां तावद्भवत्येव, अतस्तेषु तदनन्तरञ्च कर्मवदाद्यावयव-संयोगोऽन्त्यावयवानां भवति, तत एवान्त्यावयवेष्वपि कर्मोत्पद्यते, तेनान्त्यावयवानां संयोगविभागौ नानुपपन्नाविति । एवन्तर्ह्यन्त्यावयवात् पूर्वमेवाद्यावयवानां देशप्राप्तिर्भवेत्; क्रियायाः क्षणिकत्वात् । फलञ्च कृत्वैव क्रिया नश्यति, फलविनाश्यं कर्मेति हि पठन्ति । न चैवं दृश्यते। न च द्वितीयः । यद्यपि शरावयवज्यासंयोगेऽवयविनः स्वाश्रयसमवेतत्वा-त्तस्मिन् कर्म भवेत् तदनन्तरञ्च संयोगविभागौ, अवयविज्यासंयोगे तु

---

१. देहेऽपि. ख. ङ. २. त्वेन व्याप्त्युप. ख. ङ. त्वेनाप्युप. ग. घ. ३. कर्मसिद्ध. ख. ङ. ४. स्य निमित्तत्वेन कारणाकारणत्वेन तदसम. ग. ५. रप्यव. ख. ङ. ६. न कारणत्वेन वाप्युप. क. न कारणत्वेनाप्युप. ग. घ. ७. वोच्येत. घ. ८. पु कर्मोत्पद्यते. घ. ९. च न संयो. ग.

स्वाश्रयतत्समवेतव्यतिरिक्तत्वादवयवानां कर्माभावात् संयोगविभागौ न स्यातां[1]। न तृतीयः; अवयवावयविनोरुभयोरपि संयोगेऽन्त्यावयवानां ज्यासंयोगाभावात् कर्म न भवेत्, ततश्च संयोगविभागौ न स्याताम्। अथ कर्मवदाद्यावयवसंयुक्तत्वादन्त्यावयवानां तत एव संयोगविभागात् कर्म भवतीत्युच्यते, तत्रोक्त एव दोषः। किञ्च संयोगजसंयोगे जन्यसंयोगस्यानेकाश्रितैकासमवायिहेतुत्वं संयोगहेतुत्वं वेति व्याप्तिदर्शनादनेवंविधस्य कर्मणः संयोगहेतुत्वेनानुमानं विशेषविरुद्धम्। ननु वेगस्य संस्कारत्वेन स्मृतिहेतुसंस्कारवत्[2] स्वहेतुसमानजातीयफलजनकत्वव्याप्तेर्नोदनस्य[3] तदजन्यत्वान्नोदनातिरिक्तमेव जन्यं जनकञ्चेति[4] कर्मानुमातुं शक्यम्। मैवम्; प्रोक्षणादिजन्यसंस्कारे व्यभिचारात्। न हि तत्र प्रोक्षणादिजन्यस्संस्कारः प्रोक्षणान्तरमपि जनयति। अथ तत्र न वास्तवं सामान्यं, किन्तु समानशब्दवाच्यत्वमेव[5], तर्हि वेगस्यापि न वास्तवं सामान्यं, अपि तु समानशब्दवाच्यत्वमेवेति न ततः कर्मानुमातुं शक्यम्। यत्पुनः प्रत्यक्षेऽपि कर्मणि कर्मफलयोः संयोगविभागयोः कर्मकारणजन्यत्वं कथं वारणीयमिति[6]; तत् कर्मणः प्रत्यक्षत्वेन कर्महेतोः कर्मण्येवोपक्षीणत्वात्[7] तदन्यत्रानुपक्षीणस्य कर्मण एव संयोगविभागजनकत्वकल्पनात्। यत्तु यः संयोगविभागयोः क्रियान्वयव्यतिरेकौ न स्त इति वदति स कथं बोधनीय इति चोद्यं, तत् यः करतलकलितमामलकं नास्तीति वदति स येनोत्तरेण बोधनीयः सोऽपि तेनैव बोधनीय इति परिहर्त्तव्यम्।

---

१. ताम्। अथ कर्मवदाद्यावयव. ङ. २. तुवत्. ग. ३. जन्यजनकत्वं चेति. ख. ङ. ४. तुमश. ङ. ५. मेवेति. घ. ६. ति वितर्केण प्रत्यक्षत्वेन. ख. ङ. ७. तु अन्यत्र. क. ख. घ. ङ.

किञ्च यदि संयोगविभागाभ्यां कर्मानुमेयं, तर्ह्युत्पत्य निपतिते श्येन इव स्थाणावपि[1] चलतीति प्रत्ययप्रसङ्गः । न च श्येनगतकर्मणैव स्थाणावपि संयोगविभागोत्पत्तेरुपपत्तेर्न स्थाणौ कर्मकल्पनमिति वाच्यम् ; स्थाणुश्येनसंयोगस्य प्रयत्नवच्छ्येनदेहसंयोगेनाप्युपपत्तेः श्येनेऽपि कर्माभावप्रसङ्गात् । अथ स्थाणुश्येनसंयोगस्य प्रयत्नवच्छ्येनदेहसंयोगेनाप्युपपत्तौ सत्यामपि संयोगस्य स्वाश्रयस्वाश्रयसमवेतयोरन्यत्रैव[2] जनकत्वमिति प्रमाणान्तराविरोधाच्छ्येने कर्मकल्पनम्, तर्हि संयोगजसंयोगे जन्यसंयोगस्योभयाश्रितासमवायिकारणजन्यत्वव्याप्तिदर्शनात्तद्विरोधेन[3] स्थाणावपि कर्म कल्पनीयम् । अथार्थान्तरविभागपूर्वार्थान्तरसंयोगाभावान्न[4] तत्र[5] कर्म कल्प्यं, तर्ह्येकश्येनवियुक्ते श्येनान्तरसंयुक्ते स्थाणौ कर्म कल्प्यं स्यात् । यत्पुनः कर्मणि लिङ्गाभावे सूर्यगत्यनुमानं निर्बीजं स्यादिति ; तन्मन्दम् । कर्मणि प्रत्यक्षे प्रत्यक्षत एव जन्यसंयोगस्यान्यतरकर्मजत्वमुभयकर्मजत्वं संयोगजत्वं वेति नियमावधारणादाकाशसूर्यसंयोगस्य जन्यसंयोगत्वेन त्रयाणामन्यतरहेतुत्वस्थितावाकाशसूर्ययोः परस्परं अवयवसंयोगजावयविसंयोगादन्यत्वेन संयोगजसंयोगासम्भवादाकाशनिष्क्रियत्वेनोभयकर्मजस्याप्यसम्भवादन्यतरकर्मज एव तयोः संयोग इति प्राप्ते परिशेषात्[6] सूर्य एव कर्मकल्पनम् । भवन्मते तु कर्मणो नित्यपरोक्षत्वान्नैवंविधं[7]

---

१. ति प्रसङ्गः. ख. ग. ङ. २. न्यतरत्रैव. क. ३. पि कल्पनीयम् । ख. ग. ङ. ४. पूर्वकार्यान्तरसंयोगाभावात् . घ. ५. त्र कल्प्यं त. ख. ङ. ६. नित्यत्वपरोक्षत्वात् . ख. ङ. ७. वं व्याप्तिमूलं परिशेष०. ख. ग. ङ.

व्याप्तिमूलम्। अतः परिशेषसिद्धं कर्मप्रमित्यन्यथानुपपत्त्या कर्मणः प्रत्यक्षत्वम्।

इति कर्मप्रत्यक्षतावादो नाम त्रयोदशवादः
परिसमाप्तः।

[विशेषनिराकरणवादः।]

ननु द्रव्यादिचतुष्टयस्यैव प्रत्यक्षत्वे विशेषसमवाययोः कथं सिद्धिः? न[1] कथञ्चित्; तत्र प्रमाणाभावात्। नन्वस्त्येव विशेषसिद्धावनुमानं, समानजातीयास्समानगुणकार्याः परमाणवो मुक्तात्मानश्च परस्परव्यावर्त्तकाः[2] समवायिनः द्रव्यत्वाद् घटवदित्यादि। न च पृथक्त्वेन सिद्धसाध्यत्वम्; यस्य व्यावर्तकसमवायित्वं तस्यैव पृथक्त्वमिति पृथक्त्वव्यतिरिक्तव्यावर्तकस्यैवानुमानादिति। तदयुक्तम्; भावत्वे सति भावान्तरव्यावर्तकत्वस्य[3] सामान्यवत्त्वव्याप्तेर्निस्सामान्यव्यावर्तकानुमानस्य[4] विशेषविरुद्धत्वात्। तत्रापि सामान्याश्रयणे तन्निबन्धनसन्देहनिवारणाय विशेषान्तराश्रयणेनानवस्थाप्रसङ्ग इति चेद्, असदर्थनिर्बन्धिनमात्मानमुपालभस्व[5]। किञ्च तानेव धर्मिहेतुदृष्टान्तानाश्रित्य विशेषसाधनानुमानानां विरुद्धव्यभिचारित्वमपि[6] प्रदर्शनीयम्। यथा चैवं परप्रसिद्धसाधनेऽपि नाप्रसिद्धविशेषणत्वापातः तथेश्वरानुमाने वक्ष्यामः।

इति विशेषनिराकरणवादो नाम चतुर्दशवादः
परिसमाप्तः।

---

१. न तथापि तत्र. ग. २. न चास्त्येव. ग. ३. कधर्मस. घ. ४. कत्वं तस्य. ख. ङ. ५. येण. ङ. ६. लम्भ. ग. ७. धर्म. ग. ८. नानां वि. ख. ङ. ९. रुद्धव्य. ख. ङ. १०. रस्परप्रसिद्ध. ग.

[समवायनिरासवादिः ।]

एवं समवायोऽपि न सेद्धुमर्हति। तथा हि—तत्र प्रत्यक्षमनुमानं वा प्रमाणम्। न तावत् प्रत्यक्षम्; अप्रतिभासनात्। इह पटे शौक्ल्यं पटाश्रयं शौक्ल्यमित्यादिप्रत्ययस्येन्द्रियान्वयव्यतिरेकानुविधानात् प्रत्यक्षत्वमिति चेत्, न; तस्य समवायविषयत्वासिद्धेः। सिद्धे हि तद्विषयत्वे इन्द्रियान्वयव्यतिरेकानुविधानात् प्रत्यक्षत्वं समवायस्य। न च तदेवाद्यापि सिद्धम्; स्वरूपस्यैव विप्रतिपन्नत्वात्। कश्च समवायेनेन्द्रियस्य सम्बन्धः? विशेषणविशेष्यभाव इति चेन्न; तस्येन्द्रियसम्बन्धत्वासिद्धेः, भावयोर्विशेषणविशेष्यभावस्य सम्बन्धान्तरपूर्वकत्वाच्च।

न चानुमानं प्रमाणं, तत् खल्विह गवि गोत्वमिति प्रत्ययोऽधिकरणाधिकर्तव्यसम्बन्धनिबन्धनः इहेति प्रत्ययत्वाद् इह कुण्डे बदरमिति प्रत्ययवदिति, विवादपदं विशेषणविशेष्यसम्बन्धनिबन्धनं विशिष्टज्ञानत्वाद् दण्डीति ज्ञानवदिति वा स्यात्। तत्र च यथासंख्यमिह भूतले घटो नास्तीति प्रत्ययेन विनष्टो घट इति प्रत्ययेन च हेतुद्वयस्यापि व्यभिचारः। ननु शुक्लः पट इति विशेषणविशेष्यभावस्तयोः सम्बन्धनियतः सामान्यवन्मात्रविशेषणविशेष्यभावत्वात् सघटं भूतलमिति विशेषणविशेष्यभाववत्। कालादिविप्रकृष्टे तु देवदत्तादौ तत्पुत्र इत्यादिरुपलक्ष्योपलक्षणभावः, न विशेषणविशेष्यभावः। तदयुक्तम्; सम्बन्धस्य पृथक्सिद्धगोचरत्वव्याप्तेरपृथक्सिद्धगोचरत्वेन सम्बन्धानुमानस्य विशेषविरुद्धत्वात्।

---

१. सनत्वात्. ग. २. लक्षणोपलक्ष्यभावः. क.

किञ्च पृथक्सिद्धविशेषणविशेष्यभावत्वमेव सम्बन्धपूर्वकत्वे प्रयोजकं, न तु विशेषणविशेष्यभावत्वमात्रम्; तस्य विशेषप्रयुक्तव्याप्त्युपजीवित्वात्। ननु पूर्वं भावयोर्विशेषणविशेष्यभावः सम्बन्धपूर्वक इत्युक्तम्, इदानीं पृथक्सिद्धयोरेव विशेषणविशेष्यभावः सम्बन्धपूर्वक इति कथमुच्यते? इत्थं पूर्वव्याप्तेः[2] प्रसङ्गरूपत्वात्[3] अस्यार्थस्य स्वदर्शनसिद्धत्वादिति।

यत्पुनरागमसन्निधिहीनस्याप्युत्पन्नवस्तुपरतन्त्रतया भानादेव संयोगविलक्षणः समवायः कल्पित इति। तत्र किमागमसन्निधिहीनस्योत्पन्नवस्तुपरतन्त्रतया भानं समवायेन व्याप्तम्, उत तेन विनानुपपन्नम्? न व्याप्तम्; अन्यत्र सहादर्शनेन विशेषव्याप्त्यसम्भवात्, सामान्यव्याप्तेश्च पूर्ववद्विशेषविरुद्धत्वादप्रयोजकत्वाच्च। न चानुपपन्नम्; अभेदस्य समर्थयिष्यमाणत्वात्तेन तदुपपत्तेः।

एतेनाविसंवादिपरस्परसाकांक्षरूपरूपिणोर्नियमेन सहोपलम्भः समवायगमक इत्यपास्तम्।

किञ्च समवायः समवायिभ्यामत्यन्तभिद्यमानः सम्बद्धो[10] वा स्यादसम्बद्धो[11] वा? नाद्यः, अनवस्थापातात्। न द्वितीयः; असम्बद्धत्वाविशेषेण[12] कयोश्चिदेवेति नियमानुपपत्तेः। अथ न कस्यचित्समवायः; तस्य

---

१. वत्वमेव. ग. २. पूर्वं व्याप्तेः. क. ग. ङ. ३. ङ्गत्वरूपत्वात्. ख. ४. श्च दर्श. ङ. ५. मः सन्नि. ख. ६. नस्य व्युत्पन्नरूपवस्तु. ख. नस्य व्युत्पन्नरूपस्तु. ङ. ७. वायत्वेन. ग. ८. त्रासहादर्श. ख. ङ. ९. म्बन्धो. ख. ग. ङ. १०. म्बन्धो. ख. ग. ङ. ११. म्बन्धत्वा. ख. ग. ङ. १२. थ कस्यचित्. ग.

स्वतन्त्रत्वात् । कथं तर्हि महिषमहिषत्वयोरिव नाश्वमहिषत्वयोरपि स्याद-विशेषात्? अथ महिषमहिषत्वयोराभिव्यञ्जकत्वात् स तयोरेव । यद्येवं किमश्वोऽनभिव्यञ्जक एव? ओमिति ब्रूते चेत् न; अश्वत्वजाति-समवायं प्रत्यनभिव्यञ्जकत्वप्रसङ्गात् । अथाश्वोऽप्यभिव्यञ्जकः, सोऽपि महिषः स्यात् । अथाश्वोऽश्वत्वजातिसमवायस्यैव व्यञ्जकः, न महिषत्व-जातिसमवायस्य । यद्येवं किमन्योऽश्वत्वजातिसमवायात् महिषत्व-जातिसमवायः? ओमिति ब्रुवतः प्राभाकरस्य किमुत्तरमिति चेत्, स एवाति-प्रसङ्गः । न ह्यत्यन्ताभिन्नत्वाविशेषे कौचिदेव सामान्यविशेषौ कस्यचिदेव समवायस्याभिव्यञ्जकाविति नियमोऽवकल्पते । स्वभावादवकल्पत इति चेत्, हन्त तर्हि पिण्डस्वभावादेवैं कस्यचिदेव सामान्यस्य तन्निरूप्यत्वं विशेषणविशेष्यभावानुभवितृत्वं चेति किं समवायाभ्युपगमेन?

यत्पुनः समवायस्यैं न प्रयोजनवशादङ्गीकरणमपि तु प्रमाणबला-दिति, तन्मन्दम्; प्रमाणबलस्य प्रागेवापास्तत्वात् ।

इति समवायनिरासो नाम पञ्चदशवादः
समाप्तः ।

[तादात्म्यवादः ।]

नन्वसंयुक्तयोर्जातिजातिमतोः समवायानभ्युपगमे कथं विशेषण-विशेष्यभावः? तादात्म्यादिति ब्रूमः । नन्वत्यन्तभेदमेव जातिजातिमतोः प्रतीमो, न तादात्म्यम् । न,

---

१. श्वोऽभिव्यञ्जकः. ख. श्वोऽपि व्यञ्जकः. ग. ङ. २. तः प्रभाकर०. क. ३. त्यन्तभिन्नत्वा०. क. घ. ४. स्यानभि. ग. ५. व सामान्यस्य. घ. ङ. ६. स्य प्र. ख. ङ.

सर्वत्र वस्तुसन्देहे निर्णेत्री केवला[1] मतिः।
सात्यन्तभेदवैधर्म्यादभेदमपि कर्षति ॥

यस्य हि वस्तुनो यद्रूपत्वे विवादः तस्य तद्रूपत्वं तद्रूपनिर्भासा मतिरेव व्यवस्थापयति। न च जातिजातिमतोरत्यन्तभेदनिर्भासा मतिः; अन्यत्रात्यन्तभेदनिर्भासस्यानेवंविधत्वात्। सा[2] हि पुनरिदं गोत्वे इति भवेन्न पुनरयं गौरिति। अतोऽत्यन्तभेदवैधर्म्यादयं गौरिति मतिरभेदमपि गोचरयति। न च समवायाद्वैधर्म्यं; तस्य निराकृतत्वात्। किञ्च—

इदंगवोरपर्यायसामानाधिकरण्यतः।
मिथस्तदर्थयोर्वाच्यो भेदाभेदसमुच्चयः ॥

इदंगोपदयोः सामानाधिकरण्यमेव हि तदर्थयोरभेदे प्रमाणम्। न चाग्निर्माणवक इत्यत्राग्निमाणवकपदार्थयोरभेदाभावाद्व्यभिचारः; तदर्थयोरप्यभेदात्। न हि तत्राग्निपदस्याग्निरर्थः, अपि तु पैङ्गल्यम्। अस्ति च तेन माणवकस्याभेदः। तस्मान्न सामानाधिकरण्यमभेदव्यभिचारि।

किं पुनः सामानाधिकरण्यम्? भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिरिति चेत्, न; हस्तः कर इत्यादावसामानाधिकरण्यप्रसङ्गात्[3]। न च नास्त्येव तत्र सामानाधिकरण्यम्; अक्रियाकारकात्मनोरशेषशेषिणोरसामानाधिकरण्ये परस्परमनन्वयादेकवाक्यानुप्रवेशानुपपत्तेः। न च पर्याययोरेकेनैव कृत इतरस्य कृतकरत्वेन सह प्रयोगाभावादेकवाक्यानुप्रवेश एव नास्ति; व्युत्पन्नहस्तपदमव्युत्पन्नकरपदं कः कर इति पृष्टवन्तं

---

१. लं मतिः। क. ख. ग. ङ. २. स पुनरिदं. घ. ३. वसमा. ख. ङ.

प्रति पदद्वयार्थतादात्म्यप्रतिपादनपरे हस्तः कर इति वाक्ये पर्याययोरप्येकवाक्यानुप्रवेशसहप्रयोगयोः दर्शनात् । न चैकार्थ्यं सामानाधिकरण्यम् ; शुक्लो गौरित्यादावसामानाधिकरण्यप्रसङ्गात् । अतो दुर्निरूपं सामानाधिकरण्यमिति । उच्यते—अपृथक्सिद्धार्थयोरेकत्र तात्पर्यं सामानाधिकरण्यम् । न च पृथक्सिद्धेरनिरूपितत्वात्तद्वैधुर्यलक्षणाया अपृथक्सिद्धेरशक्यं निरूपणमिति वाच्यम् ; तयोर्युतसिद्ध्ययुतसिद्धिपर्यायत्वात् । न च ते अपि दुर्निरूपे ; समवायाश्रयनिरूपणाय भवद्भिरेव तयोस्सुनिरूपितत्वात् । अतः पर्यायेष्विव सामानाधिकरण्यं इदंगोपदयोरभिन्नार्थत्वं गमयति । न च शुक्लो गौरित्यत्र शुक्लगोपदयोः सामानाधिकरण्येऽपि परस्परमभिन्नार्थत्वाभावेन व्यभिचारः ; सर्वत्र समानाधिकरणशब्दानां स्वतात्पर्यविषयेणाभिन्नार्थत्वमिति नियमात् तस्य च क्वचिद्व्यभिचाराभावात् । ननु सामानाधिकरण्यस्याभेदव्याप्तिवदपर्यायत्वस्य भेदव्याप्तिरप्यस्ति । सत्यमस्ति । अत एव भेदाभेदसमुच्चयमाद्रियन्ते वृद्धाः । ननु कथं परस्परविरुद्धौ पयःपावकाविव भेदाभेदावेकत्र सम्भवेताम् ? उच्यते—

स्वभावतः प्रतीतेर्वा विरोधो वस्तुनो भवेत् ।
न च स्वतो विरोधोऽस्ति नापि कश्चित् प्रतीतितः ।

अत्रेदं परः पृष्टो व्याचष्टां—ययोर्भेदाभेदयोरेकत्रासम्भवैः तौ किं स्वतो विरुद्धौ किं वा प्रतीतिमुखेनेति । न प्रथमः ; प्रमाणाभावात् । अथान्यत्र सहादर्शनमेव प्रमाणम् ; तर्हि द्रव्यान्तरोपादानत्वोपादेयत्वयोः परमाणुष्वन्त्यावयविषु च सहादर्शनाद् द्व्यणुकादिषु मध्यवर्त्तिषु तयोस्समुच्चयो न स्यात् । अथ द्व्यणुकादौ यद-

---

१. योरर्थयोरेकत्र. ख. २. न चैते अपि. घ. ३. याश्रयणाय. क. ४. तीतो वा. क. ५. वन्तौ. ख. ङ.

पेक्ष्य द्रव्यान्तरोपादानत्वमवगतं न तदपेक्ष्योपादेयत्वमित्यपेक्षाभेदाद-विरोधः। तन्न; सापेक्षत्वेनापि तयोः परमाणुष्वन्त्यावयवित्रु सहादर्शने विरोधस्य तादवस्थ्यात्। किञ्चाङ्कुरस्य बीजजन्यस्य बीजव्यतिरिक्त-शिलाशकलजन्यत्वादर्शनेन तज्जन्यत्वातज्जन्यत्वयोर्विरोधाद् बीजव्यति-रिक्तक्षित्यादिजन्यता न स्यात्। न हि तत्रापेक्षाभेदोऽपि; तस्यैवाङ्कुरस्य तदेव बीजं प्रति तज्जन्यत्वेनातज्जन्यत्वेन च व्यवस्थानात्। अथ यथैव प्रमाणेन बीजजन्यत्वं दृष्टं तथैव तदितरजन्यत्वमपीति तज्जन्यत्वातज्जन्य-त्वयोरविरोधः। तर्हि यथैव प्रमाणेन भेदो दृष्टः तथैव तदभावोऽपीति द्वयोरपि न विरोधः स्यात्। तस्मात् सुव्यवस्थितमिदमन्यत्र विरुद्धावपि भेदाभेदौ प्रतीतिबलात्तज्जन्यत्वातज्जन्यत्वतज्जनकत्वातज्जनकत्ववदयुत-सिद्धेषु न स्वतो विरुद्धाविति।

अत एव प्रतीतिमुखेनापि विरोधो नास्त्येव। एवं हि स उद्भा-व्यते—विलक्षणाकारवस्तुद्वयप्रतिभासो भेदप्रतिभासः। अभिन्नाकारैकव-स्तुमात्रप्रतिभासश्चाभेदप्रतिभासः। तत्र विलक्षणाकारवस्तुद्वयप्रतिभासः कथमभिन्नाकारैकवस्तुमात्रप्रतिभासः स्यात्? विलक्षणाकारवस्तुद्वय-प्रतिभासताभङ्गप्रसङ्गात्।

किञ्च भेदावभाससमये यज्जातिरूपं व्यक्तिरूपञ्च प्रतिपन्नं अभेद-प्रतिभासवेलायां तयोरेवान्यतरपरिहारेणैकतरत् प्रत्येतव्यम्। तत्रैकस्य द्विरवभासोऽयं न पुनरभेदावभास इति। तच्चेदमयुक्तम्। न हि वस्तुद्वय-प्रतिभासो भेदप्रतिभासः; सुसदृशवस्तुद्वयस्य भिन्नदेशकालत्वेन प्रतिपन्नस्य

---

१. जजन्यव्यतिरिक्त. ख. ङ. २. नात् उभयथैव प्रमाणेन. घ. ३. हि तथैव. क. ४. प्रपन्नं. ङ. ५. सः; सदृश. ङ. ६. स्य अभिन्नदेश० घ. ७. न प्रतिपन्नत्वेन प्रति. ख. ङ.

किं तदेवेदं उतान्यदिति सन्देहगोचरत्वानुपपत्तेः । एवमेकस्मिन्नेव वस्तुनि देशकालादिभेदेन[1] सन्देहदर्शनान्नैकमात्रप्रतिभासस्याभेदप्रतिभासत्वम् । अतो भेदाभेदयोर्वस्तुधर्मत्वाद्यथैकत्र शौक्लेयप्रतिभासस्य गोत्वप्रतिभासप्रत्ययत्वमविरुद्धं[2][3] तथैकत्र भेदप्रतिभासप्रत्ययस्याभेदप्रतिभासप्रत्ययत्वमाविरुद्धम्; उभयोः समुच्चित्य प्रत्ययात् ।

यत्पुनर्विलक्षणाकारवस्तुद्वयनिर्भासः कथमभिन्नैकवस्तुनिर्भास इति, तत् किं विलक्षणद्वयप्रतीतावभिन्नैकवस्तुप्रतीतिरेव नास्ति? यद्येवमनेकेष्ववयवेष्वनेकासु व्यक्तिषु चैकमभिन्नमवयवित्वं सामान्यञ्च नाभ्युपेयेत ।

अथ ययोर्भेदस्तयोरेवाभेदो न प्रतीयत इत्युच्यते; तदयुक्तम् । तथा हि—किमिदं स्वाभिलषितमात्रं, उत व्याप्तिः? न प्रथमः; तस्याननुरोध्यत्वात् । न च व्याप्तिः; भिन्नयोरभेदप्रतिभासाभावस्य पृथक्सिद्धविशेषणविशेष्यभावप्रयुक्तत्वात् । एतेन भेदाभेदावेकत्र न सम्भवतः एकविधिप्रतिषेध्यत्वात्[6] परस्परविरुद्धत्वाद्वा घटतदभाववदित्यपास्तम्; उक्तेन क्रमेण हेतुद्वयस्याप्यसिद्धत्वात् ।

यत्तु विवादाध्यासिते परस्परमभिन्ने न भवतः, अत्यन्तभिन्ने वा भवतः, वस्तुत्वाद्भिन्नत्वाद्वा घटवदित्यादि तादात्म्याभावस्यात्यन्तभेदस्य वानुमानं; तत् सर्वत्र तयोः परस्परपृथक्सिद्धविशेषणविशेष्यत्ववैधुर्याद्व्याप्तेरन्यादृशेषु विशेषविरुद्धत्वादप्रयोजकत्वाच्चाभासीकरणीयम् ।

---

१. कालभेदेन. ग. घ. २. कत्व. ङ. ३. भासत्वमविरुद्धं. क. घ. ४. श्चानु. ङ. ५. भासस्य. क. ६. विप्रतिषे. ख. ङ.

यत्पुनर्जातिव्यक्त्योरभेदे जातेरनित्यत्वं व्यक्तेश्च नित्यत्वं प्रसज्यत इति। तन्मन्दम्; उभयोरुभयरूपत्वेन तत्तद्धर्मयोगस्यापि तत्तद्रूपेणाङ्गीकरणात्।

एतेनैतन्निरस्तम्। यथाहुः—किमनुवृत्ताकारं यत् सामान्यं तदेव व्यावृत्ताकारेण प्रतीयते, व्यावृत्ताकारेण या व्यक्तिः सानुवृत्ताकारेणापि? नाद्यः; तथा सति सामान्यमेव न प्रतीतं स्यात्, व्यावृत्तरूपप्रतीतेः। प्रतीतौ वान्यस्यान्याकारग्रहणं भ्रान्तिः स्यात्। तथा च भेदाभेदवादो भ्रान्तः स्यादिति उभयोरुभयरूपत्वादन्याकारत्वासिद्धेः। ननु किमनुवृत्तिरपि व्यक्तेर्धर्मः व्यावृत्तिरपि जातेः? सत्यम्; अन्योन्यात्मत्वादुभयोरपि तत्तद्रूपेण तत्तद्धर्मयोगित्वमित्युक्तमसकृत्।

यत्पुनः पताकायां बलाकाप्रत्ययस्य पताकाबुद्धिबाध्यत्वमिव जातिव्यक्त्योरभेदप्रत्ययस्य भेदप्रत्ययबाध्यत्वमाशङ्कितं, तन्मदम्। तत्र प्रतीतबलाकोपमर्दनेन पताकाप्रत्ययस्योदयाद् बाधकत्वं, इह तु रूपरसवद्भेदयोस्समुचित्य प्रत्ययान्न कश्चिद् बाधकः न कश्चिद्बाध्यश्चेति विवेकात्।

यत्तु फलरसयोस्तादात्म्ये फलपरिच्छेदे रसस्यापि परिच्छेदप्रसङ्ग इति। तन्मन्दम्; फलरसयोः समवायेऽपि फलपरिच्छेदे रसस्यापि परिच्छेदप्रसङ्गात्। समवायसाम्येऽपि परस्परभेदादवगमसामग्रीभेद इति चेत्, न; तुल्यत्वात् तदात्मनोरवगमसामग्रीभेदो विरुध्यत इति चेन्न; समवायिनोरपि विरुद्धत्वात्। तत्र दृष्टत्वादविरोध इति चेत् तदात्मनोरप्यवगमसामग्रीभेदस्य दृष्टत्वादविरोध इति सर्वं समानम्।

---

१. स्याकारग्रहणं. घ. २. कारं ग्रहणं. ङ. ३. त्मकत्वात्. ख. घ. ङ. ४. तथा. घ.

ननु सामानाधिकरण्योपपादनाय समवाय एव कल्प्यताम्। मैवं; प्रागुक्तन्यायेन तत्कल्पनस्य प्रमाणविरुद्धत्वात्, अविरोधेऽपि समवायस्य सामानाधिकरण्योपपादकत्वादर्शनात् तादात्म्यस्य च हस्तः कर इत्यादौ तदुपपादकत्वदर्शनात्।

यत्तु फलस्य रस इत्यादौ व्यभिचारादभेदस्य सामानाधिकरण्योपपादकत्वाभाव इति। तन्मन्दम्; व्यापकस्य व्याप्यनियमाभावात्। अभेदो हि सामानाधिकरण्यव्यापकः[1], न पुनरभेदव्यापकं सामानाधिकरण्यम्। न च क्षित्यादिगोचरकर्तृसद्भावस्य कार्यलिङ्गकानुमानं[2] व्यापकमिति तदुदयादेव योग्यानुपलम्भसम्भव इति वाच्यम्। अतो द्रव्यजातिगुणकर्मणां स्वाश्रयैस्तादात्म्यमेव, न समवाय इति सिद्धम्।

इति तादात्म्यवादो नाम षोडशवादः
समाप्तः।

[अवयविवादः।]

ननु द्रव्यादिपञ्चकस्यापरमार्थत्वात् परमार्थसतः स्वलक्षणस्य कथं तादात्म्यम्? न हि रूपादिसङ्घातातिरिक्तं द्रव्यं नाम किञ्चित्। अत एव तदाश्रितानां जातिगुणकर्मणामप्यभावः। नाम्नः पुनः[3] डित्थादिवस्त्वन्तरात्मना[4] भानादसत्यत्वमिति। तदयुक्तम्; अवयविद्रव्यस्य[5] महानेको

---

१. कः पुनरभेद. ङ. २. लिङ्गेनानुमानं. ग. ३. नः सिद्धित्वादिवस्त्वन्तरात्मा भा. ङ. ४. न्तरनात्मा. ख. ग. ५. यवद्र. ख. ग. घ. ङ.

घट इति प्रत्यक्षेण प्रतिभासनात्। नैतत् प्रत्यक्षं, तदाभासत्वादिति चेन्न; बाधकाभावात्। तथा हि—बाधकं भवत् प्रत्यक्षमनुमानं वा भवेत्, प्रमाणस्य सतस्तयोरेवान्तर्भावात्[२]। न तावत् प्रत्यक्षम्; अस्तीति प्रतिभासनात्। [३]नाप्यनुमानम्। यतः—

विलम्बितप्रवृत्तित्वादुत्थाने तदपेक्षणात्।
अन्योन्याश्रयणाच्चात्र नानुमा लभते पदं[४]म्॥

यथा हि तावदेकं सहकारिफलमभिलषतोः द्वयोरेकेन नेदीयसा सादिते [५]तस्मिन्नितरस्य कुण्ठमनोरथस्यानुद्योग एव, तथैकमवयवितत्त्वमस्तित्वेन नास्तित्वेन[६] च विषयीकर्तुं[७] प्रवृत्तयोः प्रत्यक्षानुमानयोः आश्रयोपलम्भव्याप्त्याद्यनपेक्षत्वेन नेदीयसः प्रत्यक्षादनुमानस्य तदपेक्षत्वेन-दवीयस्त्वात् न तदपहृते विषये प्रवृत्तिः।

किञ्च यद्यदपेक्षोत्थानं न तत् तद्बाधितुमर्हति, अपेक्षते चात्रानुमानं स्वोत्थानाय प्रत्यक्षम्; आश्रयोपलम्भाभावे तन्मूलस्यानुमानस्यैव[८]नुत्थानात्। अपि च अनुमानस्य प्रामाण्ये तद्बलात् प्रत्यक्षमाभासीभवति तदाभासत्वे चाबाधितविषयत्वादनुमानं प्रमाणमिति[१०] [११]दुरुत्तरमितरेतराश्रयम्। अतो वह्निशैत्यानुमानस्यौष्ण्यप्रत्यक्षेणेव पराभिहितानां[१२] [१३]प्रसङ्ग-

---

१. था बाधकं. ख. ङ. २. त्। प्रत्यक्षम्. ङ. ३. नास्याप्यनु. ख. ङ. ४. दम्। तथा ङ. ५. रमभि. ङ. ६. तन्नितरस्य. ख. तन्नितरस्य. ङ. ७. न विषयीकर्तुं. ङ. ८. स्यैव वानुत्थानात्. ग. ९. तद्बाधात्. क. तद्बाधनात्. घ. १०. त्वानुमानं. ङ. ११. ति तदुत्तरोत्तरमितरेतराश्रयम्. ग. १२. भिमतानां. क. १३. प्रसाधनानामेकम्मह०. ङ.

साधनानामेकम्महत्प्रत्यक्षेण[1] बाधितविषयत्वादनुत्थानमेव । प्रसङ्गस्वरूपोपदर्शनन्तु विस्तरभयान्न कृतमिति द्रष्टव्यम् ।

नन्वौष्ण्यप्रत्यक्षमन्यथानुपपन्नत्वाद् बाधकम् । एकम्महत्प्रत्यक्षं पुनरन्यथाप्युपपन्नं इति न बाधकम् । तन्न । न हि प्रत्यक्षं स्वोपपादनाय[2] विषयं[3] कल्पयति, येनान्यथोपपत्त्या परिहियेत । किन्तूपजायमानमेव तद्विषयमुपजायते । कथञ्च महत्त्वसमानाधिकरणैकैकप्रत्यक्षस्यान्यथोपपत्तिरपि ? परमाणुभ्य इति चेन्न; तेषामनेकत्वात्, अमहत्त्वाच्च । न चानेकेषाममहतामेव पुञ्जीभूतानामेकम्महत्प्रत्ययविषयत्वम्; तथा सत्येकम्महत्प्रत्ययस्य[5] सर्वत्र पुञ्जीभूतानेकविषयत्वेन किममी[6] पुञ्जीभूता अनेके, किं वैको महानिति सन्देहस्य निवृत्तिप्रसङ्गात् । न हि वस्तुनस्तत्त्वं जानानस्यानुन्मिषितकोट्यन्तरस्य सन्देहो जायते; तथा सत्यतिप्रसङ्गात् । अनेकनिरन्तरात्मकमहद्ग्रह एवान्यादृशैकमहत्त्वविकल्पोऽयं शुक्तिग्रहे रजतविकल्पवदिति चेन्न; विकल्पस्य निश्चयरूपत्वात् ग्रहणनिश्चययोरन्यादृशत्वेन[7] परस्परमनुगमाभावेन विसंवादादप्रामाण्यप्रसक्तेः । अप्रमाणमेवात्र ग्रहणमपीति चेन्न; बाधकाभावात् । अबाधितत्वञ्च प्रागेव समर्थितम् । न च बाधकान्तराभावेऽप्याशङ्कितदोषत्वेनाप्रामाण्यं, निर्बीजशङ्काया अभावात् । भावे वा सर्वेषामाशङ्कितदोषत्वेनाप्रामाण्या-

---

१. म्महाप्र०. घ. २. स्वोत्पादनाय. घ. ३. षयः क०. ङ. ४. कत्वप्र०. ग. कप्रत्यक्षत्वस्य. घ. ५. स्य पुञ्जी०. घ. ६. किमपुञ्जीभूता अनेके. ख. ङ. ७. त्वे परस्परम०. ख. ङ. ८. व च सम०. ग.

पत्तेः । कथन्तर्हि ज्वालैकप्रत्यक्षप्रमाणमित्यवगन्तव्यमिति चेन्न[1]; तदप्रामाण्यावगमोपायस्तु शब्दनित्यत्वसमर्थनावसरे वक्ष्यते ।

इत्यवयविवादो नाम सप्तदशवादः

समाप्तः ।

[परमाणुवादः ।]

एवञ्च प्रत्यक्षसिद्धेऽवयविन्याद्यावयवी सावयवेनानवयवेन वा स्वन्यूनपरिमाणेनारभ्यत इति साधारणप्रमाणं गमयद्वक्ष्यमाणक्रमेण सावयवस्यारम्भकत्वनिषेधकप्रमाणेन प्रतिहन्यते[2] । तदनयोर्विरोधाद्-विरोधायानवयवस्यैवारम्भकत्वकल्पनात् परमाणवोऽपि सिद्धाः । न चारम्भकत्वस्य सावयवत्वव्याप्तेरनवयवस्यारम्भकत्वं प्रमाणविरुद्धम्[3] ; तथा सति मातङ्गमशकयोरनन्तावयवपरिप्रापितत्वाविशेषेणावयवसंख्याभूयस्त्वाल्पत्वनिबन्धनस्य महदणुभेदस्य गुरुलघुभेदस्य[4] चानुपपत्तिः[5] । अम्बरादौ परिमाणतरतमभावस्य विश्रान्तिव्याप्तिसंविरोधश्चेत्यादिबहुबाधादेकबाधस्य लघुत्वात् तत्पक्षपातिन्यार्थापत्त्यैवान्यत्र सावयवस्यैवारम्भकत्वदर्शनेऽपि तद्बाधेनानवयवस्यैवारम्भकत्वकल्पनात्[6] ।

एताभिरेव युक्तिभिरन्तर्भावितावयविनां परमाणूनां सिद्धेः कल्पकाभावोऽपि परिहर्त्तव्यः ।

किन्तु वातायनविवरविनिर्गतदिनकरकरनिकरमध्याध्यवसीयमानपदार्थातिरेकिणो न परमाणूनाद्रियामहे । तेषां महत्त्वादवयवबहुत्व-

---

१. चेत् तद०. ङ. २. यवारम्भकत्व०. ग. ३. त्वप्राप्तेर० ङ. ४. नन्तरावयव०. ङ. ५. रुभेदस्य चानु०. ङ. ६. स्य वानुपपत्तिः. ग. ७. धात्तद्बाधस्य. ग. ८. वस्यारम्भ०. घ.

मन्तरेण तदनुपपत्तेः तदतिरिक्तपरमाणुकल्पनमिति चेन्न; तेषां महत्त्वस्यासिद्धेः। द्रव्यत्वे सति प्रत्यक्षत्वात् महत्त्वं साध्यमिति चेन्न; कार्यद्रव्यमहत्त्वस्य प्रत्यक्षावयवत्वप्रयुक्तत्वात्। अन्यथा साधर्म्यमात्रेण प्रत्यवस्थाने यत् महदारभ्यं तत् महदारब्धमेवेति दर्शनाद् द्व्यणुकस्यापि महत्त्वप्रसङ्गात्। अथ कथञ्चित् साधर्म्येण द्व्यणुकस्यापि महत्त्वसिद्धौ तदवयवानामपि तथैव महत्त्वसिद्धेरणुपरिमाणतरतमभावस्य न क्वचिदपि विश्रमः, तर्ह्यस्मदभिमतानां परमाणूनामदृश्यावयवानामपि कथञ्चित् साधर्म्यमात्रेण सावयवत्वमहत्त्वयोस्सिद्धौ तदवयवानामपि साधर्म्यान्तरेण तयोः सिद्धिः, एवं तदवयवानामपीति न क्वचिदणुपरिमाणतरतमभावस्य विश्रम इति समानम्।

एतेन द्व्यणुकादिक्रमेण स्थूलारम्भोऽपि प्रमाणाभावान्निरस्तो वेदितव्यः। यद्वा प्रमाणबलमाश्रित्य परमाणूनामतीन्द्रियत्वं द्व्यणुकादिक्रमेणारम्भकत्वमित्यादिसिद्धावपि नास्माकं किञ्चिदनिष्टमिति किं तन्निरासप्रयासेन। सिद्धास्तावत् परमाणवः, सिद्धश्च तदारब्धश्चतुर्विधमवयविद्रव्यम्।

इति परमाणुवादो नामाष्टादशवादः
समाप्तः।

[तमोवादः।]

एवं प्रत्यक्षबलात् पृथिव्यादिवत् पञ्चममपि तमोऽवयविद्रव्यं सेद्धुमर्हति। ननु रूपवतः तमसः चाक्षुषत्वे तेनानेकद्रव्यारब्धेन भवितव्यम्।

---

१. साध्यधर्म्य. ङ. २. णुतमभावस्य. घ. ३. रब्धं चतुर्विधद्रव्यमवयवद्रव्यम्। ख. रब्धं अवयविद्रव्यम्। घ. ४. यवद्रव्यम्। ग. ङ. ५. यवद्रव्यं. ख. ग. ङ.

न चास्यारम्भकद्रव्याणि सन्ति, सन्ति चेत् तेजोदेशेऽप्यारभेरन्। मैवम्; स्पष्टदृष्टकार्यबलेन तदारम्भकाणां परमाणूनामपि सिद्धेः। न चैं तामसपरमाणूनामन्यत्रादर्शनेनानारम्भकत्वम्; पृथिव्यादिपरमाणूनामप्यनारम्भकत्वप्रसङ्गात्, स्पष्टदृष्टकार्यानुपपत्तिकल्प्यतायाश्चोभयत्रापि समानत्वात्। न च सत्त्वे तेजोदेशेऽप्यारम्भः; तस्य विरुद्धत्वात्।

यत्पुनस्तेजोविरुद्धं जलं दृष्टं सालोके देशे कार्यारम्भकमिति। तन्मन्दम्; जलस्यैं स्वाधिष्ठानतेजोविरोधेऽप्यालोकविरोधित्वाभावात्, तमसश्चोभयविरोधित्वात्। न च मन्दालोके मन्दस्य तमसोऽप्यनारम्भः; तस्य निबिडावयवतमोमात्रविरोधित्वात्। न चैवमादिकल्पनाभयात्तम एवापलपनीयम्; द्व्यणुकादिक्रमेणारम्भस्य भूयसः कल्पनाभयेन पृथिव्यादेरप्यपलापप्रसङ्गात्। न च नीलन्तम इति बुद्धिर्भ्रमः; बाधकाभावात्। न च भ्रमोऽपि निर्बीजः सम्भवति। न चालोकादर्शनमेव बीजम्; सुषुप्तावपि प्रसङ्गात्। न चोन्मीलिताक्षस्यालोकादर्शने नीलद्रव्यं सामान्यतः-स्मरतः स्मृतित्वमगृह्णतो नीलं तम इति व्यवहारः; निरधिष्ठानभ्रमानुपपत्तेः। न ह्यनवगतशुक्तिशकलं स्मरन्नपि रजतत्वं भ्राम्यति। न च वेत्तृतया प्रकाशमानमात्मस्वरूपमन्यद्वा किञ्चिदधिष्ठानम्; तस्यैव तमस्त्वेन प्रतीतिप्रसङ्गात्। एतेन विशिष्टालोकविषयचाक्षुषप्रतीति-

---

१. म्भकाणि सन्ति. ङ. २. च कारणपर०. ग. घ. ३. मू; तामसपर. घ. ४. शेऽपि कार्या०. घ. ५. स्य साधि०. क. ग. स्य साधिष्ठानं तेजोवयवविरो०. ख. ङ. ६. देरपलाप. ग. ७. तू। नचोन्मीलिताक्षस्य. ङ. ८. लोकदर्शन. घ. ९. स्मृतिमगृ. ङ. १०. न विभ्रमा०. घ. ११. कलस्मरणेऽपि. घ.

प्रतियोगिकात्मस्वरूपोपलम्भात्तमोव्यवहार इत्यपास्तम्; आत्मोपलम्भस्य नैल्यस्मृत्या भेदाग्रहेऽहं नीलमिति व्यवहारप्रसङ्गात्। अत एव नालोकाभावोऽपि तमः; नैल्यस्य भावरूपस्याभावे समारोपानुपपत्तेः प्रतियोगिस्मृत्यनपेक्षावगमस्याभावरूपत्वायोगाच्च। यत्पुनस्तमसि भावरूपे ग्राहकानुपपत्तिरित्युक्तं, तदयुक्तम्; चक्षुष एव ग्राहकत्वात्। न चान्यत्रालोकसहकृतस्यैव[२] चक्षुषः प्रवृत्तेरितरसहकृतस्य[३] न प्रवृत्तिरिति वाच्यम्; आलोकविषयज्ञानस्याचाक्षुषत्वप्रसङ्गात्[४]। न च तत्र विषयत्वेनापेक्षत एवेति वाच्यम्; विषयत्वेनापेक्षणेऽपि तदितरसहकारित्वेनानपेक्षणादचाक्षुषत्वस्य तादवस्थ्यात्।

अथान्यत्र चक्षुष आलोकसहकृतस्यैव कारणत्वेऽप्यालोकविषयसाक्षात्कारे[५] इन्द्रियान्तरकल्पनं गौरवायेति रूपरूपिणोर्दृष्टशक्तित्वेनालोकसहकारानपेक्षस्य चक्षुष एव कारणत्वं कल्प्यम्, तर्हि तमस्यप्यन्यत्र दृष्टशक्त्यनुसारेण लाघवसाम्यादालोकसहकारानपेक्षं चक्षुरेव ग्राहकं कल्प्यम्। तथा च चक्षुष आलोकापेक्षत्वमालोकतमसोरन्यत्रैवेति व्याप्तेः सङ्कोचमात्रं, न पुनरतिविघटनं[७] स्यात्। एवञ्च पटलपिहितलोचनस्य पिहितलोचनस्य च तत्तदावरणद्रव्यच्छायाश्चक्षुर्ग्राह्यातीति[९] न नीलबुद्धेरनवक्लृप्तिः। तस्य चात्यन्तासन्नस्य ग्रहणान्महत्वभ्रमोऽप्युपपन्नः। चक्षुषः

---

१. त्वाच्च. ङ. २. व प्रवृत्तेर०. घ. ३. त्तेरेतस०. ख. ङ. ४. नस्य चाक्षु. ख. ग. ङ. ५. रेन्द्रियान्तर०. ख. रे क्रियान्तर०. ङ. ६. कापेक्षित्व०. क. ७. नरविघ०. क. घ. ८. स्य च तत्त. ख. स्य तत्त. ङ. ९. ह्यात न नीलबुद्धेरसनं क्ल. ख. ह्यातीति नील. घ. ह्याति न नीलबुद्धेरसनक्लप्तिः. ङ.

प्रसरद्रश्मित्वेनैव ग्राहकत्वमिति नियमस्तु गोलकवद्दिष्ठवस्तुग्रह एवेति तदभावे तन्नियमोऽपि नास्ति। पक्ष्मणोरग्रहणन्तु पिधानवेलायामालोकाभावादन्यदार्जवस्थित्यभावात्। अन्धानां पुननीलबुद्धिरेवासिद्धा। 'तमसीव प्रविष्टोऽह'मित्यादिवाक्यमदृष्टानामपि यथा वाक्यान्तरश्रवणपूर्वकं 'ममृतमिव पाथः पीत'मित्यादि तथेति मन्तव्यम्।

एवञ्चान्यत्र रूपवतामेवारम्भकैस्पन्दकत्वनियमेऽपि यथा स्पष्टदृष्टकार्यानुरोधाद्वायोररूपस्यैव तदुभययोगित्वम्, तथैव स्पष्टदृष्टकार्यानुरोधादस्पर्शस्यापि तमसो रूपवत्त्वेन तदुभययोगित्वम्। तथा च रूपस्पर्शयोरन्यतरदुभयं वा यस्य तस्यैवारम्भकत्वस्पन्दौ नान्यस्येति व्याप्तिरपि शिक्षिता भवेत्। ततिसद्धं रूपसंख्यादिगुणानामुत्क्षेपणादिकर्मणां चाश्रयस्तमो द्रव्यान्तरमिति।

यद्वा पृथिव्या एव तत्र तत्र सूक्ष्मरूपेणावस्थिताया विशिष्टालोकावगमोद्भूतकृष्णरूपं तमः। न च पृथिवीगुणस्य गन्धसहकृतत्वात्तदभावे तद्गुणत्वहानिः; पृथिवीगन्धस्य रूपेणापि सहकृतत्वात् तदभावे केतकीगन्धस्यापि पृथिवीगुणत्वहानिः स्यात्। गुणपक्षेऽपि ग्राहकानुपपत्तिर्द्रव्यपक्षोक्तयुक्तिभिरेव परिहर्तव्या। तदयं तात्पर्यार्थः—तमो द्रव्यगुणयोरेवैकां विधामनुभवति, न पुनर्विधान्तरमिति।

इति तमोवादो नामैकोनविंशो वादः

समाप्तः।

---

१. ग्रहण एव. क. ख. घ. २. दन्यार्जवस्थित्यभावात्. ङ. ३. णममृतमिव. घ. ४. वंममृतमिव. ख. ग. ङ. ५. कत्वस्पन्दत्व. घ. ६. न्दौ अन्यस्येति. ङ. ७. त्र सूक्ष्म०. ख. ग. घ. ङ.

[जातिनिर्णयवादः ।]

प्रकृतमनुसरामः सिद्धन्तावद्द्रव्यकल्पनायाः परमार्थत्वम् । जातिकल्पनापि परमार्थैव । ननु कथं परमार्था जातिः ? सा हि भवन्ती व्यक्तेरभिन्ना भिन्ना वा भवेत् । न प्रथमः; जातेरपलापप्रसङ्गात्, न द्वितीयः; यद्यतो भिन्नं न तत् तत्सामान्यम्, यथा गोरश्वः, भिन्नश्च पराभिमतं सामान्यं स्वलक्षणेभ्य इति । तदयुक्तम्; जातिव्यक्त्योर्भेदाभेदसमुच्चयाश्रयणेनासमुच्चितैकैकनिबन्धनदोषस्यानवकाशात् । न च विरुद्धत्वादेवासमुच्चयः; तद्विरोधस्य प्रागेव निरस्तत्वात् । अत एव भेदाभेदाभ्यामनभिधेयत्वादवस्तुत्वमित्यपास्तम्; समुच्चिताभ्यामुभाभ्यामप्यभिधेयत्वात् ।

स्यादेतत्, सामान्यं सर्वगतं व्यक्तिगतं वा ? न सर्वगतम्; सर्वत्रोपलब्धिप्रसङ्गात् । न व्यक्तिगतम्; व्यक्तेः पूर्वं तत्रासतः सामान्यस्य तत्कालोत्पन्नया व्यक्त्या नित्यत्वेन तत्रानुत्पन्नस्य सम्बन्धानुपपत्तेः । व्यक्त्यन्तरादागत्य सम्बन्ध इति चेत् न; निष्क्रियत्वाद्व्यक्त्यन्तरेऽनुपलब्धिप्रसङ्गाच्च । नचांशेनागत्य सम्बन्धः; निरंशत्वात् । एवं व्यक्तिनाशे न तत्रैव तिष्ठति; अनुपलम्भात् । न नश्यति, नित्यत्वात् । न गच्छति, अमूर्तत्वात् । यथाहुः—

न याति न च तत्रासीदस्ति पश्चान्न चांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥

---

१. नापि द्वि. घ. २. त्वादस. ख. ङ. ३. च्चित्याभ्या. ङ. ४. मुभयाभ्या. घ. ५. नुपपन्नस्य. ख. ग. ङ. ६. लम्भ. ख. ग. ङ. ७. त्वादेव व्य. ख. ग. ङ. ८. तू । तथा चाहुः. क. ख. ङ.

इति। तदयुक्तम् ; पक्षद्वयेऽपि विरोधाभावात्। न च सर्वगतत्वे सर्वत्रोपलब्धिप्रसङ्गः ; व्यक्तेरभिव्यञ्जकत्वात्तद्वशेनोपलम्भनियमोपपत्तेः। एवं व्यक्तिगतत्वेऽपि व्यक्त्युत्पादापायहेतुभिरेव जात्यन्वयोत्पादापाययोरुपपत्तिर्द्रष्टव्या। अन्यत्र स्थितस्यान्यत्रान्वयो गतिपूर्वक एवेति नियमाद् गतिनिवृत्तावन्यत्रान्वयस्याऽपि निवृत्तिः। एवमनष्टस्योऽपलम्भसामग्र्यां सत्यामनुपलभ्यमानत्वमन्यत्र गतिव्याप्तमिति तन्निवृत्तावनष्टस्यानुपलभ्यमानत्वमपि[1] निवर्तत इति जातेर्नाशप्रसङ्ग इति चेत्, न; तयोर्व्याप्त्योः पृथक्सिद्धवस्तुविषयत्वात्। अन्यथैकत्र व्याप्तिदर्शने सति तदितरत्रापि कथञ्चित् साधर्म्येण तदुपपत्तौ विश्वस्य सङ्करप्रसङ्गात्। अत एवात्यन्तभिन्नेषु कात्स्न्र्यव्यासङ्गयोर्वृत्तिं प्रति व्यापकत्वे[2]ऽपि व्यक्तितदात्मसु जातिषु तयोरभावे[3]ऽपि वृत्तेरनिवृत्तिः; तादात्म्यस्यैव[4] तत्र वृत्तित्वात्, तदात्मसु च कात्स्न्र्यव्यासङ्गयोरनुपपत्तेः[5]। यथोक्तम्—

न हि भेदविनिर्मुक्ते कात्स्न्र्यभागविकल्पनम्।

इति। कथञ्च महिषादिभ्यो व्यावृत्तस्य शाबलेयादिष्वनुस्यूतस्य गौरित्येकाकारस्यावभासो देशकालनरावस्थान्तरेष्वपि पर्यस्तः सामान्यं नाङ्गीकारयेत्? न च विचित्रस्वभावाः स्वलक्षणा एवानुवृत्तैकावभासं जनयन्ति; तेषां व्यावृत्त्यैकरसत्वात्। न च व्यावृत्त्यैकरसा अपि स्वभावादेव तादृशावभासं जनयन्ति; तथा सति परस्परव्यावृत्तानेकाकारावभासं

---

१. पि न वर्तते इति. घ. पि निवर्त्तक इति. ङ. २. त्वे व्यक्ति. ङ. ३. पि प्रवृत्तेर. क. घ. पि वृत्तेरपि निवृत्तिः. ख. ङ. ४. व वृत्तित्वात्. क. ५. योरुप. ग. ६. रान्तरेष्वपि. घ. ७. वृत्तैक. क. ख. ङ. ८. वृत्तैक. क.

भासजनकत्वस्वभावानुपपत्तेः । उपपत्तौ विरुद्धधर्माध्यासेन स्वलक्षणेभ्यो भेदप्रसङ्गात् । न चैकार्थक्रियाकारित्वोपाधिकोऽयमनुवृत्तैकावभासः; विश्वं व्यावृत्तैकरसं ब्रुवाणस्यार्थक्रियास्वप्येकाकाराभावात् । भावे वा सामान्याश्रयणापत्तेः एतेनैकदर्शनहेतुत्वादेकत्वमप्यपास्तम्; दर्शनानामपि प्रतिस्वलक्षणं भेदात् । न चैकप्रत्यवमर्शहेतुत्वेन दर्शनानामैक्यम्; प्रत्यवमर्शस्यापि प्रतिदर्शनं भेदात् । न चैकविषयत्वात् प्रत्यवमर्शानामैक्यम्; प्रत्यवमर्शा हि विकल्पाः ते च स्वाकारमात्रमध्यवस्यन्ति । स्वाकाराश्च प्रत्येकविलक्षणा इति ।

न चानादिवासनावशात् बाह्यत्वेन स्वाकारमध्यवस्यन्तस्तन्मात्रनिष्ठत्वात् तद्भेदमनध्यवस्यन्तो विकल्पा एव तत्रैकत्वमारोप्यैकविषयं भजन्त इति वाच्यम्; विकल्पानां स्वाकारमात्रनिष्ठत्वेन भेदानध्यवसायादेकत्वारोपे गोविकल्पस्य गोविकल्पान्तरेणेव तुरगविकल्पेनापि भेदानध्यवसायसाम्यादेकत्वारोपेण तुरगस्य गोत्वप्रसङ्गात् । कश्च भेदानध्यवसायादेकत्वमारोपयेत्? न तावद्विकल्पा एव; तेषां स्वाकारमात्रनिष्ठत्वात् । अतः प्रतीतिगोचरतया प्रत्येतव्यगोचरतया वा सामान्यानङ्गीकारे न कथञ्चिदनुवृत्तैकाकारप्रतिभासोपपत्तिः ।

किञ्च अनन्तासु व्यक्तिषु सङ्केतग्रहणाभावाद्वाचनिकव्यवहारानुपपत्तेः सौगतस्य मूकत्वमेव प्राप्तम् । एवञ्च सर्वथा सामान्याभावाद्व्यावृत्तैकरसेषु विशेषेषु व्याप्तिसंवेदनस्यैवानुपपत्तेः सामान्यापह्नवे

---

१. कत्वेन स्व. ख. कत्वे स्व. ङ. २. वापत्तेः- घ. ३. त्वमपास्तम्; ख. ग. ङ. ४. रमात्रमध्य. क. ५. मध्यव. घ. ङ. ६. भेदेनाध्य. ग. ७. रे वा कथ. ख. रे वा न कथ०. क. ८. वृत्त्येक. ङ. ९. वे तासमेवा. ग.

स्वासामेवापह्नवेन तदपह्नवायोत्थातुं[1] न व्याप्तयः प्रभवन्तीति व्याप्ति-मूलानां प्रसङ्गसाधनानामप्यनुत्थानमेव।

न चातद्व्यावृत्तेरेकत्वात् तद्बलेन व्याप्त्युत्थानं; अगोरगोनिवृत्ते-श्चोभयोरपि परस्परनिषेधरूपत्वे परस्परप्रतियोगित्वेन परस्परावगम-सव्यपेक्षयोरन्योन्याश्रयापत्तेरगोनिवृत्तिपदेनापि विधिरूपस्य गोत्ववस्तुन एवोपादानात्। यथोक्तम्—

अगोनिवृत्तिस्सामान्यं वाच्यं यैः परिकल्पितम्।
गोत्वं वस्त्वेव तैरुक्तमगोऽपोहगिरा स्फुटम्॥

इति। अँयञ्च वादः प्राचीनैरेव प्रपञ्चित इति नास्माभिः प्रयस्यते।

इति जातिनिर्णयवादो नाम विंशवादः
परिसमाप्तः।

[महासामान्यवादः।]

तदेवं सिद्धेऽपि सामान्यस्य परमार्थत्वे तदङ्गीकारस्य पूर्वाकारावमर्शनिबन्धनत्वात् तदभावेन सत्त्वशब्दत्वब्राह्मणत्वादीनामभाव इति केचिदाहुः। तदयुक्तम्; पूर्वाकारावमर्शस्यात्रापि भावात्। कः खलु पूर्वाकारावमर्शः, किं पूर्वानुभूतेष्वाकारेषु कतिपँयानामवमर्शः, किं वा सर्वेषाम्?

---

१. तुं व्याप्तयः ख. तुं व्याप्तयः भवन्तीति. ङ. २. अ वयववादः. ङ.
३. पयेषां. क. ख. ग. ङ.

न सर्वेषाम्; गोत्वादेरप्यपलापप्रसङ्गात्। न हि तत्रापि शाबलेयमुपलभ्य बाहुलेयमुपलभमानस्य सर्वैरेव पूर्वाकारैरवमर्शोऽस्ति; तथा सति तयोरेकत्वप्रसङ्गात्। अथ कतिप(येषां? यानां) तर्हि सत्त्वशब्दत्वादेरप्यनपह्नव एव; तत्रापि सर्पपमहीधरयोर्गन्धरसयोश्च सत् सदिति पूर्वाकारावमर्शस्य विद्यमानत्वात्। न च पाचकादिवदेकोपाधिनिबन्धनेयमेकशब्दप्रवृत्तिः; उपाधेरनिरूपणात्। न च प्रमाणसम्बन्धयोग्यता उपाधिः; अनवगतोपाधेरुपहितप्रत्ययाभावेन प्रमाणस्य स्वयमप्यगृहतः स्वसम्बन्धयोग्यताया ग्रहणस्य दूरापास्तत्वात् प्रथमत एव पदार्थे सत् सदिति विकल्पोत्पत्तेरनुपपत्तिप्रसङ्गात्।

किञ्चेयं प्रमाणसम्बन्धयोग्यता प्रतिस्वं भिन्ना अभिन्ना वा? न भिन्ना; सच्छब्दस्यैकनिमित्ताभावप्रसङ्गात्। नाभिन्ना; नामान्तरेण सत्त्वाङ्गीकारप्रसङ्गात्। अपि च प्रमाणसम्बन्धयोग्यताया उपाधित्वेनास्त्यर्थस्याप्यस्तीत्येव व्यवहारप्रसङ्गेन भावाभावविभागभङ्गप्रसङ्गः स्यात्।

ननु मानसम्बन्धस्तद्योग्यता च न द्रव्यादिपदार्थस्वरूपातिरिक्ते। न च स्वरूपाणामानन्त्यात् सङ्गतिग्रहणाभावोऽपि; यद्विधे हि द्रव्यगुणादौ मित्युत्पत्तिस्तत्तत्त्वमित्युपलक्षणोपाधेरेकत्वात्। तदयुक्तम्। यदि तटस्थया

---

१. ब्दवृत्ति. क. २. स्यैव. ख. ३. ङ्गो न भावा. ख, ङ. ४. गप्रसङ्गः स्यात्. ङ. ५. मा नाम सम्बन्धस्तद्योग्यता सा न द्रव्यादिपदार्थः स्वकपातिरिक्ते न च. ग. मानसम्बन्धस्तद्योग्यता न च न द्रव्यादिस्वरूपातिरिक्तौ न च. घ. मा नाम सम्बन्धस्तद्योग्यता च न द्रव्यादिपदार्थस्वरूपातिरिक्ते न च. ख. ङ. ६. रिक्तौ. क. ७. दौ मित्युत्पत्तिः. ङ.

मानसंबन्धयोग्यतयोपलक्षितं स्वरूपमेव सत्त्वं तर्हि द्रव्यादिस्वरूपावगतावस्तित्वनास्तित्वसन्देहो न जायेत। नहि घट इति जानानस्य कुम्भो न वेति सन्देहो जायते। तथा सच्छब्दस्य द्रव्यादिशब्दानाञ्च परस्परं घटकुम्भशब्दवत् पर्यायत्वापत्तिश्च। न च वर्तमानकालसम्बन्धित्वमेव तत्रास्तित्वम्। अस्तित्वस्यैव त्रैकाल्यान्वयदर्शनात्। न च सदस्तिपदवाच्यस्य सामान्यरूपत्वे तस्य नित्यत्वात् त्रैकाल्यान्वयाभावः; तत्संबन्धस्यानित्यत्वात्। तस्यैव च त्रैकाल्यान्वयदर्शनात्। अतो द्रव्यगुणकर्मसामान्येष्वबाधितायाः सत्सदिति शब्दप्रवृत्तेरेकस्योपलक्षणरूपस्य विशेषणरूपस्य चोपाधेरभावात् तन्निबन्धनत्वेन सत्वं सिद्धम्।

काश्यपीयाः पुनः सामान्ये सामान्याश्रयणेऽनवस्थापत्तेर्द्रव्यगुणकर्मस्वेव सत्त्वमित्याहुः। तदयुक्तम्; सत्त्वस्य सामान्यान्तरसमवायित्वेऽपि स्वसमवायिसामान्याभावपरिकल्पनेनैव प्रागुक्तदोषनिवृत्तेः।

यत्पुनरवान्तरसामान्यवतामेव सत्त्वान्वयदर्शनात्तद्रहितानामनन्वय इति। तदयुक्तम्; द्रव्यत्वयोगिनामेव सत्त्वान्वयदर्शनाद्द्रव्ययोर्गुणकर्मणोस्तदनन्वयप्रसङ्गात्। अथ द्रव्यवद्गुणकर्मणोरपि सत् सदिति प्रतीतिप्रयोगयोर्दर्शनाद्द्रव्यत्वयोगिन एव सत्त्वसम्बन्ध इति व्याप्तेरप्यनुत्थानम्, तर्हि द्रव्यादिष्विव सामान्येष्वपि तादृशप्रतीतिप्रयोगयोर्दर्शनेनावान्तरसामान्ययोगिन एव सत्तासम्बन्ध इति व्याप्तेरप्यनुत्थानम्।

---

१. द्रव्यापगत. ङ. २. दिगतस्वरूपाव. ख. ३. त। न घट. ङ. ४. न वर्तमान. ङ. ५. व तत्रैका. ख. ग. ६. यभानात्. घ. ७. त्। अतो द्रव्य. ग. ८. त्वे तत्र नि. ङ. ९. दन्वय. ख. ङ.

न चोपचारतस्तत्र सच्छब्दप्रवृत्तिः ; गुणकर्मणोरपि तथाभावप्रसङ्गात् । एतेन सामान्येषु[1] सत्ताश्रयणे तद्व्यापकं सामान्यत्वमवान्तरसामान्यमपि[2] स्यात्, ततश्च तस्यापि तदन्वयाय सामान्यान्तराश्रयणादनवस्थाप्रसङ्ग इत्यपास्तम् ; उक्तेन न्यायेन तादृशव्याप्तेरनुत्थानात्, तन्मूलत्वाच्चानवस्थाप्रसङ्गस्य । ततसिद्धं द्रव्यादिचतुष्टयवर्त्ति[3] सत्त्वं महासामान्यम् ।

इति महासामान्यवादो नामैकविंशवादः

समाप्तः ।

[अवान्तरजातिवादः ।]

एवमपूर्वशब्दश्रवणे श्रोत्रग्राह्यत्वभङ्गेनानुसन्धानस्यैव झटित्यपूर्वोऽयं शब्दः न श्रुतपूर्व इति प्रतीतिप्रयोगदर्शनेन[5] शब्दप्रवृत्तावुपलक्षणत्वेन विशेषणत्वेन वा श्रोत्रग्राह्यत्वस्योपाधिभावानुपपत्तेः शब्दत्वमपि सिद्धम् । न च तदेव श्रोत्रग्राह्यत्वमवगम्य प्रतीतिप्रयोगयोरुपपत्तिः ; अप्रतिबद्धेन्द्रियान्तरसन्निधौ श्रोत्रैकनिबन्धनत्वस्य दुरवगमत्वात् । एवं रूपरसगन्धस्पर्शेषु रूपादिशब्दानां प्रवृत्तौ नयनाद्येकैकग्राह्यत्वमुपाधिरित्यपास्तम् ; परमाणुरूपादिषु नयनाद्येकैकग्राह्यत्वानुपपत्तेस्तेषामरूपादित्वप्रसङ्गात्[9] । न च रूपादित्वात् तेषामपि प्रत्यक्षरूपादिवन्नयनाद्येकैकग्रहणयोग्यत्वमस्तीति वाच्यम् ;

---

१. णेऽपि त. ख. २. न्यवत्त्वम. घ. ३. वर्त्ति महासामान्यमिति. घ. ४. मनुस. ङ. ५. गयोर्दर्शनेन शब्दप्रवृत्तावुपलक्षणत्वेन वा श्रोत्रग्राह्यस्योपाधि०. घ. ६. ह्यस्योपा. ख. ङ. ७. बन्धेन्द्रिया. घ. ङ. ८. ग्राह्यमु. ग. ग्रहमु. ङ. ९. दिमत्त्वप्र. क. ख. ग. घ.

रूपादित्वान्नयनाद्यैकैकग्रहणयोग्यतावगतौ तस्यैव तत्त्वेनात्माश्रयापत्तेः। कथञ्च नित्यपरोक्षस्य कथञ्चित् साम्येन नयनाद्यर्हत्वमनुमेयम्? एवं सति वस्तुत्वेन सर्वस्य तदर्हत्वापत्तौ किञ्चित्तदर्हं किञ्चित् तदनर्हमिति विभागानुपपत्तेः। तथा ब्राह्मणशब्दानुवृत्तेर्ब्राह्मणत्वं सेद्धुमर्हति।

न च सन्ततिविशेषजस्त्रीपुंसव्यतिकरजन्मक्रियोपलक्षणतस्तदनुवृत्तिः; सन्ततिविशेषाणामानन्त्यात्तदुद्भवस्त्रीपुंसव्यतिकरजन्मक्रियाणामप्यानन्त्येनैकशब्दप्रवृत्तानुपलक्षणत्वेनाप्युपाधित्वानुपपत्तेः। न च तेषां लोकप्रसिद्धितो गुणत्वेनैकवर्गीकरणादुपाधित्वम्; लोकप्रसिद्धितोऽप्येकं सामान्यमुपाधिं वानुपदिश्य भूयसामेकवर्गीकरणानुपपत्तेः। न ह्येकदेश्यमैककाल्यमैककार्यमित्यादि किञ्चिदेकमननुबध्नतां भूयसामेकीभावः सम्भवी। न च ब्राह्मणभूतमातापितृजातत्वं ब्राह्मणशब्दप्रवृत्तौ निमित्तं, उपलक्ष्यस्योपलक्षणत्वेनात्माश्रयप्रसङ्गात्।

एतेन मातापितृगतो ब्राह्मणपदप्रयोगः पुत्रगामी तत्पदप्रवृत्तौ निमित्तमित्यपास्तम्; एकत्र प्रयोगस्यान्यत्र प्रयोगनिमित्तत्वानुपपत्तेः। एकशब्दस्य सर्वानुगतैकनिमित्ताभावेन नानार्थत्वानुपपत्तेश्च। न चोन्मी-

---

१. जक्रियोप. ग. २. तत्तदनु. ग. तदनु. घ. ३. सजन्य. ख. ङ. ४. न ह्येकदेश्यमेककाल्यमैककार्य. ख. न ह्येकदेश्यमेककाल्यमेककार्य. ङ. ५. कं पुनरनुबध्नतां. ङ. ६. तृजन्तुत्वं ब्रा. ख. तृजत्वन्तत् ब्रा. ग. तृजन्तत्वं ब्रा. ङ. ७. यत्वप्र. ख. ग. ङ. ८. णगणपद. ख. ङ. ९. मि. क. ख. घ. ङ. १०. सर्वगतानुगतैक. ग. ११. मित्ते भावेन. ग.

लितांशस्य झटिति नरान्तरव्यावृत्ततया[1] ब्राह्मण्यमतिभासमानं कथमक्षि-गोचर[2] इति वाच्यम् ; अविप्लुतब्राह्मणमातापितृजत्वोपदेशसहकृतेन चक्षुषा तदवगमात् । एवमेव सामान्यान्तराण्यपि शङ्किततत्तदुपाधिनिरासेन समर्थनीयानीत्यलमनेन । सिद्धन्तावज्जातेरपि परमार्थत्वं ; जातिवदेव गुणकर्मणोरप्यबाधितप्रत्यक्षविषयत्वात्, तद्बलेन परमार्थत्वमेषितव्यम् ।

यत्पुनर्नाम्नो डित्थादिवस्त्वन्तररूपेण भानादपरमार्थत्वमिति, तदयुक्तम् ; वस्त्वन्तररूपेण भानासिद्धेः । न हि डित्थादिनामरूपं वस्तु चकास्ति, किन्तु डित्थादिवाचकस्मारितवाच्यरूपम् ; तच्च वस्तुनः स्वरूपमेवेति नातद्रूपारोपः । तस्मात् कल्पनाकाराणामपि परमार्थत्वात् स्वलक्षणस्य तद्योजनमपि परमार्थरूपमेवेति सिद्धम् ।

इत्यवान्तरजातिवादो नाम द्वाविंशवादः
समाप्तः ।

[भेदवादः ।]

औपनिषदास्तु[3] प्रत्यक्षादेः प्रमाणजालस्य भेदप्रपञ्चविषयत्वनिराकरणद्वारेण तदविरुद्धविषयतया वेदान्तवाक्यानां सद्द्वैतनिष्ठत्वं प्रतिपादयन्तो भेदप्रपञ्चमेवापलपन्ति । तथा हि—न तावत् प्रत्यक्षं भेदविषयं

---

१. व्याप्ततया ब्रा. ग. ङ. २. णभूतभाता. ग. णभूतमातापितृजन्तत्वोप, ख. ङ. ३. षदपदास्तु. ख. ङ.

तद्धि भेदं गोचरयद्भेदमात्रं गोचरयेद्वस्त्वपि वा ? न तावद्भेदमात्रम् ; अनवधृतव्यवच्छेद्यव्यवच्छेदावधेर्व्यवच्छेदबुद्ध्यनुत्पत्तेः। अथ वस्त्वपि ; तर्हि वस्तुपूर्वको भेदग्रहः, किं वा भेदपूर्वको वस्तुग्रहः, यद्वा पर्यायेणोभयग्रहः ? न तावद्भेदपूर्वको वस्तु ग्रहः ; व्यवच्छेद्यव्यवच्छेदावधिग्रहाधीनजन्मनो व्यवच्छेदग्रहस्यतदनुत्पत्तावनुत्पत्तेः। अत एव नापर्यायेणोभयग्रहोऽपि ; समसमयवर्त्तिनोः कार्यकारणभावानुपपत्तेः। न च वस्तुपूर्वको भेदग्रहः ; बुद्धेर्विरम्यव्यापारानुपपत्तेः। न च विध्यन्तरेण व्यवच्छेद्यव्यवच्छेद्यावधिसिद्धौ तयोरेकस्मादेकस्य प्रत्यक्षेण व्यवच्छेदसिद्धिरिति वाच्यम् ; परस्परवार्तानभिज्ञत्वात् पूर्वोत्तरविध्योः। किञ्चेतरेतराभावो भेदः, न च तस्य प्रत्यक्षत्वं सम्भवति ; अभावस्येन्द्रियसम्बन्धानुपपत्तेः। न च पदार्थानां स्वरूपं भेदः ; तथा सत्यभेदैकार्थसमवाय्येकताया भेदविरोधेन किञ्चनैकं स्यादिति तदभावे सत्येकसमाहारात्मकस्यानेकस्याप्यभावे विश्वस्य शून्यत्वप्रसङ्गात्। न च नीलं स्वापेक्षया निरूप्यमाणमेकम्, इतरापेक्षया तद्भेद इति वाच्यम् ; उत्पत्तौ प्रतिपत्तौ वा किञ्चित् सापेक्षं किञ्चिच्च नेति सापेक्षत्वलक्षणविरुद्धधर्माध्यासेन स्वरूपभेदयोः परस्परात्मकत्वप्रसङ्गात्। किञ्च स्वरूपभेदयोरैक्ये नीलं भिन्नं नीलस्य भेद इति वा विशेषणत्वेन सम्बन्धित्वेन च भेदस्यावभासो नीलभेदपदयोरपर्यायत्वावभासश्च विरुध्येयाताम्।

ननु माभूत् स्वरूपं भेदः। भिन्नमेव त्वमुं भेदं भेदिनोऽभ्युपगच्छामः। न च भेदस्यापि भेदान्तरापत्तेरनवस्था ; मूलक्षयाभावेन भेदानवस्थितेरदोषत्वात्। यथाहुः—

---

१. बबुद्ध्यनुपपत्तेः. घ. २. पि किं वस्तुपूर्वको भेदग्रहः. घ. ३. रवित्योः. ग. ङ. ४. या तु भेद. ग.

'मूलक्षयकरीं[1] प्राहुरनवस्थाञ्च दूषणीम्' ।

इति । तदयुक्तम् ; स्तम्भात् कुम्भो भिन्न इति वा कुम्भस्य भेद इति वा विशेषणभावेन[2] विशेष्यभावेन वा भेदस्य प्रतिपत्तेर्दण्डकुण्डलादिवत् भेदेनाप्रतिपन्नस्य[3] च[4] विशेषणविशेष्यभावानुपपत्तेरभावात् भेदस्यापि[5] भेदप्रतिपत्ताववश्याभ्युपगमनीयायां तद्भेदस्यापि तथैव प्रतिभासाभावे प्रथमभेदस्यैवाप्रतिपत्तेर्भवत्येव यतोऽनवस्थितिर्मूलक्षयकरी ।

किञ्च भेदेनाप्रतिपन्नस्य प्रतियोगित्वे स्वस्यापि स्वं प्रति प्रतियोगित्वापत्तेर्भेदेन प्रतिपन्नस्यैव प्रतियोगित्वम् । तथा च स्तम्भस्य भेदसिद्धौ तत्प्रतियोगित्वेन कुम्भस्य भेदसिद्धिः, कुम्भस्य भेदसिद्धौ च तत्प्रतियोगित्वेन स्तम्भस्य भेदसिद्धिरिति दुरुत्तरमितरेतराश्रयम् ।

न च विशेषणभावेन विशेष्यभावेन वा सप्रतियोगिकस्यैव भेदस्य प्रतिभास इति नियमस्य सविकल्पकगोचरतयाङ्गीकरणात् निर्विकल्पिकायां संविदि स्तम्भकुम्भभेदानां विशकलितानामेव युगपदवभासे सति स्तम्भात् कुम्भो भिन्न इति सप्रतियोगिकत्वेन विशेषणत्वेन च सविकल्पकेन भेदस्य प्रतिभासोपपत्तेर्नानवस्था परस्पराश्रयोऽपीति वाच्यम् ; निर्विकल्पिकापि[6] संविन्न प्राथमिकप्रतियोग्याद्यवभासमन्तरेण भेदाध्यवसायिनी प्रत्यक्षत्वात् सविकल्पकवदिति निर्विकल्पकेऽपि तत्पूर्वकत्वनियमसिद्धेः । तत्सिद्धं न प्रत्यक्षं भेदावलम्बनमिति । तथा च लिङ्गाभिधानानुपपद्यमानानां भेदेन प्रतिपन्नानामेव प्रमितिसाधनत्वा-

---

१. रीमाहु- ख. ङ. २. वेनाभे. ङ. ३. देन प्रति. ङ, ४. स्य वि. ङ. ५. भेदे ज्ञानप्रति. ख. भेदेन प्रति- ङ. ६. कल्प. ख.

दुक्तेन क्रमेण भेदेन प्रतिपत्तेरनुत्पत्तेस्तन्मूलानामनुमानागमार्थापत्तीनां[1] भेदविषयत्वं पराकरणीयम्। उपमानं तु सादृश्यमात्रविषयं भेदविषयतया नाशङ्कनीयमेव। अभावोऽपि व्यवच्छेद्यव्यवच्छेदावधिविभागावगमाधीनतया पूर्ववदेव परस्पराश्रयापत्तेर्न भावभेदावभासीति सिद्धं भेदस्य न प्रमाणान्तरगोचरत्वमिति। तथा[2] च स्तम्भादिभेदप्रतिभासानां भेदप्रतिभासत्वादनिरूपितप्रमाणत्वाद्वा चन्द्रभेदप्रतिभासवदेव भ्रान्तत्वमपि न प्रयाससाध्यम्। अतः प्रत्यक्षादिभिरविरुद्धविषयाद् "अद्वितीयं ब्रह्मात्मे"त्यादिवाक्यात् सिद्धमद्वितीयं ब्रह्मेति। अत्रोच्यते—

प्रतीतो वा न वा भेदो न चेत् कीदृङ्निषिध्यताम्।
प्रतीतश्चेदबाध्यस्य कुतस्सत्त्वमपोद्यताम्॥

अत्रेदमद्वैतवादी प्रष्टव्यः[4]—"किं स्तम्भकुम्भौ वादिप्रतिवादिनौ साध्यसाधने दूषणभूषणे चेत्यादीनां मिथो भेदः परमार्थरूपो विद्यते न वे"ति। यदि विद्यते, तर्हि जितमस्मन्मनोरथेन। अथ न विद्यते तर्हि तत्रापि प्रष्टव्यः[5]—"किमविद्यमानो भेदः क्वचित् कदाचित् कस्यचिद् भासते नवे"ति। यदि न प्रतिभासते न तर्हि न विद्यत इति वक्तुं शक्यम्; अप्रतिभासमानस्य निषेधप्रतियोगित्वानुपपत्तेः। अथ प्रतिभासते तर्हि प्रतिभासमानस्य बाधाभावे परमार्थतत्त्वमनपोदितमिति कथं सदद्वैतसिद्धिः? न च बाधाभावोऽसिद्ध इति वाच्यम्; बाधो हि भवन् प्रमाणेनाप्रमाणेन वा भवेत्। न तावदप्रमाणेन; तस्य बाधकत्वा-

---

१. र्थप्रतिपत्तीनां. ग. २. था न स्तम्भ. ख. ग. घ. ङ. ३. द इति भास. ङ. ४. म्भौ प्रवादि. ख. ङ. ५. ष्टव्यं, घ.

नुपपत्तेः। उपपत्तौ वा द्वैतप्रतिभासेनाद्वैतश्रुतेरपि बाधप्रसङ्गात्, नापि प्रमाणेन; प्रमाणस्य सतः प्रत्यक्षादिष्वेवान्तर्भावात्, अनन्तर्भावे वा प्रमाणत्वानुपपत्तेः।

न च प्रत्यक्षं बाधकम्; तद्धि बाधकं भवद् भेदाभावं गृह्णद्वा भवेद् अभेदं वा गृह्णत्? न तावद्भेदाभावं गृह्णाति; प्रत्यक्षस्य विधिमात्रनिष्ठत्वेन[1] भेदनिषेधकत्वानुपपत्तेः। यथाहुः—

"आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः।"

इति। नापि विरुद्धभेदं गृह्णद्[2] बाधकम्; अप्रतिभासात्। न हि कश्चिदपि स्तम्भकुम्भादीनां परस्परभेदमध्यक्षेणावलयामीत्याचक्षाणो दृश्यते।

न चानुमानं बाधकम्; पक्षसपक्षादिभेदानवभासे[3] पक्षधर्मतया[4] सपक्षे सत्तया विपक्षाद्व्यावृत्ततया चानुसन्धानविधुरस्य[5] साधनधर्मस्य साध्यधर्मविषयबुद्धिजनकत्वानुपपत्तेः। अथानुमोत्पत्तौ पक्षादीनां भेदोऽवभासते, तर्हि तद्विरुद्धत्वात् न भेदाभावमभेदं वा विषयीकृत्यानुमानमेवोदेतुमुत्सहते। न च भेदप्रतिभासस्य भ्रान्तत्वात्तद्विरोधेऽप्यनुमानोत्थानमिति वाच्यम्; अनुमानोत्थाने सति तद्बाधाद्भेदप्रतिभासस्य भ्रान्तत्वं, तद्भ्रान्तत्वे सति तद्विरोधेऽप्यनुमानोत्थानमिति परस्पराश्रयचक्रकयोः[6] प्रसङ्गात्।

---

१. त्वे भे. ग. घ. २. द् अबाधकम्; अप्रतिभासनात्. घ. ३. पक्षे. ख ४. सेन. ख. ङ. ५. स्य बाधनधर्मस्य. ग. ६. मानमिति. ग. घ.

एतेनार्थापत्तेरपि परस्परविभिन्नप्रमाणद्वयविरोधप्रतिभासमूलाया-स्तद्विरोधेन भेदाभावमभेदं वा विषयीकृत्योत्थानमपाकरणीयम्[1]। उपमानं तु सादृश्यमात्रविषयैकत्वात्तद्विषयतया शङ्कितुमप्यशक्यम्।

न च योग्यानुपलब्धिर्भेदाभावसाधनी; स्तम्भकुम्भादीनां परस्पर-भेदस्योपलम्भयोग्यत्वे सति कदाचिदप्यनुपलब्धेरभावात्।

न चाद्वैतश्रुतिः तत्साधनी; तस्या अपि परस्परविलक्षणत्वेन क्रियाकारकादिपदार्थस्वरूपावगमतात्पर्यभेदनिर्धारणाद्यनेकभेदप्रतिभासस-व्यपेक्षाभिधायिन्यास्तद्विरोधे प्रवृत्त्यनुपपत्तेः। तत्प्रतिभासभ्रान्त्या[2] प्रवृत्तिस्तु पूर्ववदितरेतराश्रयापत्तेरयुक्ता। यत्पुनर्भेदप्रतिभासस्यानिरूपित-प्रमाणकत्वाद् भ्रान्तत्वमिति[3], तदतिमन्दम्; भेदप्रतिभासस्याबाध्यत्वे स्थिते तस्यानिरूपितस्य प्रमाणस्य सिद्धप्रमाणेष्वेवान्तर्भावः, अनन्तर्भावे वा सप्तमप्रमाणत्वमेवेति प्राप्तत्वात्। अन्यथा रूपवित्तेर्दर्शनेऽपि प्रथमतश्चक्षूरूपस्य प्रमाणस्यानिरूपणादितरस्य च निरूपितस्य प्रामाण्ये बाधसम्भवादनिरू-पितप्रमाणत्वेन[4] तस्या अबाधितायाः[5] अपि भ्रान्तित्वप्रसङ्गात्। किञ्च भेदप्रतिभासस्यानिरूपितप्रमाणत्वमप्यसिद्धम्; प्रत्यक्षादेः प्रमाणस्य तद्गोचरत्वाङ्गीकरणात्[6]। यत्तु किं वस्तुपूर्वको भेदग्रह इत्यादि; तत्र युगपदु-भयग्रह इति ब्रूमः। कथन्तर्हि भेद्यभेदावधिज्ञानजन्यस्य भेदज्ञानस्य समसमयत्वमिति चेन्नैवम्; भेदविषयस्य निर्विकल्पकस्य भेद्यभेदावधिज्ञान-

---

१. त्थानं पराकरणीयम्. घ. २. यतया तद्वि०. ग. ३. नर्भेदावभासस्यानि. क. ख. नर्भेदावभासस्य निरूपित. घ. ४. स्या बाधिताया अपि. घ. ५. तु। किं. घ. ६. द्यभेदावधिग्रहाधीनजन्मनी भेदज्ञानस्य क.

जन्यत्वनियमासिद्धेः । निर्विकल्पकमपि तन्नियमयोगि प्रत्यक्षत्वात् सविकल्पकवदिति चेन्न; तस्य सविकल्पकैत्वप्रयुक्तैत्वात्[2]। अन्यथा कथञ्चित् साधर्म्येण निर्विकल्पकेऽपि तन्नियमोपपत्तौ सविकल्पकस्य निर्विकल्पकपूर्वकत्वदर्शनान्निर्विकल्पकस्यापि प्रत्यक्षत्वेन सविकल्पकवदेव निर्विकल्पान्तरपूर्वकत्वमनिवार्यं प्रसज्येत । न चैतद्युक्तमिष्टं वा । अत एवानवस्थापरस्पराश्रययोरप्यभावः । विशेषणत्वेन विशेष्यत्वेन वा सप्रतियोगिकस्यैव भेदस्य प्रतिभास इति नियमस्य सविकल्पकैत्वप्रयुक्तत्वेन तदेकगोचरत्वेन व्यवस्थानात् । अतो निर्विकल्पकेन विशकलितप्रतिभासितानां भेदभेदावधीनां सप्रतियोगितया विशेषणविशेष्यभावेन च सविकल्पकेन प्रतिभास इति न किञ्चिदनुपपन्नम् । ननूक्तेन क्रमेण घटत्वपटत्वादिव्यावर्तकधर्मरूपस्य भेदस्याध्यक्षगोचरत्वेऽपि नेतरेतराभावस्याध्यक्षगोचरत्वम्; नयनेन्द्रियसम्बन्धानुपपत्तेरित्युक्तम् । सत्यमुक्तम् । अत एव तस्याभावप्रमाणविषयत्वम् ।

यत्तु व्यवच्छेद्यव्यवच्छेदावधिविभागाधीनज्ञानजन्मनोऽभावप्रमाणस्य परस्पराश्रयापत्तेर्नेतरेतराभावविषयत्वमिति । तन्न; व्यवच्छेद्यव्यवच्छेदावधिभूतयोः स्तम्भकुम्भयोः स्तम्भकुम्भत्वलक्षणभेदयोगित्वेनाध्यक्षेणैव प्रतिभासस्योक्तत्वात्[8]। तथा च स्तम्भतया कुम्भतया च प्रतिपन्नयोः

---

१. कल्पक. क. ख. ङ. २. क्ता व्याप्त्युपजीवित्वात् । अन्यथा. घ. ३. कत्वदर्शनात्. ख. ङ. कपूर्वत्वदर्शनात्. ग. ४. कस्य प्रयुक्तत्वेन तदेव. ख. कप्रयुक्तेन तदेव. घ. ५. नां भेदभेदावधीनां. घ. ६. यस्य सम्बन्ध. घ. ७. भागज्ञानाधीनजन्मनोऽभाव. क. ८. वविषयत्वमिति चेत् न. घ. ९. म्भत्वकुम्भत्वलक्षणयोऽगित्वेन. घ.

स्तम्भकुम्भयोस्तादात्म्यस्यो[१]पलम्भयोग्यत्वे सत्यनुपलम्भादितरेतराभावो-ऽपि स्वध्यवसाय[२] एव।

यत्पुनर्यस्यैकस्वभावं विश्वं तस्य कथं न स्तम्भकुम्भादीनां तादात्म्येनोपलम्भ इत्युक्तम्, तदतिसाहसम्; न ह्यद्वैतवादिनोऽपि स्तम्भकुम्भादीनां तादात्म्यमध्यक्षेणैवेक्षामह इत्याचक्षते, किन्त्वद्वैतश्रुतेरिति। तथा च प्रत्यक्षानुपलब्धिस्सिद्धैव। तस्मात् प्रत्यक्षानुपलम्भाभ्यां प्रपञ्चगोचरतया भेदस्येतरेतराभावस्य[३] च प्रमीयमाणत्वात् तन्मूलानामनुमानागमार्थापत्तीनामपि[४] तत्र तत्र भेदविषयत्वन्नानुपपन्नम्। एवञ्च प्रत्यक्षादिसव्यपेक्षोत्थानत्वेन पदपदार्थसम्बन्धस्मरणादिमुखेन विलम्बितप्रवृत्तित्वेन च दुर्बलस्य[५]द्वैतागमवाक्यस्य पूर्वानपेक्षत्वेन शीघ्रप्रवृत्तत्वेन[६] च प्रवृद्धबलैः प्रत्यक्षादिभिरपहृतविषयस्य "आदित्यो यूप" इत्यादिवाक्यस्येव न यथाश्रुतेऽर्थे प्रामाण्यमङ्गीकर्तुं शक्यम्।

यत्पुनः पराचीनेन[७] नेदं रजतमिति ज्ञानेन प्रसक्तप्रतिषेधाय पूर्वापेक्षोत्थानेनापि प्राचीनस्येदं रजतमिति ज्ञानस्य बाधदर्शनाद्द्वैतवाक्यस्य स्वतः प्रमाणभूतस्य स्वरूपसिद्धौ प्रत्यक्षादिसापेक्षत्वेऽपि स्वविषयनिश्चायकत्वे तदनपेक्षत्वात् प्रत्यक्षादिबाधकत्वमेवेत्यभाणि, तदयुक्तम्; प्रत्यक्षानुपलम्भाभ्यां बाधिते पदानामन्विताभिधानस्यैवासामर्थ्यात्। अन्यथादित्यो यूप इत्यादीनामपि यथाश्रुतेऽर्थे[८] प्रामाण्यप्रसङ्गात्। अत

---

१ स्यौपालम्भ. घ. २. सान एव। क. घ. ३. प्रतीयमाणत्वात्. ख. प्रदीयमानत्वात्. ग. ४. तत्र भेद. ग. ५. दुर्लभस्य. घ. ६. प्रवृत्तित्वेन. क. घ. ङ. ७. नेनेदं. ख. ग. ङ. ८. ते प्रा०. ग. तेऽपि प्रा. ख.

एव पराचीनत्वाद्बाधकत्वमप्यपास्तम्[1]; पराचीनस्यापि वह्निशैत्यानुमानस्य प्राचीनेन बाधदर्शनात् ।

यत्पुनर्नेदं रजतमिति ज्ञानस्य पूर्वापेक्षस्यैव बाधकत्वमित्युक्तम् । तदयुक्तम्; नहि तत्र पराचीनेन स्वोत्पत्तये पूर्वमपेक्ष्यते, किन्तु स्वबाधकत्वाय बाध्यत्वेन । स्वरूपसिद्धिस्तु चक्षुरादिकया सामग्र्यैव । प्रकृते तु प्रत्यक्षादिभिरभिधेयाभिधानतत्सम्बन्धानां भेदसिद्धौ पदानामन्विताभिधानात् स्वरूपसिद्धावेव[2] तदपेक्षत्वमिति विशेषात् ।

एतेन प्रत्यक्षादिविषयस्य तात्त्विकांशे बाधात् सांव्यवहारिकमेव तेषां प्रामाण्यम्, अद्वैतश्रुतेस्तु सर्वथा बाधवैधुर्यात् तात्त्विकमेव प्रामाण्यमिति विभागो निरस्तः; श्रौतज्ञानस्य प्रत्यक्षादिविरोधेऽनुत्थानमेवेत्युक्तत्वात् ।

इति भेदवादो नाम त्रयोविंशवादः
समाप्तः ।

[अद्वैतवादः ।]

किञ्च अद्वितीये ब्रह्मणि प्रमाणमस्ति वा न वा? यद्यस्ति तर्ह्यद्वितीयं ब्रह्म तत्र प्रमाणञ्चास्तीति द्वैतापत्तिः । अथ नास्ति प्रमाणम्, तर्हि कथमद्वितीयस्य ब्रह्मणोऽपि[3] सिद्धिः? प्रमाणाभावात् । अथ प्रमाणस्य माया मयत्वेऽपि सद्द्वितीयविषयत्वात् प्रामाण्यम् । तन्न; प्रमाणगोचरतया सद्द्वितीयविषयत्वस्याप्यपरमार्थरूपत्वात् । परमार्थत्वे वा द्वैतापत्तेः । एतेनैतन्निरस्तम् ।

---

१. स्वमित्यपास्तम् ; क. ब. २. वेतदपेक्षत्वमिति. ख. ङ. ३. ह्मण: सिद्धिः. घ. ४. यस्यापरमार्थ. ग.

यदाहुः—समारोपितदीर्घत्वादिधर्मभाजो वर्णात् पारमार्थिकार्थसिद्धेरलीकात् प्रतिबिम्बात् सत्यबिम्बानुमानसिद्धेश्च दर्शनादद्वैतविषयस्य प्रमाणस्य स्वरूपेण सद्भूतत्वाभावेऽपि प्रामाण्यमविहतमिति। यतस्तत्रापि तत्तदलीकार्थगोचरस्य सत्यरूपज्ञानस्यैव प्रामाण्यम्। न च ज्ञानमात्रस्य दर्शनादलीकरूपस्य विषयस्यापि तदवच्छेदकत्वेन प्रमाणशरीरान्तःप्रवेश इति वाच्यम्; तस्योपलक्षणावच्छेदकत्वात्। न चोपलक्षणावच्छेदकस्याप्युपलक्ष्यशरीरान्तःपातित्वम्; न हि काकस्य गृहोपलक्षणस्य गृहशरीरनिवेशित्वम्।

इत्यद्वैतवादः चतुर्विंशः
समाप्तः।

[अनिर्वचनीयवादः।]

अथोच्येत—न प्रमाणादेः प्रपञ्चस्यात्यन्तासत्त्वं ब्रूमः; येन न प्रामाण्यं स्यात्, किन्त्वनिर्वचनीयत्वम्।

न चानिर्वचनीयं नामाप्रामाणिकम्; असतो नृशृङ्गादेरिव ख्यानानुपपत्तेः सतः चिदात्मन इव बाधानुपपत्तेः ख्यातिबाधान्यथानुपपत्त्या शुक्तिकारजतादेस्सदसद्भ्यामनिर्वाच्यत्वसिद्धेरिति। तदयुक्तम्; सद्विलक्षणस्य नृशृङ्गादेरिव ख्यानुपपत्तेः असद्विलक्षणस्य चिदात्मन इव बाधानुपपत्तेः सदसद्विलक्षणत्वेऽपि शुक्तिकारजतादौ ख्यातिबाधयोरनुपपत्तेः।

---

१. शरीरान्तः प्रवेशित्व. क. २. किञ्चानि. ख, ग. ३. तिप्राधान्यान्यथानुपपत्त्या शुक्तिरजतादेः. घ. ४. बाधानुपपत्तेः. ग.

असतस्सदधीननिरूपणत्वात् तद्वैलक्षण्यस्य बाधाभावप्रयोजकत्वे[1] गौरवात् सत्त्वस्यैव तत्प्रयोजकत्वमिति चेन्मैवम्; असतः सदधीननिरूपणत्वेन ख्यानाभावप्रयोजकत्वेऽपि गौरवापत्तेः सत्त्वस्यैव तत्रापि प्रयोजकत्वप्रसङ्गात् ।

अथ लाघवे सत्यपि सत्त्वस्य ख्यानाभावप्रयोजकत्वे चिदात्मनोऽपि ख्यानाभावप्रसङ्गरूपात्[2] बाधकान्न सत एव ख्यानाभावप्रयोजकत्वं, तर्हि सत्यपि लाघवे सत्त्वासत्त्वयोः बाधाभावख्यानाभावौ प्रति प्रयोजकत्वे शुक्तिकारजतादौ सत्त्वासत्त्वव्यापकभूतबाधाभावख्यानाभावविरुद्धयोर्बाधख्यानयोर्दर्शनेन सत्त्वासत्त्वयोर्निवृत्तिप्राप्तौ, यत्[3]सद्विलक्षणं तदसदेव यथा नरविषाणम्, यच्चासद्विलक्षणं तत्सदेव यथा चिदात्मेति सत्त्वासत्त्वयोरन्योन्यविधिनिषेधरूपत्वप्रमितिभङ्गप्रसङ्गरूपं[4] बाधकमस्तीत्यसद्वैलक्षण्यसद्वैलक्षण्ययोरेव बाधाभावख्यानाभावौ प्रति प्रयोजकत्वं प्राप्तम्। एवञ्च सदसद्वैलक्षण्ये ख्यातिबाधयोरनुपपत्तेः शुक्तिकारजतादेः सदसद्रूपत्वमेव स्यात् । न चैवं यत्सत्[5] तन्न बाध्येतेति व्याप्तिर्भज्येतेति वाच्यम्; इदमंशस्य रजतमित्यंशस्य च सद्रूपस्य[6] बाधानभ्युपगमात्। कस्य तर्हि बाधः? शुक्तिरजततादात्म्यस्यासद्रूपस्येति ब्रूमः । कथमसतः ख्यानाभावादख्यातस्य बाध इति चेन्मैवम्; असतोऽपि ख्यानाभ्युपगमात्। यदसत् तन्न ख्यायते यथा नरविषाणमित्यसतः ख्यानं प्रमाणविरुद्धमिति चेन्न; साध्यविकलत्वाद् दृष्टान्तस्य । ख्यायत एव हि नरविषाणशब्दान्नरविषाणमपि। न चापरोक्षज्ञानस्य ख्यानाभिमतत्वादसद्गोचरत्व-

---

१. त्वे चिदात्मगौरवात्. ग. २. रूपत्वात्. क. ख. ३. यत्सत्त्वविलक्षणं. घ. ४. पप्रमिति. घ. ५. यत्तत् सत् तन्न बाध्यत इति. घ. ६. स्य च. ग.

मनुपपन्नमिति वाच्यम्; अपरोक्षज्ञानगोचरभावाभावयोः सामग्रीसद्भावप्रयुक्तत्वेन सत्त्वासत्त्वयोरप्रयोजकत्वात्। न हि सदपि सर्वमपरोक्षं, किन्तु सामग्रीसन्निधानात् किञ्चिदेव। यथा चैवमपि नासत्ख्यात्यभ्युपगमः तथान्यथाख्यातिसमर्थन एव समर्थितम्। एवञ्च ख्यातिबाधयोः सदसद्रूपत्वेनोपपत्तेरुपपादितत्वादर्थापत्तेरन्यथोपपत्तिर्दूषणमापन्नम्। किञ्च यदीदं रजतमित्यस्य सदसद्विलक्षणमलौकिकं रजतं विषयः तर्हि नेदं रजतमित्यस्य को विषय इति वाच्यम्। न तावत् प्रतिपन्नस्यासत्त्वं; सदसद्रूपविलक्षणस्यासद्रूपवेदनेन बाध्यबाधकभाववैपरीत्यप्रसङ्गात्। नापि तस्यैव सदसद्विलक्षणत्वम्; उभयोरेकगोचरत्वेन बाध्यबाधकभावानुपपत्तेः। न च लौकिकपरमार्थरजतस्यात्रासत्त्वं विषयः; तथा सति सदसद्विलक्षणमलौकिकं रजतं पूर्वप्रत्ययेन[२] प्रसञ्जितमुत्तरेण च लौकिकस्यान्यस्यैव रजतस्यासत्त्वमावेदितमिति घटवेदनस्य पटाभाववेदनेनेव[३] न परस्परं बाध्यबाधकभावः स्यात्। कथञ्चाप्रसक्तस्य लौकिकरजतस्यासत्त्वं बाधबोधो गोचरयेत्? अयमेव तस्य प्रसङ्गो यदलौकिकस्य रजतस्य प्रतिभास इति चेन्मैवम्; अन्यप्रसङ्गस्यान्यनिषेधबाध्यत्वानुपपत्तेः, उपपत्तौ वा घटप्रसङ्गस्यापि पटनिषेधबाध्यत्वापत्तेः। तस्माच्छुक्तिरजततादात्म्यस्य पूर्वज्ञानप्रसञ्जितस्यासत्त्वावेदनादुत्तरस्य बाधकत्वम्। न चैवं पूर्वज्ञानस्यानालम्बनत्वम्; संसर्गमात्रस्यैवासत्यत्वेन[७] सर्वथानालम्बनत्वाभावात्, तस्यैव चानिष्टत्वात्।

---

१. रन्यथोपपत्तिदूषण. ख. ग. रन्यथैवोप०. घ. २. ये प्रस०. घ. ३. नेनैव पर. ख. ग. नेन पर. घ. ४. न्यत्र प्र०. ख. ङ. ५. स्यालम्ब. घ. ६. स्यैव सत्यत्वेन. क. ७. त्वे सर्व०. ख. ङ.

एतेनैकगोचरयोर्[1]बाध्यबाधकत्वे धारावाहिकयोरपि स्यात् । भिन्नगोचरयोस्तु तत्त्वे घटपटवेदनयोरपि तत्त्वप्रसङ्ग इत्यपास्तम् ; एकत्रैव सत्त्वासत्त्वगोचरयोर्बाध्यबाधकभाव इति विशेषस्योक्तत्वात् ।

इत्यनिर्वचनीयवादो नाम पञ्चविंशवादः
समाप्तः ।

[मिथ्यावादः ।]

अपि च[2] शुक्तिरजतादेः सदसद्विलक्षणत्वे कादाचित्कत्वं अकादाचित्कत्वं वा स्यात् । अकादाचित्कत्वे नित्यत्वप्रसङ्गोऽपसिद्धान्तश्च । कादाचित्कत्वे उपादानकारणं वाच्यम् ; प्राक्तव्यव्यतिरेकस्य भावस्योपादानमन्तरेणानुपपत्तेः । न चाविद्यैवोपादानम् । अविद्या[3] हि विद्याभावो मिथ्याभूतं वा ज्ञानम्, न चोभयं कस्यचिदुपादानं अद्रव्यत्वात् । नं[4] च भावरूपानादिरविद्योपादानम् ; तत्र प्रमाणाभावात् । न च "इन्द्रो मायाभिः पुरुरूप ईयत" इति वैदिकं वचः प्रमाणम् ; तस्य पूर्वापरपरामर्शे प्रपञ्चगोचरतया मायामयत्वप्रतिपादनपरत्वेनाप्रतिभासात् । प्रतिभासेऽपि[5] वा मायापदस्य[6] सदसद्विलक्षणपरत्वेनाव्युत्पत्तेः[7], अपदार्थस्य[8] च वाक्यार्थानुप्रवेशाभावात् ।

---

१. योर्न बाध्य०. ख. ङ. २. त्कमकादाचित्कं वा. घ. ३. व्यापि वि. ख. ङ. ४. न चाभाव. ख. ग. ङ. ५. से वा माया. घ. ६. यामयस्य. ख. ग. ङ. ७. णत्वेनाव्यु०. घ. ८. स्य वाक्यार्था०. घ.

स्यादेतत्—शुक्तिरजतादेः[१] कादाचित्[२] कस्य दर्शनात्तस्योपादानमन्तरेणासम्भवात् सदुपादानत्वे च कुम्भादिवत्सत्यत्वप्रसङ्गादसतश्च नरशृङ्गादेरिवोपादानत्वानुपपत्तेः परिशेषात् सदसद्विलक्षणस्यैवोपादानत्वम्, तस्य च सादित्वे तथाविधोपादानान्तरकल्पना गौरवायेत्यनादित्वमपि[३], सैव चानादिरित्युच्यत इति। तदयुक्तम्; शुक्तिरजतादेः सत्योपादानत्वेनाप्युपपत्तेः। सत्योपादानस्य सत्यत्वदर्शनाच्छुक्तिकारजतादेरपि[४] सत्यत्वप्रसङ्गात् सत्योपादानत्वं प्रमाणविरुद्धमिति चेत्, यद्येवं कुत[५] एतदवगम्यते सत्योपादानस्य सत्यत्वमेवेति[६]? कुम्भादौ तथा दर्शनादिति चेत्, किं कुम्भादयस्सदुपादानास्सत्याश्च भवताम्[७]? ओमिति चेत्, सद्द्वैतहानिः[८]। अतश्शुक्तिरजतादेः सत्योपादानत्वे सत्यत्वप्राप्तिरिति यद् बाधकमुक्तं तदसिद्धमेव। तथापि यत् सत् तदसत्योपादानं न भवति, यथा ब्रह्मेति सत्योपादानत्वं प्रमाणविरुद्धमिति चेत्तर्हि यत् सद्विलक्षणं तदुपादानमेव न भवति यथा नरविषाणमिति सदसद्विलक्षणस्यापि सद्विलक्षणत्वादुपादानत्वं[९] प्रमाणविरुद्धं भवेत्। एवञ्चार्थापत्तिरन्यथाप्युपपन्ना। तथा पूर्वोक्तयुक्तिभिः शुक्तिकारजतादेः कादाचित्कस्य सदसद्विलक्षणस्यासिद्धेः[१०] कल्पकाभावो द्रष्टव्यः।

---

१. क्तिकारज०. क. २. स्य दर्शनात्तदुपादा०. घ. ३. दिमत्त्वमपि. ख, ङ. ४. सत्त्वप्र०. ङ. ५. वगतं. ख. ग. ६. त्वमिति. घ. ७. तामिति चेत्. ख. ग. ८. दसद्वैत. ग. ङ. ९. सदसद्वि. घ. १०. णस्य सिद्धेः. क.

किञ्च यदि शुक्तिरजतादेः सदसद्विलक्षणा अनादिरविद्या उपादानं तर्हि तन्निवृत्तिः किमसती सती वा सदसद्विलक्षणा वा? न तावदसुष्या असत्त्वम्; अनिर्मोक्षप्रसङ्गात्। नापि सत्त्वं; सदद्वैतभङ्गप्रसङ्गात्। नापि च सदसद्विलक्षणत्वम्; सदसद्वैलक्षण्यलक्षणत्वादविद्यायास्तन्निवृत्तेरपि तल्लक्षणत्वेनाविद्यात्वापत्तेः। अस्तु साप्यविद्येति चेन्मैवम्; अविद्यात्वव्यापकभूतयोर्बाध्यत्वनिवर्त्यत्वयोर्निवृत्तावविद्यात्वस्यैव निवृत्तेः। न चाविद्यानिवृत्तिर्निवर्त्या बाध्या चेति वाच्यम्; निवृत्तिनिवृत्तौ निवृत्तिबाधे वा निवर्त्यस्यानिवृत्तिप्रसङ्गेनानिर्मोक्षत्वापत्तेः। एतेन निवृत्तिरूपाविद्याव्यवस्थानेऽपि निवर्त्याविद्याया मूलोच्छेदान्नानिर्मोक्ष इत्यपास्तम्; बाध्यत्वनिवर्त्यत्वयोर्निवृत्तावविद्यात्वनिवृत्तेरेवोक्तत्वात्। न चाविद्यानिवृत्तिस्सदसद्विलक्षणविलक्षणापि भवति; सदसद्विलक्षणवैलक्षण्ये सदसद्रूपत्वापत्तेः। नहि यद्व्यतिरिक्तं तत्तद्व्यतिरिक्तं न भवतीति सम्भवति; निषेधनिषेधस्य विधिरूपत्वात्। अस्तु सदसद्रूपत्वमसुष्या इति चेन्मैवम्; परस्परप्रतिषेधरूपयोरेकत्र समुच्चयानुपपत्तेः, उपपत्तौ वा ख्यातिबाधयोः प्रपञ्चस्य सदसद्रूपत्वेनाप्युपपत्तेः सदसद्व्यामनिर्वाच्यत्वस्यैवासिद्धेः।

---

१. दस्याः असत्त्वम्; घ. २. पि सद०. घ. ३. वृत्तिरपि. ख. ग. ङ. ४. स्यापि निवृत्ति. घ. ५. दान्निर्मोक्ष०. घ. ६. ध्यनि. ग. ङ. ७. क्षणापि भवति. ग. ८. तद्व्यतिरिक्तं. ङ. ९. विरुद्धत्वात्. ग. १०. सद्विलक्षणत्वमसुष्या. क. ११. धयोरेकत्र. क. घ.

एतेनाविद्यानिवृत्तेः प्रसिद्धप्रकारत्रयानन्तर्गतौ चतुर्थप्रकारत्वमेव परिशेषादित्यपास्तम्। किञ्चाविद्यानिवृत्तिः किमुत्पाद्याऽनुत्पाद्या वा? न तावदनुत्पाद्या; नित्यमुक्तिप्रसङ्गात्। उत्पाद्या चेत् किमुत्पादकम्? अद्वैतसाक्षात्कार इति चेत् स किमनिवर्त्यो[1] निवर्त्यो वा? न तावदनिवर्त्यः; तस्याविद्यान्तर्गतस्यानिवृत्तौ[2] अविनिर्मोक्षत्वापत्तेः[3]। नापि निवर्त्यः, कारणाभावात्। न च स्वयमेव कारणम्; स्वस्य निवृत्तिविरोधित्वेन कारणत्वानुपपत्तेः।

यत्पुनर्यथा सलिलगतं कतकरजो रजोन्तराणि शमयति, स्वयञ्च शाम्यति तथाद्वैतसाक्षात्कार इत्यभाणि। तत्र कोऽयं शमः, किं[4] स ध्वंसः अधःपातो वा? न तावद्ध्वंसः; असिद्धत्वात्। अथाधःपातः, तथापि रजोन्तराणां कतकरजोऽधःपातहेतुः, कतकरजसः पुनस्तद्गतं गुरुत्वं कर्म वा पतनहेतुरिति कथं स्वस्यैव स्वशमहेतुत्वमिति अलमतिदूरगमनेन। सिद्धं तावदेतत्—

शुक्तिरर्थान्तरीभूतरजतात्मावभासते।
न त्वनिर्वचनीयस्य रूपस्यान्यस्य धीरिति॥

एवञ्च सत्यनिर्वाच्यः प्रपञ्च इति साधनम्।
तद्दृष्टान्तेन साध्यस्य विकलत्वात् सुदुर्वचम्॥

इत्यविद्यावादो नाम षड्विंशवादः
समाप्तः।

---

१. र्त्यो वा नि०. ख. ङ. २. निवृत्तौ च निर्मो०. ङ. ३. निर्मोक्षापत्तेः. ४. किं ध्वंसः क. ग. घ.

[मिथ्यावादः ।]

न च प्रपञ्चो मिथ्येति जाड्यदृश्यत्वहेतुतः ।
स्वप्नप्रपञ्चवत्साध्यं मिथ्यात्वस्यानिरूपणात् ॥

यदि हि प्रपञ्चो मिथ्या दृश्यत्वात् भासमानत्वाद्वा स्वप्नप्रपञ्चवदिति साध्यम्, तर्हि कोऽयं मिथ्यापदार्थः किमसत्त्वं उत सदसद्विलक्षणत्वं उत बाध्यत्वम्? न तावदसत्त्वम्; अपसिद्धान्तप्रसङ्गात् । न हि भवन्तोऽपि प्रपञ्चस्यासत्त्वमाचक्षते, किन्तु सदसद्विलक्षणत्वम् ।

अपि च धर्मी दृष्टान्तः साध्यधर्मः साधनञ्चेत्यादयः प्रपञ्चान्तर्गताः प्रमाणसिद्धा न वा? यदि प्रमाणसिद्धाः तर्हि तद्ग्राहकैः प्रमाणैर्बाधितविषयत्वादनुमानस्य न स्यादेवोत्थानम् । अथ न प्रमाणसिद्धाः तर्हि धर्म्यसिद्धेराश्रयासिद्धत्वं, साध्यासिद्धेरप्रसिद्धविशेषणत्वं, साधनासिद्धेः स्वरूपासिद्धत्वं, साधनस्य सपक्षवृत्तित्वासिद्धेरसाधारणानैकान्तिकत्वं, विपक्षव्यतिरेकासिद्धेः[२] सन्दिग्धानैकान्तिकत्वं, साध्यसाधनयोर्दृष्टान्तवर्त्तित्वेनासिद्धेर्दृष्टान्तस्योभयविकलत्वमित्यादिदूषणशताकुलत्वात् सुतरामनुत्थानम् । न च तत्प्रतिभासस्य प्रमाणतस्सिद्ध्यभावाद् बुद्ध्यारूढैर्धर्मादिभिरनुमानोत्थानम्; अप्रामाणिकस्य प्रमितिसाधनत्वानुपपत्तेः, उपपत्तौ वा बाष्पस्यापि धूमबुद्ध्यारूढस्य धूमध्वजप्रमितिसाधनत्वप्रसङ्गात् । यदि बुद्धिमात्रारूढैर्धर्म्यादिभिः सिध्यतः साध्यस्य प्रामाणिकत्वं तर्हि बुद्धिमात्रारूढैर्विपक्षवृत्तित्वादिभिः सिध्यतो दूषणशतस्यापि प्रामाणिकत्वमनिर्वार्यम् । न च विपक्षाव्यतिरेकादयो बुद्धावप्यनारूढाः; त्वदीय-

---

१. सत्यं. ख. ङ. २. द्धेः दृष्टान्तस्योभय०. घ. ३. कल्पमित्यादि. ग. ४. भावेऽपि बुद्ध्या०. घ. ५. ष्पस्य धूम०. ग.

हेतुर्विपक्षाद्व्यावृत्त इत्यादिमीमांसकप्रणीतवाक्यजन्यायां बुद्धावारूढत्वात्। अतो न तावदसत्त्वमिथ्यापदार्थः। न च सदसद्विलक्षणत्वम्; तस्यान्यत्राऽप्रसिद्धेः पक्षस्याप्रसिद्धविशेषणत्वं दृष्टान्तस्य साध्यविकलत्वमित्यादिप्राप्तेः। नापि बाध्यत्वम्; बाधकाभावस्य योग्यानुपलम्भसिद्धत्वात्। न चेदमेवानुमानं बाधकम्; अस्य प्रपञ्चप्रतिभासबाध्यत्वेनानुत्थानात्। न च तत्प्रतिभासस्य भ्रान्तत्वादुत्थानम्; अनुमानोत्थाने सति तद्भ्रान्तत्वं तद्भ्रान्तत्वे सति तदबाधादनुमानोत्थानमित्यन्योन्याश्रयप्रसङ्गात्। अतस्सिद्धमबाधितप्रत्यक्षादिसिद्धस्य प्रपञ्चस्य सत्यत्वम्।

इति मिथ्यावादो नाम सप्तविंशवादः
समाप्तः।

[विज्ञानवादः।

अत्र पुनराभिरेव युक्तिभिः प्रपञ्चस्य मिथ्यात्वमाचक्षाणाः सुगतमतानुसारिणः प्रत्यवतिष्ठन्ते वदन्ति च—यत् प्रकाशते तत् प्रकाशादभिन्नं यथोभयसिद्धः प्रदीपः, प्रकाशते च नीलादिः तस्मात् प्रकाशादभिन्नः। न च विपक्षे बाधकाभावाद् व्याप्त्यसिद्धिः; नीलादेः प्रकाशाद् भेदे प्रकाशमानत्वस्यैवानुपपत्तेः। तथा हि—नीलादेः प्रकाशमानत्वं स्वाभाविकं परायत्तं वा? परायत्तत्वे यद्यस्य न स्वाभाविकं न तत्तस्य परेणापि कर्तुं शक्यं यथा नरस्य तुरगत्वमिति नित्याप्रकाशमानत्वप्राप्तेर्नीलादेः स्वरूप-

---

१. च सद्विलक्षणत्वं. ग. २. स्याप्यप्र०. क. स्य प्रसिद्ध. ख. ३. बाधाभावस्य. ख. ग. ४. नुमानात्. ग. ५. दबोधादनु०. ख.

मेवापह्नियते । अथ स्वाभाविकं, न तस्य परापेक्षा यथा नीलस्य नीलत्वमिति सिद्धं नीलादेः स्वयंप्रकाशत्वम् । सिद्धश्च तत एव प्रकाशादभिन्नत्वमपि, तस्य तल्लक्षणत्वात् ।

किञ्च यदि ज्ञानाद् भिन्नोऽर्थः तर्हि किंलक्षणमस्य[3] ग्राह्यत्वम् ? न तावदर्थत्वलक्षणम्; घटज्ञाने विश्वस्य विषयत्वप्रसङ्गात् । न च प्राकट्याश्रयत्वं व्यवहाराश्रयत्वं वा विषयत्वम्; भूतभविष्यतोस्तदसम्भवेनाविषयत्वप्रसङ्गात् । न ह्यप्रत्युत्पन्नो धर्मी धर्मश्च तदाश्रयः प्रत्युत्पन्न इति सम्भवति । न च हेतुत्वं विषयत्वम् ; इन्द्रियादेरपि तत्त्वप्रसङ्गात् । ज्ञानेन सदृशो विषयः । न चेन्द्रियादिर्ज्ञानेन सदृश[4] इति चेन्न; समनन्तरप्रत्ययस्य विषयत्वप्रसङ्गात् । अस्ति हि तस्य ज्ञानत्वेन सादृश्यं हेतुत्वञ्च । न चात्यन्तसदृशो हेतुर्विषयः । समनन्तरप्रत्ययश्च नीलादिर्ज्ञानेन[4] नात्यन्तसदृशः, तस्य पीतादिरूपत्वादिति वाच्यम् ; धारावाहिकेषूत्तरं प्रति पूर्वस्य विषयत्वप्रसङ्गात् । न च यत्सम्बद्धमिन्द्रियादिर्ज्ञानं जनयति स विषय इति वाच्यम्; रूपेणेव रसेनापि चक्षुषस्संयुक्तसमवायसम्बन्धोऽस्तीति रूपवेदने रसस्यापि विषयत्वप्रसङ्गात् । भवतु तर्हि वैभाषिकमतं ज्ञानैकसामग्रीप्रभवत्वमेवार्थस्य विषयत्वमिति । न चार्थस्य ज्ञानं प्रति हेतुत्वं, येन ज्ञानस्य वर्तमानावभासत्वादर्थस्य[5] तत्कालस्थितौ[6] क्षणभङ्गहानिः स्यात् । न च कारणभूतप्राचीनार्थेन्द्रियालोकमनस्कारात्मँकपुञ्जाज्जायमानकार्यभूतार्वाचीनतादृशपुञ्जंगतस्येन्द्रियादेरपि ज्ञानेनैकसामग्रीप्रभवत्वा-

---

१. अतः. ग. २. एव प्रकाशाभिन्नत्वमपि. ख. एव स्वभावादभिन्नत्वमपि. ग.
३. मन्यग्रा०. ग. ४. नेनात्यन्त०. ख. ग. ङ. ५. नाभास०. क. ख. ङ.
६. लत्व०. ख. ङ. ७. त्मपुञ्जा०. क. घ. ८. ञ्जशतस्य. ग. ङ.

दर्थवद्वेद्यत्वप्रसङ्गः। यतो[1] यथा सम्बन्धतुल्यत्वेऽपि चक्षुषो रूपमेव प्रकाश्यं न रस इति स्वभावः, तथैकसामग्रीप्रभवत्वेऽप्यर्थस्यैव[2] विषयत्वं नेन्द्रियादेः; स्वभावस्यापर्यनुयोज्यत्वात्। तदयुक्तम्; भूतभविष्यतोरवेद्यत्वप्रसङ्गात्। न च ते अवेद्ये एव परमध्यवसेये इति वाच्यम्; अध्यवसेयस्यापि वेद्यत्वानपायात्।

किञ्चास्मिन्मते चक्षू रूपमेव प्रकाशयतीत्यपि दुर्निरूपम्; चाक्षुषज्ञाने रूपस्येव रसस्यापि वेद्यत्वानतिपातात्। न हि चाक्षुषज्ञानेनैकसामग्रीप्रभवत्वादितरत् चक्षुःप्रकाश्यत्वं, तच्च पार्थिवाप्यरूपेष्वर्थेषु[3] रूपेणेव रसेनापि समानमेव। तस्माद्बाह्यलक्षणायोगादवभासमानो नीलपीतादिराकारो ज्ञानस्यैवेति प्राहे सौत्रान्तिकाः प्राहुः—अस्तु ज्ञानं साकारं तथापि न बाह्यमपह्नोतुं शक्यम्; ज्ञानस्याकारसमर्पकहेतुत्वेन[4] बाह्यस्यापि ग्राह्यत्वव्यवस्थानात्। ज्ञानाकारसमर्पणक्षमं हेतुत्वमेव हि ग्राह्यत्वम्। न च ज्ञानं[5] स्वमेव हि नीलादिमाकारं गृह्णाति[6] न च गृह्णात्यर्थम्; अतोऽर्थस्य[7] स्वाकारसमर्पणक्षमं हेतुत्वमित्यादि[8] निष्प्रमाणकमिति वाच्यम्; कादाचित्कस्य विचित्ररूपस्य नीलादेर्ज्ञानाकारस्य कारणवैचित्र्यमन्तरेणानुपपत्तेः। न हि समनन्तरप्रत्ययमात्रात्[9] तदुत्पत्तिः; तेषामेकरूपत्वेनैकस्मिन् सन्ताने नीलबुद्ध्यनन्तरं नीलबुद्धिरेव न पीतादिबुद्धिरिति

---

१. थावद्बन्ध. ङ. २. त्वेऽर्थस्यैव. ग. ३. क्षणयोगा०. क. ४. मर्पणं हेतुत्वमेव. ग. मर्पकक्षमं. ख. ङ. ५. स्वयमेव. ग. घ. ६. न गृह्णातीत्यर्थः. ख. ङ. ७. तोऽप्यर्थस्य. क. घ. ङ. ८. निष्प्रामाणिकमिति. घ. ९. त्रादनुत्पत्तिः. ग.

प्रसङ्गात्[1] । न हि वित्तिः स्वसत्तामात्रेण नीलपीतादिविचित्रतां, भजते; तस्याः सत्त्वाविशेषादविशेषप्रसङ्गात्[2] । अतो विचित्राकारसंवेदनदर्शनाद्विचित्राकारसमर्पणक्षमहेतुत्वेन विचित्राकारसिद्धेर्यद्विचित्रं कारणं सोऽर्थ इत्यर्थस्यापि[3] सिद्धिः । न च सर्वत्रार्थस्यानुमेयपक्षनिक्षेपात्[4] किञ्चित् प्रत्यक्षं किञ्चिदनुमेयमिति विभागाभावः; यस्य साक्षादेव स्वाकारसमर्पकत्वेन हेतुत्वं तस्य प्रत्यक्षत्वम्, यस्य तु परम्परया तस्यानुमेयत्वमिति[5] विभागात् । तस्मात् ज्ञानस्य साकारत्वेऽपि बाह्यग्राह्यत्वमविहतमित्यसिद्धो[6] ग्राह्यलक्षणायोग इति । तदिदमनुपपन्नम्; विचित्रशक्तिभ्यः समनन्तरप्रत्ययेभ्य एव विचित्रकार्योत्पत्तेः । न च शक्तिवैचित्र्यं पर्यनुयोगार्हं; तस्य कार्यवैचित्र्यमात्रकल्प्यत्वात्[7] । किञ्च स्वप्नावस्थायामसत्यप्यर्थसन्निधौ[8] ज्ञानवैचित्र्यदर्शनात् तस्य समनन्तरप्रत्ययकृतत्वमवश्याङ्गीकरणीयम्[9] । जाग्रद्धियामपि तथैव प्राप्तेनार्थसिद्धिः । अतस्सिद्धं ज्ञानाद्भिन्नस्य ग्राह्यलक्षणायोगान्नीलादेश्च[10] ग्राह्यत्वात् तस्य ज्ञानात्मकत्वमेवेति ।

अपि च यद्येन नित्यसहोपलम्भं[11] तत्ततो न भिद्यते यथैकस्माच्चन्द्राद्वितीयश्चन्द्रः, नियतसहोपलम्भश्च ज्ञानेन नीलं, अतो ज्ञानादभिन्नम्, तथा यद्यतो भिद्यते तत्तेन नियतसहोपलम्भं न भवति यथा नीलं पीतेन, नियतसहोपलम्भश्च ज्ञानेन नीलं, अतो ज्ञानादभिन्नमेव । किञ्च योऽपि बाह्यं

---

१. सन्तानमात्रेण. घ. २. दसंस्पर्शनाद्वि०. घ. ३. त्यस्यापि. ग. ४. क्षसिद्धे विक्षेपात् किञ्चित्. ख. ङ. ५. यमिति. ख. ङ. ६. त्यमवि०. घ. ७. कल्पनात्. घ. ८. यां सत्यस्यार्थ०. ग. ९. श्याश्रयणीयम्. ग. १०. ग्राहकल०. घ. ११. नित्येन सहो०. ग.

ग्राह्यमाह तेनापि ज्ञानसिद्धिरवश्याभ्युपगमनीया[1]। न चाप्रत्यक्षस्य तस्य सिद्धिः सम्भवति; लिङ्गाभावात्। न चार्थो लिङ्गम्; विनापि ज्ञानं सुषुप्तावर्थसम्भवाभ्युपगमात्। नाप्यर्थधर्मो ज्ञानजन्मा लिङ्गं, तदभ्युपगतौ प्रमाणाभावात्, अतीतादिषु तदसम्भवेन ज्ञानविलोपप्रसङ्गाच्च। ननु व्यवहारो लिङ्गम्। मैवम्; प्रागपि व्यवहारात् पश्यतो घटं जानेऽहं घटमिति ज्ञानानुसन्धानदर्शनात्। तस्मादप्रत्यक्षत्वे ज्ञानस्वरूपमेव न सिध्येत्। न च निराकारस्य प्रत्यक्षत्वम्। न च द्वावाकारावनुभूयेते इत्यनुभूयमानस्य नीलाकारस्य बलात् ज्ञानात्मकत्वं स्वयंप्रकाशकत्वञ्च प्राप्तम्। ननु स्वप्रकाशकत्वे स्वात्मनि क्रियाविरोधः। मैवम्; नहि ज्ञानं प्रकाशनरूपयात्मानं क्रियया कर्म करोति, किन्तु स्वहेतुभ्यः प्रकाशरूपमेवोत्पन्नम्। अतः सर्वरूपमेव ज्ञानं स्वप्रकाशमनादिवासनावशात् स्वाकारमेव बाह्यमध्यवस्यन्मिथ्येति[2] सिद्धम्॥

अत्राभिधीयते—

धियामबाह्यग्राह्यत्वं सर्वासामेव गृह्यते।
स्वांशपर्यवसानं वा मिथ्यात्वं वा यया धिया॥

सा किमन्यादृशी यद्वा तादृशी यदि तादृशी।
नेष्टसिद्धिरतादृक्त्वे व्यभिचारः स्फुटो भवेत्॥

निरालम्बनवादिना हि सर्वज्ञानानां बाह्यग्राह्यवैधुर्यं स्वांशालम्बनत्वं[3] वा मिथ्यात्वं वा साध्यम्। तत्र यया धिया तत्साध्यं गोचरीकर्तव्यं सापि

---

१. द्विर्भवति. क. घ. २. स्य मिथ्येति. ख. ङ. ३. त्वं मिथ्यात्वं वा. ग.

किं तत्साध्ययोगित्वेन[१] सर्वज्ञानसदृशी[२], न वा तत्सदृशी ? पूर्वत्र न साध्यसिद्धिः; नहि सर्वज्ञानवत् स्वयमपि सर्वग्राह्यविधुरया सर्वज्ञानगतं बाह्यग्राह्यवैधुर्यं स्वबहिर्भूतं शक्यग्रहम् । न च स्वांशपर्यवसायिन्या सर्वज्ञानगतं तादृशत्वमस्वांशभूतं गृहीतुं शक्यम्[३] । नापि स्वयं मिथ्याभूतया ज्ञानान्तरगतं मिथ्यात्वं शक्यावगमम्; मिथ्यात्वग्राहकस्य मिथ्यात्वे ग्राह्यभूतमिथ्यात्वाभावेन सर्वज्ञानानां यथार्थत्वप्रसङ्गात् । अथ न बाह्यग्राह्यविधुरा न च स्वांशालम्बना नापि मिथ्येत्यन्यादृशी, तर्हि तत्रैव विविधसाध्यप्रतिबद्धानामपि हेतूनां व्यभिचारः स्फुट इति सुतरां न साध्यसिद्धिः ।

किञ्च सर्वज्ञानानामनालम्बनत्वात् स्वांशालम्बनत्वाद्वा धर्मिस्वरूपं लिङ्गस्वरूपञ्च नावगन्तुं शक्यमिति प्रकाशमानत्वादेर्हेतुजालस्य स्वरूपासिद्धत्वमाश्रयासिद्धत्वञ्च स्यात् । तथा लिङ्गस्य सपक्षसत्त्वविपक्षव्यावृत्त्योरपि तत एव दुरवगमत्वादसाधारणानैकान्तिकत्वं सन्दिग्धानैकान्तिकत्वञ्च भवेत्[५] । ननु पक्षसपक्षविपक्षाः साध्यधर्मः साधनधर्मश्चेत्यादीनां ज्ञानान्तरकर्मत्वेन प्रकाशमानत्वाभावेऽपि स्वप्रकाशत्वादेव प्रागुक्तदोषानवकाश इति । नैवम् ; हेतोर्विपक्षव्यावृत्तिसिद्ध्यर्थं विपक्षप्रकाशेऽङ्गीक्रियमाणे विपक्षज्ञानस्य स्वाकारभूताद्विपक्षादभिन्नत्वेन विपक्षत्वाज्ञानत्वेन

---

१. न सर्वज्ञानवत् . ग. २. शी ? न तावत् सदृशी । पूर्वत्र. ख. ङ. ३. गमयितुं. ग. ४. धर्म. ङ. ५. त्वञ्च भवेत् सन्दिग्धानैकान्तिकत्वञ्च भवेत्. क. त्वञ्च सन्दि०. घ. ६. त् । पञ्च. ख. ग. ङ. ७. विपक्षाज्ञान. घ.

स्वयं प्रकाशत्वाच्च तत्रैव प्रकाशमानत्वहेतोर्विपक्षवृत्तिलक्षणो व्यभिचारः, अनङ्गीक्रियमाणे तु विपक्षव्यावृत्तेरेवासिद्धेः सन्दिग्धानैकान्तिकत्वमित्युभयतःस्पाशरज्जुप्रसङ्गात्। तथा नीलादिगोचरत्वेन जडत्वज्ञानान्तरग्राह्यत्वज्ञानव्यतिरेकादेरवश्यं प्रतिषेध्यतया प्रकाश्यस्य ज्ञानाकारत्वेन ज्ञानादभिन्नत्वाद् ज्ञानमेव जडं ज्ञानान्तरग्राह्यं ज्ञानव्यतिरिक्तञ्च प्रसज्येत।

किञ्च यत्किंयदस्मत्सिद्धान्तसिद्धं बौद्धेन प्रतिषेध्यतया प्रकाश्यं तत्सर्वं ज्ञानाकारत्वेन ज्ञानादभिन्नमिति परमार्थरूपमेव स्यात्। न च यथार्थज्ञानाकारस्य परमार्थत्वमयथार्थज्ञानाकारस्य चापरमार्थत्वमिति भेदादस्मत्सिद्धान्तसिद्धगोचरज्ञानस्य यथार्थत्वात् तदाकारभूतमस्मत्सिद्धान्तसिद्धं परमार्थमिति वाच्यम्; ज्ञानगोचरस्य यथार्थत्वस्य विषयसत्यत्वनिबन्धनत्वानभ्युपगमे स्वरूपसत्यत्वनिबन्धनमेव ज्ञानस्य यथार्थत्वमित्यस्मत्सिद्धान्तगोचरज्ञानस्यापि स्वरूपसत्यत्वेन यथार्थत्वप्राप्तेस्तदाकारभूतस्यास्मत्सिद्धान्तसिद्धस्यापि परमार्थत्वानपायात्। तथा धर्मिदृष्टान्तयोः साध्यसाधनधर्मयोश्च प्रयोगवाक्यगततत्तद्वाचकपदप्रकाश्यत्वात् तत्तत्पदजन्यज्ञानाकारत्वेन तत्तज्ज्ञानादभिन्नत्वात् ज्ञानस्य च ज्ञानान्तरधर्मत्वानुपपत्तेः हेतोरपक्षधर्मत्वं, दृष्टान्तस्य च साधनविकलत्वं साध्यवि-

---

१. ज्ञनत्वाच्च. ख. ङ. २. नहेतोः. ग. नत्वे हेतोः. घ. ३. स्पाशारज्जु. क. ख. घ. ङ. ४. त्वे जड. घ. ५. श्यज्ञानाकारत्वेन. क. ६. नाभिन्न ग. ७. नाभिन्न. घ. ८. र्थज्ञानत्वात्. ख. ९. मेऽपि स्व. क. १०. चरास्मज्ज्ञान. ख. ङ. चरज्ञानेऽपि. ग. चरस्यापि स्वरूप. घ. ११. ज्ञानभिन्न. ग.

कलत्वमित्यादि प्राप्तम् । एवं त्वदीयानुमानमुद्दिश्य मीमांसकेन सर्वेषामेव[1] दूषणानां तत्तद्वाचकैः प्रकाशितानां तत्तद्वाचकपदजन्यज्ञानादभिन्नत्वात् ज्ञानस्य[2] च सर्वत्र स्वरूपेण परमार्थरूपत्वात्[3] तदभिन्नानि तानि सर्वाणि दूषणान्यपि परमार्थरूपाणि स्युः । अत्यल्पश्चेदं वराकस्य सौगतस्य विप्रतिपद्यमानेन मीमांसकेन सौगतस्य शिरः छिन्नमिति वाक्योच्चारणे तद्वाक्यजन्यज्ञानविषयस्य तद्वाक्यजन्यज्ञानाकारत्वेन[4] तदभिन्नत्वात् मीमांसककर्तृकसौगतशिरश्छेदोऽपि[5] सम्पन्नः स्यात् ।

एतेन प्रत्ययत्वादिहेतवोऽपि पूर्ववत्[6] साध्यं विकल्प्य तत्तद्दोषमभिधाय[7] निरस्ता वेदितव्याः । यत्तु ज्ञानादव्यतिरिक्तस्य ग्राह्यलक्षणायोग इत्युक्तम्, तदत्रैव प्राक्व्याश्रयत्वमेव ग्राह्यत्वमिति समर्थयद्भिरुपरिष्टात् परिहरिष्यते । सहोपलम्भनियमस्तु[8] ज्ञेयप्रकाशसमये ज्ञानप्रकाशस्यानभ्युपगमादसिद्ध एव । तथा एकस्य नीलस्य युगपद्बहुभिरध्यक्ष्यमाणस्यैकेनेवान्येनापि[9] ज्ञानेन सहोपलम्भनियमासिद्धेरप्यसिद्धत्वम्[10] । भिन्नान्येव तत्र प्रतिज्ञानं नीलादीनीति चेत् मैवम्; यदेव त्वया दृष्टं तदेव मया दृष्टमिति सम्प्रतिपत्तेर्दर्शनात्[11] । तथा सहभावस्य भेदव्याप्तत्वात्तत एव नीलतद्धियोरभेदसाधने हेतोर्विरुद्धत्वञ्च स्यात् ।

---

१. षां दूषणानां. ग. घ. २. नत्वस्य. ख. ३. र्थत्वरूप. ख. ङ. र्थस्वरूपत्वात्. ग. ४. तत्तज्ज्ञानादिभिन्नत्वात्. ग. ५. सर्ववत्र स्यात्. ख. ङ. सर्वत्र स्यात्. ग. ६. तु जानाम्यतिरिक्तस्य. ङ. ७. नातिरिक्तस्य. ख. ८. स्तु प्रकाश. घ. ९. ध्यक्षमाणस्यैकेनेव. ग. ङ. १०. सिद्धोऽप्यसिद्धत्वम्. ङ. ११. यापि. क. घ.

ननु चन्द्रेण द्वितीयचन्द्रस्येव ज्ञानेन नीलस्य भेदसहभावौ प्रतिभासमानावपि भ्रान्तावेव। यथाहुः—

अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥

इति। तदयुक्तम्; प्रतिभासमानयोर्भेदसहभावयोर्ज्ञानाकारत्वेन[1] ज्ञानादभिन्नत्वात् तस्य च सत्यत्वात् तदभिन्नौ नीलतद्धियोर्भेदसहभावावपि सत्याविति प्रसङ्गात् बाधाभावे[2] भ्रान्तत्वमप्यनुपपन्नम्[3]। न चेदमेवानुमानं बाधकम्; भेदप्रतिभासस्य भ्रान्तत्वे सत्यबाधितविषयत्वादनुमानोत्थानं,[4] अनुमानोत्थाने च सति तत्प्रतिभासस्य भ्रान्तत्वमित्यन्योन्याश्रयप्रसङ्गात्।

यदपि यत् स्वयं न प्रकाशते तत् परेणापि प्रकाशयितुमशक्यमित्युक्तं, तन्मन्दम्; एतेनैव वाक्येनास्यैवार्थस्य पूर्वमस्मान् प्रत्यप्रकाशमानस्य प्रकाशितत्वादत्रैवानैकान्तिकत्वात्, यावज्जीवमहं[5] मौनीतिवत् स्ववचनविरुद्धत्वाच्च।

यत् पुनर्ज्ञानस्य नीलाद्याकारविधुरत्वे[6] निराकारस्य न प्रत्यक्षत्वं अप्रत्यक्षस्य स्वरूपमेव न सिध्यतीत्युक्तं, तदतिस्थवीयः; ज्ञानस्य नीलाद्याकारवैधुर्येऽपि स्वाकारेण प्रत्यक्षत्वाविरोधात्, अप्रत्यक्षत्वेऽपि तत्सिद्धेरुपपादयिष्यमाणत्वाच्च।

इति विज्ञानवादो नामाष्टाविंशवादः
समाप्तः।

---

१. भिन्नत्वेन नील. ख. २. बाधकाभावे. क. ३. बाधविषय. ख. ग. ङ. ४. मानोत्थाने सति. क. ५. वं मौनी. ङ. ६. लाकार. ग.

[स्वयंप्रकाशवादः।]

किञ्च ज्ञानस्य प्रत्यक्षत्वं स्वप्रकाशत्वात् मानसत्वाद्वा? न तावत् स्वप्रकाशत्वं सम्भवति, यथा पाकः पाक्यस्यौदनस्यैव[1] नात्मनः, छेदो वा छेद्यस्य वृक्षस्यैव नात्मनः तथा प्रकाशोऽपि प्रकाश्यस्य घटादेरेव नात्मनः; स्वात्मनि क्रियाविरोधात्।

अथ यथा घटादिभिः स्वज्ञानायापेक्षितस्यापि दीपस्य स्वज्ञाने दीपान्तरानपेक्षणेऽपि न स्वात्मनि वृत्तिविरोधः[2] तथा घटादिभिः स्वप्रतिबद्धव्यवहारायापेक्षितस्यापि[3] ज्ञानस्य[4] स्वप्रतिबद्धव्यवहारे[5] ज्ञानान्तरानपेक्षणेऽपि न स्वात्मनि वृत्तिविरोधः। तथा च प्रयोगः—ज्ञानं स्वगतव्यवहाररूपे कार्ये सजातीयपरानपेक्षं तथाभूतपरगतकार्यकारित्वात्, यद्यथाभूतं परगतं कार्यं करोति तत् स्वगततथाभूतकार्यजननार्थं सजातीय[6]परानपेक्षं यथा दीपो दीपान्तरानपेक्ष इति। तदिदमसारम्; अर्थान्तरानुमापकानुमितलिङ्गे[7] व्यभिचारात्। लिङ्गत्वेन सजातीयत्वेऽपि तयोरवान्तरविशेषादनत्यन्तसजातीयत्वं अत्यन्तसजातीयानपेक्षत्वञ्च[8] साध्यमिति चेत्, तर्ह्यर्थविषयज्ञानस्य[9] न ज्ञानविषयेण ज्ञानेनात्यन्तसजातीयत्वं[10] किन्त्वर्थविषयेणैव, तदनपेक्षत्वञ्च[11] ज्ञानस्य स्वव्यवहारे सिद्धमिति सिद्धसाध्यत्वम्। एतेनैव[12] तत्साध्यप्रतिबद्धा[13] वस्तुत्वादिहेतवो निरस्ताः।

---

१. स्योदनस्यैव. ख. ग. ङ. २. बन्ध. ग. ङ. ३. रापेक्षितस्यापि. घ. ४. स्य विज्ञानस्य. ख. ङ. ५. बन्ध. ग. ङ. ६. स्वजातीय. घ. ७. नुदितलिङ्गे. ग. ङ नुमिते लिङ्गव्यभिचारात्. घ. ८. क्षत्र. घ. ङ. ९. स्य ज्ञानविषयेण. ग. १०. नेन वात्यन्त. घ. ११. त्वं किञ्चार्थ. ग. १२. नैतत्साध्य. क. १३. बन्धा. ग. बन्धवस्तु. ङ.

किञ्च यावन्तः स्वप्रकाशत्वसाधनाय हेतवस्तेषां सर्वेषामेव ज्ञानान्तरकर्मतयैव व्यवहार्यत्वेन व्याप्तत्वाद्विरुद्धाव्यभिचारित्वं सुप्रतिपादम्। यत्तु ज्ञानस्य स्वोत्पत्त्यनन्तरं स्वविषयसन्देहाभावात् स्वयंप्रकाशत्वसमर्थनं, तदयुक्तम्; असन्दिग्धस्य प्रकाशमानत्वनियमाभावात्। न हि स्वरूपत[1] एवाज्ञातेषु विषयेषु सन्देहस्याभावान्न प्रकाशमानत्वमस्ति[2]। घटज्ञानसन्देहे घटव्यवहारोऽपि भवतीति लोकविरुद्धमित्यप्यत एव दुश्चोद्यम्; अनवगतस्वरूपघटज्ञानगोचरत्वेन[3] सन्देहस्यैवाभ्युपगमात्। न च घटज्ञानानवगतौ[4] न घटव्यवहारः; तस्यानवगतस्यापि स्वोत्पत्तिमात्रेण घटव्यवहारहेतुत्वात्। योऽपि क्वचित् ज्ञानोत्पत्त्यनन्तरं झटिति तद्विषयो व्यवहारः सोऽपि झटिति प्रमाणान्तरेण तदवगमनिबन्धन[5] इति न ततोऽपि स्वप्रकाशत्वसिद्धिः।

यत्पुनर्धीकर्मत्वस्य जडत्वव्याप्तेः व्यापकभूतजडत्वनिवृत्तौ धीकर्मत्वस्यापि निवृत्तिरिति, तन्मन्दम्; ज्ञानस्यापि धीकर्मत्वदर्शनात्। परज्ञानं ह्यनुमेयतया धीकर्मैव[6]। न चैतावता जडाजडविभागाभावः; यदधीनं ज्ञानस्यार्थस्य वा व्यवहारानुगुणत्वं[7] तदजडं, यदधीनं तु न कस्यचिदपि तज्जडमिति विभागात्। ननु कार्यं कारणं कल्पयद्येन विनानुपपन्नं तदेव कल्पयति, ज्ञानगतश्च व्यवहारः स्वेनैवोपपन्न इति न ज्ञानान्तरमपेक्षते।

---

१. एव ज्ञातेषु विषयेषु. ग. ङ. २. त्वसमर्थनत्वमस्ति. म. ३. ज्ञानानवगतौ न घटव्यवहारः तस्यानवगतस्यापि. क. ४. तौ घटव्यवहारः. ग. ५. ति ततोऽपि. ग. ६. ज्ञानानां ह्यनुमेयतया. ङ. ७. हारगुणत्वं. ङ

नैवम्[1]; नहि कार्यं येन केनाप्युपपन्नम्, तथा सति सर्वस्मिन् कार्ये सर्वस्यैवोपपादकत्वप्रसङ्गात्[2]।

प्रमाणविरुद्धमेवोपपादकं[3], सर्वश्च सर्वत्र कार्ये प्रमाणविरुद्धमिति नोपपादकत्वमिति चेत्, तर्ह्यत्रापि ज्ञानस्य ज्ञानान्तरानपेक्षस्य व्यवहार्यत्वं प्रमाणविरुद्धम्[4]। प्रमाणञ्च ज्ञानं स्वप्रतिबद्धव्यवहारे ज्ञानान्तरापेक्षं व्यवह्रियमाणत्वात्[5] घटवत्[6], संवेदनं स्वप्रकाशं न भवति वस्तुत्वात् यदुक्तसाधनं तदुक्तसाध्यं यथा घटः, विप्रतिपन्नो व्यवहारः स्वविषयसंवेदनापेक्षः व्यवहारत्वात् यो यो व्यवहारः[7] सः स्वविषयसंवेदनापेक्षः यथा सम्प्रतिपन्नो व्यवहारः, संवेदनव्यवहारः संवेदनसंवेदननिबन्धनः[8][9] संवेदनव्यवहारत्वात् परगतसंवेदनव्यवहारवत्[10] इत्यादि। न चेदं जडत्वप्रयुक्तम्[11]; अजडस्यापि परगतज्ञानस्य स्वव्यवहारे ज्ञानान्तरापेक्षत्वात्।

एतेन ज्ञानज्ञात्रोरप्रकाशमानयोः स्वपरवेद्ययोरनतिशय इत्यपास्तम्; अप्रकाशमानयोरपि तयोर्यत्रैव यद्विषयं ज्ञानं समवैति तत्रैव तद्विषयो व्यवहारो नापरत्रेति विवेकात्। न चार्थव्यवहारस्य तथोपपत्तौ सत्यामप्यहं जानामीति ज्ञातृज्ञानगोचरव्यवहारस्य[12] तयोरप्रकाशमानयो-

---

१. न विनाप्युपपन्नम्. ङ. २. र्वस्याप्युप. क. ३. रुद्धोपपादकं. ग. ४. बन्ध. ग. ङ. ५. रानपेक्षं. ख. ग. ङ. ६. नं न प्रकाशनं न भवति. ख. ङ. ७. स स. घ. ८. रः, विषयसंवेदन. क. ९. ननिबन्धनः. ख. ग. ङ. १०. द्वारवत्। न चेदं. ग. ११. ङप्रयुक्तं. घ. १२. स्य तयोरप्रकाश. ग.

[1]रनुपपत्तेरन्यस्य च नियतस्य तत्प्रकाशहेतोरभावात् सर्वार्थवित्तिषु वेत्तृतया वित्तितया च तयोरपि प्रकाशोऽभ्युपगमनीय इति वाच्यम्; सर्वत्रार्थवित्तिष्वहं जानामीति व्यवहारस्यासिद्धेः, यत्रापि क्वचित् सिद्धिः तत्रापि प्रमाणान्तरेणैव तयोः प्रकाशनात्।

नन्वात्मनो ज्ञानकर्मत्वं विरुद्धम्; एकस्य कर्मकर्तृत्वानुपपत्तेः। न [2]चास्मन्मतेऽपि [3]ज्ञानजन्यफलभागित्वेन [4]कर्मत्वं परसमवेतक्रियाफलभागित्वात् कर्मत्वस्य। तदयुक्तम्। तथा हि—अनेन वचनविन्यासेन किमात्मनो ज्ञानजन्यफलभागित्वं निषिध्यते न वा? यदि निषिध्यते तर्हि [5]कथमस्य कर्तृत्वेनापि प्रागविद्यमानप्रकाशसम्बन्धित्वं स्यात्? अथ ज्ञानस्यैव प्रकाशत्वात् न ज्ञानाधीनमात्मनः प्रकाशफलसम्बन्धित्वं नाम किञ्चित्, तर्ह्यर्थस्यापि तेनैव न्यायेन प्रकाशफलसम्बन्धाभावात् परसमवेतक्रियाफलभागितालक्षणं कर्मत्वं भज्येत। अथार्थस्य व्यवहारः तद्योग्यत्वं वा ज्ञानजन्यं फलं, तर्ह्यात्मन्यपि तदुभयमस्तीति [6]कथं ज्ञानजन्यफलभागित्वं निषिध्यते? न निषिध्यत इति चेत्तर्हि सुखादिवत् मनःसन्निकर्षजज्ञानजन्यफलभागित्वात् तल्लक्षणं मानसत्वमपि प्राप्तम्। [7]तथा कर्मसंज्ञाकर्मविभक्ती विरुद्धे इति चेन्मैवं; शब्दसाधुत्वस्य प्रयोगगम्यत्वात्, प्रयोगस्य चा[8]त्मानं जानीहि" "आत्मा ज्ञातव्य" इत्यादेर्लोकवेदयोर्दृष्टत्वात्। न चैवं गन्तुर्गन्तव्येन सह समानफल-

---

१. रनुप्रश्नेरन्यस्य. ख. ग. २. चास्मिन्मतेऽपि. घ. ३. न्यं फल. ग. ४. लयोगित्वेन. घ. ५. मन्यस्य. ङ. ६. चेन्मैवम्; शब्द. क. ७. त्वमिति प्राप्तम्. ग. ८. था सति कर्म. घ. ९. नीहीति. क.

प्राप्तावपि[1] कर्मसंज्ञाकर्मविभक्ती दृष्टे इति न तत्र तयोः साधुत्वम्[2] । किञ्च यदि सर्वत्रार्थवित्तिषु कर्तृतयैवात्मनः सिद्धिः तर्हि योऽहं प्राग्दुःखमन्वभूवं सोऽहमिदानीं सुखमनुभवामीति प्रत्यभिज्ञायां[3] तत्कालविशिष्टस्य कर्तुरवभासो भ्रान्तः स्यात्, तत्कालविशिष्टस्य सम्प्रतितने प्रत्यभिज्ञाने कर्तृत्वानुपपत्तेः । एतेनात्मनो ग्राहकत्वेन सिद्ध्यनुपपत्तेः मानसत्वे च स्वात्मनि वृत्तिविरोधात् परिशेषसिद्धं स्वयंप्रकाशत्वमित्यपास्तम्; गन्तुरिव ज्ञातुरपि स्वसमवायिक्रियाफलभागित्वेऽप्यविरोधयोरुपपादितत्वात् । कथञ्च[4] स्वप्रकाशत्वे सुषुप्तावपि प्रकाशो न स्यात्? अस्त्येव तत्रापि सुखरूपस्यात्मनः प्रकाशः; सुखमहमस्वाप्समिति प्रतिसन्धानादिति चेत् न[5]; प्रबुद्धस्य कामिनीसम्भोगादिविषयजसुखलवलाभाभावेन निर्वेदस्य दर्शनात् । न हि निरतिशयंसुखानुभववेलायां स्वल्पसुखस्याननुभवः खेदकरः । सुषुप्तावनुभूतमपि तत्सुखं विस्मृतमिति चेत्तर्हि प्रतिसन्धानस्याभावात् सुषुप्तावनुभवस्य[6] कल्पकमेव न स्यात् । तेन स्मर्तव्यत्वे सत्यस्मरणेन सुषुप्तौ दुःखाभावमात्मनोऽभ्युपगच्छतः तत्रैव गुणवृत्त्या सुखित्वव्यवहार इति स्वीकरणीयम् । तदनुगुणत्वेन चाचेतयन्नेवेयन्तं कालमस्वाप्समिति सुषुप्तावबोधव्यवहारोऽपि दृष्टः । किञ्चात्मा ज्ञानान्तराधीनप्रकाशः[7] व्यवहार्यत्वाद् घटवत् । न च व्यवहार्यत्वमसिद्धम्; आत्मा व्यवहार्यो न भवतीत्यस्यैव व्यवहारस्य तद्गोचरत्वेन स्ववचनविरुद्धत्वात् ।

---

१. प्राविह कर्मसंज्ञा- क. ख. २. त्वम् । हि यदि ख. त्वम् । हि यदि पूर्वत्रार्थ- ङ. ३. प्रतिज्ञायां. ख. ङ. ४. च प्रकाशत्वे. ङ. ५. न; बुद्धस्य. ग. ६. यदुःखानुभव. ङ. ७: वकल्पकमेव. घ. ८. शः न व्यवहार्यत्वात्. ङ.

"अत्रायं पुरुषः स्वयं ज्योतिः" "आत्मैवास्य ज्योति"रित्यादिवेदवचनात् स्वप्रकाशत्वमिति चेन्न; पूर्वोक्तप्रमाणविरुद्धार्थत्वात् "स मानसीन आत्मा जनानामि"ति श्रुत्यन्तरविरोधाच्च। तस्मादात्मा मानसप्रत्यक्षवेदनीय एव॥

इति स्वयंप्रकाशवादो नाम एकोनत्रिंशवादः समाप्तः।

[ज्ञानप्रत्यक्षतावादः।]

ननु तर्ह्यात्मवत् ज्ञानमपि मानसमस्तु। मैवम्; तथा हि—आत्मगुणस्य सुखादेः सत्वमेबुभुत्सितावश्यग्रहेण व्याप्तं दृष्टं, तदिह व्यापकभूताबुभुत्सितावश्यग्रहणं निवर्तमानं स्वव्याप्यभूतं प्रत्यक्षात्मगुणसद्भावं निवर्तयति। यानि पुनर्ज्ञानं प्रत्यक्षं क्षणिकात्मविशेषगुणत्वात् सुखादिवदित्यादीनि प्रत्यक्षसाधनानि तानि सकलसपक्षानुगताबुभुत्सितावश्यग्रहणलक्षणविशेषविरोधादाभासान्येव। अन्यथा धर्माधर्मौ प्रत्यक्षौ आत्मविशेषगुणत्वात् सुखादिवदित्यत्र कः परिहारः? न ह्यसिद्ध्यादिदूषणमत्र क्रमते, किन्तु प्रागुक्त एव विशेषः सकलदृष्टान्तानुगतः पक्षे प्रमाणान्तरेण बाध्यमानो व्याप्तिं विघटयन्ननुमानोत्पत्तिं विहन्तीत्यभ्युपगमनीयम्।

---

१. वेदान्तवचनात् . घ. २. रुद्धत्वात्, ख. ङ. ३. थाप्यात्म. ख. ङ. था हि प्रत्यक्षात्म. घ. ४. मनुबुभुत्सितावश्य. ख. ग. मबुभुत्सितावश्यग्रहणेन. क. ङ. ५. वश्यंग्रहणलक्षणविशेषविरोधादाभासान्येव। अन्यथा. क. वश्यंग्रहणनिवर्तमानं. ग. ङ. ६. लपक्षानुगता०. ख. ङ. ७. णं क्रमते. ग.

तस्मात् ज्ञानस्याबुभुत्सितावश्यग्रहणनिवृत्तौ प्रत्यक्षत्वनिवृत्तिरेव । नन्वात्मवद्बुभुत्सितं कदाचिदेव गृह्यतामबुभुत्सितमेव तु सुखादिवदवश्यं गृह्यताम् । नैवम् ; अबुभुत्सितावश्यग्रहणे ज्ञानविषयज्ञानानुपरमप्रसङ्गात् । सर्वस्यैव ज्ञानस्य ज्ञानान्तरेणावश्यं गृहीत्वैवोत्थानात्, तस्मान्न मानसप्रत्यक्षत्वमपि ज्ञानस्य प्रामाणिकम् ।

इति ज्ञानप्रत्यक्षतानिरासवादो नाम त्रिंशो वादः
परिसमाप्तः ।

[प्राकट्यवादः ।]

कथं तर्हि ज्ञानसिद्धिः ? श्रूयताम् – यथा गन्तव्यगतायाः प्राप्तेर्गन्तारं प्रत्यसाधारण्यं तदेकसमवायिक्रियाजन्यत्वमन्तरेणानुपपद्यमानं तथा घटादिगतस्य प्राकट्यफलस्यापि कञ्चिदेव प्रत्यसाधारण्यं तदेकसमवायिक्रियाजन्यत्वमन्तरेणानुपपद्यमानं तदेकसमवायिनीं क्रियां कल्पयति, सैव च ज्ञानम् । न च प्राकट्यस्य कञ्चिदेव प्रत्यसाधारण्यं दुरवगमम् ; प्राकट्यमवगच्छतः तदनन्तरभवत्वेन तद्धेतुकं व्यवहारं स्वस्मिन्नेव पश्यतः स्वं प्रत्यसाधारण्यस्य सुज्ञानत्वात् । ततश्चाविशेषेण तस्य सर्वत्रापि तादृक्स्वभावत्वनिश्चयात् । न चात्ममनस्सन्निकर्षादेवोपपत्तेर्न ज्ञानसिद्धिः ; तस्य तदेकसमवायित्वाभावेनोपपादकत्वानुपपत्तेः ।

---

१. नस्याम्बुभुत्सितावश्यग्रहण. ख. नस्य बुभुत्सितावश्यग्रहण. ग. २. भुत्सित. प्रत्यक्षत्वनिवृत्तिरेव. घ. ३. श्यंग्रहण. क. ४. श्यंग्रहणे. क. ५. यां प्राप्तेः. ङ ६. हारमस्मिन्नेव. ग. ७. श्चापि विशेषणं तस्य. ग. ८. वोत्पत्तेर्न. ग.

ननु कल्पकमेवासिद्धम्, अर्थगतस्य प्राकट्यफलस्यानभ्युपगमात्। तदिदमनुपपन्नम्। तथाहि—सन्ति तावद्घटः प्रकाशते[1] घटो भाति[2] घटप्रकाश इत्यादयो व्यवहारा लौकिकपरीक्षकाणाम्। न चैते भ्रान्तिमूलाः; बाधकाभावात्। अबाधितानामपि[3] तन्मूलत्वे सर्वस्यापि व्यवहारस्य तन्मूलत्वप्रसङ्गात्। अतो दृढप्रतिपन्नतादृशव्यवहारमूलत्वेन प्रकाशविशिष्टोऽर्थः कल्पनीयः, स च विशेषणभूतः प्रकाशैपदार्थः[4] प्राकट्यम्। न च घटस्तद्वत्तं[5] वा द्रव्यत्वसत्त्वादिकमनागन्तुकमागन्तुकं वापि[6] प्रकाशपदार्थः; विरोधात्, पर्यायत्वेन तत्तद्वाचकैस्सह प्रयोगानुपपत्तेश्च। ननु ज्ञानमेवागन्तुकं प्रकाशशब्दार्थोऽस्तु[7]। तन्न; ज्ञानं ह्यात्मसमवेतमात्मसमानाधिकरणतयैव भासते घटसमानाधिकरणश्च प्रकाशपदार्थः कथं ज्ञानमस्तु, अन्यसमवेतस्यान्यसमानाधिकरणत्वेऽतिप्रसङ्गात्[8]। किञ्च ज्ञानप्रकाशपदयोरैकार्थ्ये[9] घटो भातीतिवत् घटो जानातीति वा घटं जानातीतिवत्[10] घटं भातीति वा जानातिपर्यायाणां भातिपर्यायाणाञ्च परस्परसाङ्कर्येण प्रयोगः स्यात्[11]। न चैवमस्ति। अतो न भानप्रकाशपदार्थो ज्ञानपदार्थः, अतिरिक्त एव।

ननु यथैकं स्पन्दमभिदधतोश्चलतिगच्छत्योश्चलतेरकर्मकत्वं गच्छतेश्च सकर्मकत्वं, तथैकमेव ज्ञानमभिदधतोर्जानातिभात्योर्भातेरकर्मकत्वं जानातेश्च सकर्मकत्वमित्यपि प्रयोगसाङ्कर्याभावस्योपपत्तेः कथं जानाते-

---

१. टो भवति घटः प्रकाशः घ. २. टः प्रकाशते. ख. ङ. ३. अपि बाधितानामपि. ङ. ४. शभूतः प्राकट्यम् । घ. ५. गतं वाचि प्रकाश. ग. ६. वाचि. क. घ. ७. स्तु। न ज्ञानं. ग. ८. णगतयैव. घ. ९. कार्थिके. घ. १०. नामीति. घ. ११. भासप्रकाश. घ.

र्भातिभासत्यादिपदार्थोत्तीर्णार्थत्वम् ? इत्थम् —भ्रातेरकर्मकत्वे[1] जानात्येकार्थत्वे ज्ञातृसमानाधिकरणार्थत्वप्रसङ्गात्[2] । न हि चलतिरकर्मकोऽपि गन्तृसमानाधिकरणत्वमुन्मुच्य तदितरगन्तव्यादिसमानाधिकरणतां भजते, तथा सत्येकसमवेतार्थाभिधायिनस्तदन्यसमानाधिकरणत्वेनाभिधाने भ्रान्तत्वप्रसङ्गात् । अतो ज्ञातृसमानाधिकरणजानातिपदार्थाद् घटसमानाधिकरणभातिभासत्यादिपदार्थो व्यतिरिक्त इति सिद्धम् । न च घटगतं किञ्चिदनागन्तुकं तदर्थ इति प्रागेवोक्तम् । अस्तु तर्ह्यागन्तुको व्यवहारस्तदर्थ इति चेन्न; तस्य व्यवहर्त्तृनिष्ठत्वेन पूर्ववदसामानाधिकरण्यप्रसङ्गात्[3] । व्यवहारविषयत्वं प्रकाशपदार्थ इति चेन्नैवम्; अमीमांसकैरसदाश्रयस्य धर्मस्यानभ्युपगतेः भूतभविष्यतोर्व्यवहारविषयत्वं नास्तीति तयोरप्रकाशमानत्वप्रसङ्गात्[4] । भवतु तर्हि मीमांसकानां तदेव प्रकाशमानत्वमिति चेन्न; निर्विकल्पकोपेक्षयोर्व्यवहारस्यैवाभावात् । न चोपेक्षायामर्थो न प्रकाशते; प्रकाशमान एवोपेक्ष्यते, घटो नोपात्त इत्युत्तरमनुस्मृत्य[5] व्यवहारात् । न चोपेक्षैव तत्र व्यवहारः । सा हि हानादिप्रागभावो वस्तुन्यनुपयोगिताज्ञानं वा? पूर्वस्मिन्ननादित्वान्नागन्तुकवाचिव्यवहारप्रकाशपदयोरर्थः । उत्तरस्मिन् ज्ञानस्वरूपत्वात्[6]तस्य किन्तद्विषयत्वमर्थगतं[7] प्राकट्यादृते भवेत्? एतेन व्यवहारयोग्यत्वं प्रकाशपदार्थ इत्यपास्तम्; तस्य यावद्भावभावित्वेनानागन्तुकत्वे तावदागन्तुकवाचिप्रकाशपदार्थत्वानुपपत्तेः, आगन्तुकत्वे वा नामान्तरेण प्राकट्याङ्गीकरणप्रसङ्गात् ।

---

१. त्वेन जानात्येकार्थत्वे. घ. २. णत्वप्रसङ्गात्. ग. घ. ३. त् । अस्तु तर्हि. घ. ४. शकत्वमिति. ग. ५. नुसृत्य. ग. ६. नरूपत्वात्तस्य. ख. घ. ङ. ७. तं किं प्राकट्यादृते. ग.

नन्वेवं भातेर्घटसामानाधिकरण्येन घटगतार्थत्वे रोचतेरपि मोदक-सामानाधिकरण्येन मोदकगतार्थत्वं भवेत्[1]। सत्यं, किन्तु रुच्युत्पादानुगुणो मोदकगतः प्राकट्यभेद एव रोचतेः पदार्थः सम्भवतीति न तदतिरिक्तमर्थान्तरं सिध्येत्। अतो यदवगतं ज्ञानं कल्पयति तत् किमपि प्रकाशादिपदवेदनीयमर्थगतमर्थान्तरमभ्युपगमनीयम्। तच्च प्राकट्यमित्युच्यते। विषयत्वमर्थस्य तदाश्रयत्वमेव। तदुत्पत्तिप्रतिपत्त्यनुयोगास्त्वेवं समाधेयाः। प्रत्यक्षेषु तावत् पूर्वज्ञानजनितमुत्तरं ज्ञानं गृह्णाति तत्र जनकज्ञानं प्राकट्यं जनयित्वैव संस्कारं जनयति; प्रकटविषयत्वात् संस्कारस्य। प्राकट्यञ्च संयुक्तदात्मतयेन्द्रियसम्बद्धमेव जायत इति प्राकट्यविषयं विज्ञानं संस्कारश्च युगपदुभयं जायते, ततश्च जनकज्ञाननिवृत्तौ संख्याया इव[2] प्राकट्यस्यापि निवृत्तिः।

न च ज्ञानस्य द्वित्रिक्षणावस्थाने बुद्धेर्विरम्यव्यापाराभावेन प्रथमं वर्तमानक्षणसत्त्वमवभास्य[3] पश्चाद् द्वितीयादिक्षणस्यार्थावभासस्यानुपपत्तेः प्रथमक्षण एव द्वितीयादिक्षणसत्त्वमप्यवभास्यम्[4]। तथा च तस्य वर्तमानत्वेनावभासे भ्रान्तत्वापत्तेर्भविष्यत्त्वेनैवावभास इति प्रतिभासवैषम्यं स्यादिति वाच्यम्[5]; एकस्मिन्ननवयवे काले भेदस्यौपाधिकत्वेनोपाध्यवभासमन्तरेणावभासानुपपत्तेरेकत्र च ज्ञाने सहासम्भवतां तादृशानामुपाधीनामप्रतिभासात्।

---

१. त्। किन्तु. ग. २. त्तिः। स च ज्ञानस्य. ग. ङ. ३. णसत्त्वावभासस्यानुपपत्तेः. ङ. ४. प्यभावस्य. ङ. ५. दस्योपाधि०. ख.

किञ्च ज्ञानं स्वोत्पत्तिक्षणानन्तरक्षणे प्रतिभासापरपर्यायं प्राकट्यमुपजनयत् तदनन्तरक्षणे संस्कारमुपजनयत् प्रथमतृतीययोः क्षणयोः प्रतिभासान्तरं नोपजनयतीति कुतः प्रतिभासवैषम्यचोद्यम् ?

कथन्तर्हि भूतभविष्यतोः प्राकट्योत्पत्तिः ? सङ्क्षचावदेवेति ब्रूमः । न च सङ्क्षचैव तत्र नास्ति ; तिस्र आहुतयो हुताः षडपूपा भक्षिता इत्यादिव्यवहारदर्शनात् । न चासौ भ्रान्तः ; बाधकाभावात् । न च गौणः प्रयोगः ; तस्यापि साधारणगुणयोगमूलत्वात् । तदङ्गीकारे वा वरं संख्यायोगस्यैव स्वीकरणम् ।

नन्वप्रत्यक्षेषु कथं प्राकट्यावगमः ? उच्यते—प्रत्यक्षेषु शब्दप्रयोगादेर्व्यवहारस्य सुखदुःखयोरिच्छाद्वेषयोश्च तत्तद्विषयप्राकट्यानन्तरमेव दर्शनात् प्राकट्यहेतुत्वं निश्चीयते, ततोऽप्रत्यक्षेष्वपि तेषामन्यतमेन प्राकट्यमनुमेयम्, अनुमिताच्च ततो ज्ञानमिति । अतः सिद्धं ज्ञानस्याप्रत्यक्षत्वं अनाकारत्वञ्च । तदेवं बाह्यार्थप्रसाधनेन योगाचारं निराकुर्वद्भिर्ज्ञेयाभावात् ज्ञानाभावं वदन् माध्यमिकोऽपि परास्तो वेदितव्यः ।

ननु ज्ञानस्य कल्प्यत्वे द्रव्यादिचतुष्टयस्य प्रत्यक्षत्वमेवेति प्रतिज्ञा विरुध्यते । मैवम् ; ईदृशप्रतिज्ञाया अभावात् । दृश्याभावव्युदसनेन द्रव्यादिचतुष्टयस्यैव प्रत्यक्षत्वमित्येतावन्मात्रप्रतिज्ञानात् । कथन्तर्हि द्रव्यादिचतुष्टयानन्तर्भूतस्य प्राकट्यस्य प्रत्यक्षत्वमिति चेन्न ; कर्मव्यति-

---

१. योः प्रति. घ. २. म्यं चोद्यम् ? क. ३. कट्यापत्तिः. ख. ङ. ४. स्य तत्तद्विषय. घ. ५. न्यतरेण. ख. ग. ङ. ६. न्तर्गतस्य. क. घ.

रिक्तमवान्तरसामान्यवदनुपादानं गुण इति[1] लक्षणेन तस्यापि गुणत्वात् ॥

इति प्राकट्यवादो नामैकत्रिंशः
समाप्तः ।

[योगिप्रत्यक्षनिरासवादः ।]

नन्विन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षमिति लक्षणं भावनाप्रकर्षपर्यन्तजे योगिप्रत्यक्षे च नास्तीत्यव्यापकम् । तदयुक्तम् ; भावनाप्रकर्षपर्यन्तजस्य स्मृतित्वेनाप्रमाणत्वात् , प्रमाणविशेषत्वाच्च प्रत्यक्षस्य । योगिप्रत्यक्षं त्वप्रामाणिकमेव । कथमप्रामाणिकं ? भूतभविष्यती कस्यचित् प्रत्यक्षे प्रमेयत्वाद् घटवदिति प्रमाणे जीवतीति चेन्न ; प्रत्यक्षस्यासूक्ष्मा-व्यवहितविद्यमानार्थत्वव्याप्तेरनेवंविधविषयप्रत्यक्षतानुमानस्य[2] विशेष-विरुद्धत्वात् । तथात्मत्वं भूतभविष्यत्प्रत्यक्षयित्रात्मव्यक्तिसमवेतं[3] न भवति जातित्वाद् गोत्वादिवदित्यादिना सप्रतिसाधनत्वाच्चेति सर्वमनाविलम् ॥

इति चिदानन्दपण्डितकृतौ तत्त्वाविर्भावे
प्रमाणपरीक्षायां प्रत्यक्षपरीक्षा
समाप्ता ।

---

१. ति गुणलक्षणेन. घ. २. ता अनुमानस्य. ग. ३. व्यतिरिक्तसमवेतं. घ.

॥ अथानुमानम् ॥

[अनुमानपरीक्षावादः ।]

तत्र—

अनुमासन्निकृष्टेऽर्थे व्याप्यदर्शनजा मतिः ।
व्याप्तिस्वभावात्साध्येन नियतस्साधनान्वयः ॥

व्याप्यदर्शनजन्मासन्निकृष्टार्थविषयं ज्ञानमनुमानम् । का पुनर्व्याप्तिः ? साध्येन साधनस्य निरुपाधिकोऽन्वयः । तञ्च साधनस्य निरुपाधिकं साध्यान्वयं भूयोदर्शनजनितसंस्कारसमुपजातसाध्यान्वयस्मरणसहकृतमक्षमेवावधारयति । न केवलैर्भूयोभिर्दर्शनैस्तादृशमवधारणं सिध्यतीति प्रमाणोत्पत्त्यनुगुणस्तर्कोऽपि तत्र सहकारी । कथन्तर्हि देशान्तरकालान्तरयोर्व्यभिचाराशङ्कानिरासः ? परिदृश्यमानशङ्कितत्तदुपाधिनिरासेन निरुपाधिकत्वावधारणात् । नन्वदृश्योपाधिशङ्काया विद्यमानत्वात् कथन्निरुपाधिकत्वावधारणम् ? मैवम् ; शङ्काया दृष्टस्वलक्षणविषयाया अदृश्योपाधिविषयत्वेनानुत्थानात् । उत्थाने[2] वा सर्वत्र प्रसङ्गात् । किञ्चैवमनुमानप्रामाण्यमदृश्योपाधिशङ्क्या[3]पवदमानस्य चार्वाकस्यादृश्योपाधीनामनवगतावगतिमूलायाश्शङ्काया अभावादनुमानोदयः । अवगतौ वानुमानादन्यतस्तदनवगम इति सुतरामनुमानोदय इत्युभयतः स्पाशा

---

१. न्वविद्योपाधि. ग. २. ने सर्वत्र. ग. ङ. ३. ङ्कायापवद. घ. ङ.
४. पलभमानस्य. घ.

रज्जुः स्यात्। अतश्शङ्कितोपाध्यवगमे सति यस्य येन सह यादृशः सम्बन्धो दृष्टान्तधर्मिणि दृष्टः तस्य तेन सह तादृशं सम्बन्धं भूयोदर्शनजनित-संस्कारसहकृतमसंशयमेव निरुपाधिकत्वेन[1] निश्चिनोतीति सिद्धा व्याप्तिः। एतेन सकृद्दर्शनगम्यत्वं व्याप्तेरपास्तम्; प्रथमदर्शन एव शङ्कितोपाध्यनवगमेन निरुपाधिकान्वयस्यानवगतेः, अवगतौ वा द्वितीयादिदर्शन एवानुमानप्रसङ्गात्। न च निरुपाधिकत्वादन्यत् स्वाभाविकत्वम्, येन निरुपाधिकत्वस्य भूयोदर्शनावगम्यत्वेऽपि सकृद्दर्शनादेव स्वाभाविकत्वावगम इत्युच्येत[2]। अतः प्रथमदर्शने धूमं प्रति वह्न्यन्वयस्य सोपाधिकत्वानिश्चयेऽप्यनौपाधिकत्वमप्यनिश्चितमिति[3] भूयोदर्शनगम्यैव[4] व्याप्तिः।

ये तु तादात्म्यतदुत्पत्तिभ्यां व्याप्तिमाहुः तेषां शिंशपात्मना वृक्षेण शिंशपानुमानमपि स्यात्। तथा कार्यकारणभावस्य कार्यकारणोभयनिष्ठत्वात् कारणात् कार्यानुमानञ्च स्यात्। न च कार्यकारणभावस्योभयनिष्ठत्वेऽपि कार्यमेवानुमापकमिति वाच्यम्[5]; चरमसामग्रीनिवेशिनः कारणादपि कार्यानुमानस्य दृष्टत्वात्। न च तत् कार्यस्य कार्यमात्मा वा। किञ्च लिङ्गलिङ्गिनोर्भेदोपगतौ[6] न तादात्म्यनिबन्धना व्याप्तिः। अभेदोपगतौ वाऽभेदाधिष्ठाना व्याप्तिः। सिद्धसाध्यत्वं विरुद्धधर्माध्यासश्च स्याताम्। भेदाभेदयोरन्यतरस्य कल्पनानिर्मितत्वादुभयन्निर्वहिष्यतीति[7] चेन्मैवम्; कल्पनामात्रनिर्मितस्य प्रमाणाङ्गत्वानुपपत्तेः, उपपत्तौ वा

---

१. धिकादन्यत् स्वाभाविकम्. घ. २. त्युच्यते. ग. ङ. ३. मन्यनिश्चित. ग. ङ. ४. तमपि. ग. घ. ५. मू; परम०. क. घ. ६. भेदावगतौ. ग. ७. नादनिर्मि०. ग.

प्रमाणतदाभाससङ्करप्रसङ्गात्। न च तादात्म्यतदुत्पत्तिभ्यामन्तरेण व्याप्तिरेव दुरवगमा इति वाच्यम्; प्रागुक्तेन न्यायेन निरुपाधिकत्वावगमादेव व्याप्तिसिद्धेः। एवञ्च व्याप्त्यसिद्धेस्तुल्यत्वान्निश्चितोपाधेरिव शङ्कितोपाधेरपि[1] हेत्वाभासत्वमनुसन्धेयम्। उपाधिश्च सर्वत्र साधनाव्यापकत्वे सति साध्यसमव्याप्तिरेव।

ननु न विशेषोऽनुमेयः; तस्यानुगतत्वेनाव्याप्तत्वात्। न सामान्यम्; तस्यान्यतः प्राप्तत्वेन सिद्धसाध्यत्वात्। तदयुक्तं; सामान्ययोर्विशेषोपधानेनैव[2] व्याप्तेः। अन्यथा धूमत्वस्य वह्नित्वे स्वतः[3]संबद्धे वह्नित्वप्रसङ्गात्। अतो विशेषस्य द्वारत्वात्तस्य च नियतस्य निरूपणानुपपत्तेरनियततज्जातीयविशेषोपहितयोरेव सामान्ययोर्व्याप्तिसिद्धौ पक्षधर्मतया प्राप्तं[4] साधनसामान्यमुपहितानियतविशेषसाध्यसामान्यमनुमापयति। अत एव सकलविशेषविरोधे[5] मुखविरोधात्[6] सामान्यस्यापि निरोध इति विशेषविरोधोऽनुमानदूषणानामग्रणीर्गण्यते[7]।

स्यादेतत्—तथापि विशेषस्यानियतरूपेण व्याप्तिवेलायामेव प्राप्तत्वात् तदन्यस्य चानुमेयस्याभावात् सिद्धसाध्यत्वं तदवस्थमिति[8]। तन्न। देशकालविशेषस्य प्रागप्राप्तत्वात्। यत्र धूमस्तत्राग्निरिति तयोरपि सामान्यरूपेण प्राप्तिरस्तीति चेन्न; पर्वतादिविशेषरूपस्य प्रागप्राप्तत्वात्। तस्यापि वा प्राप्तावनाकलितधूमस्यैवाग्न्यर्थिनः पर्वते प्रवृत्तिप्रसङ्गात्। अतः पर्वत-

---

१. सर्वसाधनाव्यापकत्वे. ङ. २. षोपादानेनैव. ङ. ३. संयते. ग. संबन्धे. ब. ङ. ४. प्राप्तसाधन. ङ. ५. षनि०. ग. ६. खनि०. ग. ङ. ७. षनि०. ग. ङ. ८. वस्थितमिति. ङ.

विशेषस्य प्राग्प्राप्तत्वात् तत्सम्बन्धोऽपि प्रागप्राप्त एवेति[1] कुतस्तदनुमाने सिद्धसाध्यत्वम्?

ये पुनरनुमानस्य गृहीतग्राहित्वमाचक्षाणा धूमवतो वह्निमत्त्वस्य प्रागेव प्राप्तत्वाद्धूमत्वमेव प्रमाणापेक्षमित्याहुः। तेषां सकलदेशकाल-व्यापितया[2] धूमवत्त्वं प्रागप्राप्तं प्राप्तं वा? प्राप्तञ्चेत् प्राप्तत्वादेव वह्निमत्त्व-वत्तदपि न प्रमाणमपेक्षेत[3]। अथ न प्राप्तं तर्हि धूमवत्त्वप्राप्तिनिबन्धना वह्नि-मत्त्वप्राप्तिरपि नासीदिति कुतो गृहीतग्राहित्वम्? कथञ्च यत्र यत्र धूमस्तत्र तत्र वह्निरितिवत्[4] यत्र यत्राग्नीन्धनसंयोगः[5] तत्र तत्र धूमोऽपीति प्राप्तत्वात् धूमोऽपि[6] वा स्वावगमाय[7] प्रमाणान्तरमपेक्षेत? किञ्चानुमानस्य गृहीत-ग्राहित्वेन[8] स्मृतिप्रमोषादुत्तारोऽपि न सिध्यति। यथा नोत्तारस्तथा-न्यथाख्यातिसमर्थन एव समर्थितम्[9]। अतः सिद्धमनुमानम-गृहीतग्राहीति।

तत्तु द्विविधम्— दृष्टं सामान्यतो दृष्टञ्चेति। तत्र दृष्टैकविशेष-विषयं दृष्टम्[10]। यथा स्वरेण पुत्रानुमानम्। अनियतविशेषत्वेन सामान्य-मात्रविषयं सामान्यतो दृष्टम्। यथा धूमाद्धूमध्वजानुमानम्। स्वार्थानु-मानसाम्येव[11] च परार्थानुमानस्याप्यर्थः; तस्य परं प्रति तत्प्रतिपाद-

---

१. प्राप्त एवेति. ग. २. शव्यापितया. घ. ङ. ३. प्रमाणान्तरमपेक्षेत. घ. ४. रिव यत्र. ङ. ५. न्धनं तत्र तत्र. ग. न्धनसम्बन्धः, घ. ङ. ६. मो वा. ग. ७. य प्रमेयप्रमाणान्तर. ङ. ८. हित्वे स्मृति. घ. ९. मा न गृहीत. ग. ङ. १०. यत्र. ग. ङ. ११. ऽयैव च. ग. ऽयैव परा. घ.

नमात्रपरत्वात् । तच्च प्रतिज्ञाहेतुभ्यामेव निगमनोपनयनप्रयोजनसिद्धेर्न-पञ्चावयवम्, तयोदाहरणोपनयाभ्यामपरिपूर्णाभिधानात् न द्व्यवयवमपीति त्र्यवयवमवयवविद्भिः कृतम् । अवयवाश्च प्रतिज्ञाहेतुदृष्टान्ताः । तत्र प्रतिपिपादयिषयाऽपलवचनं[1] प्रतिज्ञा । साधनत्वावेदकं लिङ्गवचनं हेतुः । सम्यगुदाहरणाभिधानं दृष्टान्तः । तत्र जिज्ञासितधर्मविशिष्टो धर्मी पक्षः । तद्रूपपरिच्छेदात् तद्विपरीतपरिच्छेदाद्वान्यत्राप्रसिद्धत्वाद्वा यो न जिज्ञासितो धर्मः तद्विशिष्टस्य न पक्षत्वमिति सिद्धविशेषणो बाधितविशेषणोऽप्रसिद्ध-विशेषणश्च पक्षाभास एवेति तदावेदकं वचनमपि प्रतिज्ञाभास एव। तद्यथा-वह्निरुष्ण इति सिद्धविशेषणः । वह्निरनुष्ण इति बाधितविशेषणः । सर्वं कार्यं सर्वज्ञकर्तृकमित्यप्रसिद्धविशेषणः । बाधकप्रमाणभेदेन बाधित-विशेषणत्वावान्तरभेदो द्रष्टव्यः । व्याप्तः[2] साधनधर्मो हेतुः । असिद्धो बाधकः साधारणश्च चत्वारस्तदाभासाः । तत्रासिद्धभेदो यथा—बुद्धो रागद्वेष विधुरः सर्वज्ञत्वादिति स्वरूपासिद्धः । गगनकुसुमं सुरभि कुसुमत्वादि-त्याश्रयासिद्धः[3] । अनित्यं गगनं ज्ञानासमवायिकारणसंयोगाधारत्वात्[4] इति सम्बन्धासिद्धः । गगनत्वादिति व्यतिरेकासिद्धः । वेदाः पौरुषेयाः उपाख्यानात्मकत्वादिति भागासिद्धः[5] । एवमन्यतरासिद्धादयश्च तद-वान्तरविशेषा ऊहनीयाः । बाधको द्विविधः साध्यस्वरूपबाधकस्तद्विशेष-बाधकश्चेति[6] । तत्र साध्यविरुद्धव्याप्तः साध्यस्वरूपबाधकः[7] । यथा—शब्दो गुणः श्रावणत्वादिति । साध्यव्यापकविशेषस्यान्यतो बाधे सति[8] तदितर-

---

१. षतयापेक्ष. क. ख. ग. २. तसाधन. घ. ३. ज्ञानसम. ङ. ४. गानाधार. ग. ङ. ५. ख्यात्म. ङ. ६. साध्यरूपबाधस्तद्विशेषबाधश्चेति. ग. ङ. ७. ध्यरूप. ङ. ८. ति चीदृत्. ग.

विशेषबाधमुखेन साध्यसामान्यस्यापि बाधकस्साध्यविशेषबाधकः। यथा-क्षित्यादिकं सकर्तृकं कार्यत्वादिति। स चायं साध्यविशेषबाधकापरनामा विशेषविरोध ईश्वरवाद एव प्रस्तोष्यते इति नेह तदनुबन्धिनौ चोद्य-परिहारावुच्येते। सव्यभिचारः साधारणो यथा—नित्यश्शब्दः प्रमेयत्वा-दिति। पक्षमात्रवृत्तिः असाधारणः यथा—नित्या भूर्गन्धवत्वादिति। केचित्पुनस्साधारणासाधारणविप्रतिपत्तिमूलस्संशय इति साधारणधर्म-स्यापि सन्देहहेतुत्वमाचक्षाणा असाधारणमपि सव्यभिचारकोटौ निवे-शयन्ति। ननु कथं चत्वारो हेतुदोषाः; कालात्ययापदिष्टप्रकरण-समयोरपि तद्दोषत्वात्। मैवम्; कालात्ययापदिष्टस्य बाधितविशेषण-पर्यायत्वेन पक्षदूषणत्वात्। यः पुनर्बाधितविशेषणस्य पक्षत्वानुपपत्तेः पक्षधर्मतया हेतोरसिद्ध्यभावादसिद्धावन्तर्भावमाह तस्य हेतुदोषव्यति-रेकेण पक्षदोषो नाम न स्यात्। एतेन सिद्धविशेषणत्वपर्यायं सिद्ध-साध्यत्वं व्याख्यातम्। प्रकरणसमत्वन्तु दूषणान्तरं न सम्भवति, प्रबलदुर्बलयोर्विरोधे दुर्बलस्य प्रबलापहृतविषयत्वाद् बाधितविशेषणत्वस्य पक्षदोषस्यैव प्राप्तेः। तुल्यबलयोस्तु विरोधस्यैवानुपपत्तेःउपपत्तौ वा वस्तुनो द्विरूपत्वप्रसङ्गात्। व्याप्तस्य पक्षधर्मत्वेन प्रमितिसिद्धिरिति शङ्कितोपाधित्वेन व्याप्त्यसिद्धेरप्रयोजकोऽप्यसिद्धभेद एव।

व्याप्तिवेदनास्थानमुदाहरणम्। तद्द्विविधं साधर्म्यवैधर्म्यभेदात्। तत्र साधनस्य साध्येनान्वयोपदर्शनं साधर्म्यम्। यथा—यो धूमवान्

---

१. यथा अनित्या. घ. यथा नित्या भूतः शब्दवत्त्वादिति. ग. २. न सपक्ष. ग. ३. यत्पुनर्बाधित०. क. ग. घ. ४. पक्षधर्मत्वा. घ. ५. स्य हेतुधर्मव्यतिरेकेण. क. स्य दोषहेतुव्यतिरेकेण. ग. ६. णस्य पक्ष. ग. ङ. ७. स्तुनो. घ. ८. नो विरूप. क. ९. त्वे व्याप्त्यसिद्धेर. ङ. १०. नास्थानमुदाहरणम्. घ. नावस्थानं क.

सोऽग्निमान् यथा महानस इति। साध्याभावस्य साधनाभावेनान्वयोपदर्शनं वैधर्म्येण। यथा—योऽग्निमान्[1] न भवति नासौ धूमवान् यथा पाथ इति। साध्यहीनः साधनहीन उभयहीन आश्रयहीन इति साधर्म्योदाहरणाभासाश्चत्वारः। तद्यथा—नित्यो ध्वनिरकारणत्वात् यदकारणं[2] तन्नित्यमित्यत्र प्रागभाववदिति साध्यहीनः। प्रध्वंसवदिति साधनहीनः। घटवदित्युभयहीनः। नरशृङ्गवदित्याश्रयहीनः। नित्यत्वमत्राविनाशित्वमेव विवक्षितं न कोटिद्वयराहित्यम्। वैधर्म्योदाहरणाभासा अपि साध्याव्यावृत्तादयश्चत्वारः[3]। यथा यन्नित्यं न भवति न तदकारणमित्यत्र प्रध्वंसवदिति साध्याव्यावृत्तः[4]। प्रागभाववदिति साधनाव्यावृत्तः[5]। गगनवदित्युभयाव्यावृत्तः। नरशृङ्गवदित्याश्रयहीनः। सर्वे पुनः पक्षहेतूदाहरणाभासानामवान्तरभेदा विस्तरभयादेव नोदाहृता इत्यनुसन्धेयम्। तच्च त्र्यवयवं परार्थानुमानवाक्यमुदाहरणपर्यन्तम्, यद्वोदाहरणादिकमिच्छानुसारेण प्रयोक्तव्यम्। तत्रोदाहरणपर्यन्तं यथा—वह्निमान् पर्वतः धूमवत्त्वात् यो धूमवान् स वह्निमान् यथा महानस इति। उदाहरणादिकं यथा—यो धूमवान् स वह्निमान् यथा महानसः अयञ्च धूमवान् तस्माद्वह्निमानिति। शेषमनुक्तं वार्तिक एव द्रष्टव्यम्।

इत्यनुमानपरीक्षावादो नाम त्रयस्त्रिंशवादः
समाप्तः।

---

१. यो योऽग्निमान्न. ग. २. यत् कारणं. क. ३. साध्यव्यावृत्तादयः. ग. ४. साध्यव्यावृत्तः. घ. साध्याव्यावृत्तिः. ङ. ५. भयव्यावृत्तः. घ. ६. ननु श्च. ङ. ७. णाभासादिकं ग. घ.

॥ अथ शाब्दम् ॥

[शाब्दपरीक्षावादः।]

तत्र विज्ञातेभ्यः पदेभ्यः पदार्थस्मृतिमुखेनासन्निकृष्टेऽर्थे यत् ज्ञानं तच्छाब्दम्। तत्पुनर्द्विविधं पौरुषेयमपौरुषेयञ्च। तत्राप्तवचः पौरुषेयम्। वेदवचोऽपौरुषेयम्। ननु कथं पौरुषेयं शाब्दम्? पुरुषवचसां वक्त्रभिप्रायानुमापकत्वात्। न हि तान्यर्थे प्रमाणं भवितुमर्हन्ति; शङ्काकुण्ठितशक्तित्वात्। तदयुक्तम्; यत इन्द्रियादेरिव शङ्कितव्यभिचारा[1]दपि वाक्याद्वाक्यार्थप्रत्ययः प्रथममुपजनित एव पश्चादन्यतः शङ्कितव्यभिचारोऽपि व्यभिचारनिदानभूतभ्रमादिचतुष्टया[2]भावानिश्चयात् प्रमाणमिति निश्चीयते। यत्पुनर्यत् ज्ञातमर्थप्रतिपत्तिं जनयति न तस्य शङ्कितव्यभिचारस्य तज्जनकत्वमित्युक्तम्, तदयुक्तं; तादृशव्याप्तेरव्यभिचारस्मृत्यपेक्षप्रमितिसाधनलिङ्गत्वप्रयुक्तत्वात्। अन्यथा कथञ्चित् साधर्म्येण शब्देऽपि तदापत्तौ यदर्थप्रतिपत्तिञ्जनयति तज्ज्ञानमशङ्कितव्यभिचारञ्च जनयति, यथा लिङ्गमित्यतादृशस्येन्द्रियस्यार्थप्रतिपत्त्यजनकत्वप्रसङ्गात्।

किञ्च यदि लौकिकं वाक्यं अर्थस्यानभिधायकं[7] तर्हि कथमाप्तवाक्यार्थावगमपूर्विका प्रवृत्तिः। वक्त्रभिप्रायस्यानुमेयत्वात्तद्विशेषणतया वाक्यार्थस्यापि सिद्धिरिति चेत् कुतो वक्त्रभिप्रायस्यैवानुमानम्? अभिप्रायकार्यभूतात् वाक्यलिङ्गादिति चेत् कथमपरिचितचरत्वेनागृहीतसङ्गतेर्वाक्यार्थविशेषगोचराभिप्राय[8]भेद[9]स्य सिद्धिः? तदसिद्धौ[10] च कुतस्तन्निबन्धना प्रवृत्तिसिद्धिः। अथ वाक्यार्थविशेषगोचराभिप्रायभेदस्या[11]-

---

१. थ शब्दम्. घ. २. रादिवाक्यात्. ग. ३. त् प्रामाण्यमिति. ङ. ४. त्पुनर्जात०. ग. ङ. ५. ज्ञातम. ङ. ६. चारं जनयति. ङ. ७. वाक्यार्थस्यानभिधायकं कथमाप्त. ङ. ८. यस्य सिद्धिः. ङ. ९. दसिद्धिः. घ. १०. द्धौ वा. क. घ. ङ. ११. दस्य परि०. ग.

परिचितत्वेऽपि सामान्येनाकांक्षादित्रयमुपलक्षणीकृत्यैतानि पदान्याकांक्षादित्रयोपलक्षितस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि अदुष्टपुरुषप्रणीतत्वात् गामानयेतिवत् इत्याकांक्षादित्रयोपलक्षितपदार्थज्ञानसिद्धावनुमेयानुषक्तसिद्धिपर्यायात् पक्षधर्मताबलाद्वाक्यार्थविशेषविषयज्ञानस्यापि[1] सिद्धिः। यद्येवं कथमाप्तत्वमवधारणीयम् ? न ह्याशयदोषराहित्यमात्रमाप्तत्वम्, अपि तु भ्रान्त्याद्यभावोऽपि, नचायं कचिन्न भ्राम्यतीति कश्चित् निरूपयितुं शक्यः, भ्रान्तेः पुरुषधर्मत्वात्। प्रतिवाक्यन्तु भ्रान्त्यभावावगमे निर्विशेषस्य भ्रममात्रस्य[2] पुरुषेषु निषेधानर्हत्वादर्थविशेषविषयो भ्रमविशेषो निषेद्धव्यः। अत एतद्वाक्यार्थविषयो[3] भ्रमोऽस्य नास्तीति[4] निषेध्यभ्रमविशेषणतया वाक्यार्थोऽपि प्रथममवगन्तव्य एव। न चासौ स्मर्तुं शक्यः; अननुभूतचरत्वात्। न चानुमानादन्यतस्तदनुभव इत्यनुमानप्रवृत्तेः पूर्वमाप्तत्वस्यैवा[5]सिद्धेर्विशेषणासिद्धो हेतुः स्यात्।

एतेन सर्वत्र वाक्यार्थोऽनुमेय एवेति वदन्तः काणादा निरस्ताः; अविशेषितानां पदानां तत्स्मारितानां[6] पदार्थानां वाक्यार्थव्यभिचारित्वेन लिङ्गत्वानुपपत्तेः। निर्दोषत्वेन विशेषणे लौकिकवाक्येषु निर्दोषत्वावगमस्याप्तप्रणीतत्वावगमाधीनत्वात् तदवधारणस्य च पूर्वोक्तक्रमेण वाक्यार्थमनन्तर्भाव्यानुपपत्तेः साध्यसिद्धौ हेतुसिद्धिः हेतुसिद्धौ च साध्यसिद्धिरित्यन्योन्याश्रयप्रसङ्गात्। अपि च यदि लौकिकं वचो वक्त्रभिप्राय-

---

१. यस्यापि. ग. २. भ्रमादित्रयस्य पुरुषेषु. क. ३. एव तद्वाक्य. ङ. ४. द्वाक्यविषयो. घ. ५. मासस्यैवासिद्धेः. ग. ६. नां वाक्यार्थ. ङ.

मनुमापयेत् तर्हि यादृशं वक्त्रभिप्रायस्यानुमापकं तादृशमर्थस्यैव कुतो नाभिधायकम् ? न हि निरस्तभ्रमादिचतुष्टयस्यापि[1] वाक्यस्य व्यभिचाराशङ्कास्ति, येन तद्रूपावगतावपि वाक्यं वाक्यार्थन्नाभिदधीत।

यत् पुनर्वाक्यं मानादुद्भूतार्थविषयं न वेति शङ्कायां विद्यमानायामभिधानानुपपत्तेरवश्यं मूलमानानुमानेन भवितव्यमित्यभिहितं, तदयुक्तम्; मूलमानसद्भावावगमस्यानभिधानं प्रत्यनुपयोगात्। यदि हि मूलमानस्य निश्चये सत्येव वाक्यमभिधायकं नानिश्चय इति स्यात् ततः स्यादपि तत्सन्देहे वाक्यस्याभिधाननिरोधः। न चैतदङ्गीकर्तुं शक्यम्; वेदवाक्यस्यानभिधायकत्वप्रसङ्गात्। वेदवाक्यं मूलनिश्चयाभावेऽपि निर्दोषवाक्यत्वादभिधायकमिति चेत् तर्हि वाक्याभिधाने निर्दोषत्वमेव प्रयोजकं, न मूलसद्भाव इति तदनवगमेऽपि निर्दोषत्वावगमादेव वाक्यमभिदधीत। तस्मादनाप्तवाक्येषु व्यभिचारदर्शनेऽप्यनाप्तप्रणीतत्वादेव निरस्तव्यभिचाराशङ्कमूलमाननिश्चयानपेक्षं यथा वैदिकं वचः स्वार्थस्याभिधायकं तथाप्तवाक्यमपि[2] अनाप्तप्रणीतत्वादेव निरस्तव्यभिचारशङ्कमूलमानानपेक्षमेव स्वार्थमभिदध्यात्। न चाप्तवाक्येषु मूलमाननिश्चयात् पूर्वं व्यभिचाराशङ्कैव न निवर्तत इति वाच्यम्; तदनिवृत्तौ मूलमानानुमानस्याप्यनुपपत्तेः। लिङ्गमपि शङ्कितव्यभिचारमगमकमेव। कथञ्च विशेषदर्शने सत्यपि तददर्शनयोनिः सन्देहोऽवकल्पते, न हि चलनदर्शनेऽप्यूर्ध्वतादर्शनमात्रात् स्थाणुर्वा पुरुषो वेति सन्देहो जायते; सन्देहसामग्र्येकदेशस्य विशेषा-

---

१. वापि वाक्यार्थं नाभिदधीत. ङ. २. मपि नानाप्तप्रणीतत्वादेव. ग. मपि नाप्ताप्रणीतत्वादेव. ङ.

दर्शनस्य विशेषदर्शने सत्यभावात्। अतो वाक्यं साधारणमुपलभ्य तत्र मूलमानसदसद्भावसन्देहेऽप्याशयादिचतुष्टयराहित्यस्य विशेषस्य दर्शनात् तददर्शनयोर्निर्मूलमानसदसद्भावसन्देहोऽपि निवर्तत इत्यननुमितवक्त्रभिप्रायमपि वाक्यं निःशङ्कत्वाभिधायकमेव स्यात्।

किञ्च—

वाक्यार्थोऽनुमया लोके यदा वेदे तदा न किम्।
वेदेऽभिधानञ्चेत्सिध्येत् सिध्येल्लोके ततस्तराम्॥

यदि हि लौकिकवाक्येष्वनुमीयमानवाक्यार्थज्ञानविशेषणतया वाक्यार्थोऽप्यनुमेयः तर्हि वैदिकेष्वपि वाक्यार्थोऽनुमेय एवास्तु किमभिधानव्यसनेन। नहि ज्ञानोपसर्जनत्वख्यातन्त्रये परिहाप्य वाक्यार्थानुमानं प्रति लोकवेदयोः कश्चिद्विशेषमुपलभामहे। अतो वाक्यार्थस्य लोकेऽनुमेयत्वाङ्गीकारे वेदेऽपि तथैव प्राप्तेः शाब्दं प्रमाणमेवोत्सीदेत्। अतः कश्चिदमुष्य चोद्यस्य दुष्परिहरत्वमनवगम्य परिहारकथामग्रन्थीत्। तद्यथा बाधितेऽपि नदीतीरसंसर्गे समभिव्याहारमहिम्नास्ति तावत् संसर्गग्रहः। न च बाधितविषये लैङ्गिकभ्रमोऽवकल्पते। न हि पाथसि वह्व्यभावमवगच्छतो बाष्पात् तदनुमानभ्रमो भवत्येव। अतोऽस्य लैङ्गिकभ्रमत्वानुपपत्तेः प्रमाणान्तराभासत्वं वाच्यम्। तथा च प्रमाणान्तरं शाब्दमपि क्वचित्

---

१. प्याश्रयदोषादिचतुष्टय०. घ. २. यरहितस्य. ग. ३. त्य नुमितं०. ग
४. र्थविज्ञान०. ग. ५. हि तज्ज्ञानोप०. ग. ६. योः किञ्चिद्विशेष०. घ.
७. त्। अत्र कश्चित्. क. त्। अत्र किञ्चिदमुष्य. घ. ८. मग्रथीत्. क. सग्रथत. ग.
९. था साधि०. ग. १०. तावत् न संसर्ग. ङ. ११. भ्रमानु. ङ.

सिध्यतीति । तदिदमसारं ; लिङ्गभ्रमनिदानत्वाल्लैङ्गिकभ्रमस्य सत्यपि बाधे यावल्लिङ्गभ्रमं लैङ्गिकभ्रमस्यानुवृत्तेः । न हि सामग्री विद्यते कार्यन्नोत्पद्यत इति सम्भवति । न च बाधाभावोऽपि तद्धेतुः ; तस्य लैङ्गिकप्रमितिमात्रहेतुत्वेन तदाभासं प्रत्यहेतुत्वात् । अन्यथा शब्देऽपि प्रमितिहेतौ बाधाभावस्य तदाभासं प्रत्यपि हेतुत्वप्रसङ्गात् । अतो लिङ्गभ्रमानुवृत्त्यननुवृत्तिनिबन्धने एव लैङ्गिकभ्रमानुवृत्त्यननुवृत्ती इति । तथा पार्थसि वह्निभ्रमस्य बाष्पे धूमभ्रमः कारणमिति तत्र लिङ्गभूतधूमभ्रमनिवृत्तौ[3] लैङ्गिकभ्रमनिवृत्तिः । नदीतीरफलसंसर्गे तु बाधितेऽपि नद्यास्तीरे फलानि सन्तीति समभिव्याहारदोषेण वाक्यार्थपूर्वकवाक्यविशेषत्वरूपलिङ्गभ्रमोऽनुवर्तत इति लैङ्गिकवाक्यार्थभ्रमानुवृत्तेरप्युपपत्तिः । अतो वाक्यार्थस्य क्वचिल्लिङ्गाधीनसिद्धित्वमभ्युपगच्छतः सर्वत्र तथैव प्राप्तेश्शाब्दभङ्गप्रसङ्गो दुष्परिहर एव । शक्यते हि प्रयोक्तुं वेदेषु[4] एतानि पदान्याकांक्षादित्रयोपेतस्मारितपदार्थसंसर्गवन्ति दुष्टपुरुषाप्रणीतपदत्वात् आप्तप्रणीतपदवत् । यद्वा पदार्थान्येव पक्षीकृत्यैते पदार्थाः परस्परसंसर्गजुषः दुष्टपुरुषाप्रणीतपदस्मारितपदार्थत्वादाप्तप्रणीतपदस्मारितपदार्थवदित्यादि । अतोऽस्मदुक्तयुक्तिभिरेव शब्दस्य प्रामाण्यसिद्धिर्नापरेति लौकिकवचनस्य वाक्यार्थानुमापकत्वे वैदिकस्यापि तथैवानुमापकत्वमेव भवेत् । अथ वैदिकवचनेषु वृद्धव्यवहारसिद्धाभिधानशक्तीनां पदानामपौरुषेयत्वेन निश्शङ्कतयाभिधाननिरोधाभावादभिधानमेव सिध्येत् तर्हि लौकिकेष्वनाप्तप्रणीतत्वादेव पूर्वोक्तनयेन निश्शङ्कत्वात् सुतरामभिधानं सिध्येत् ।

---

१. न अतदभासं. घ. २. शाब्देऽपि. ङ. ३. तौ न लैङ्गिक. ग. ४. देऽप्यतानि. ङ.

अतो लौकिकवचसामभिधायकत्वानुमापकत्वयोर्यैव विधा सैव वैदिकवचसामपीति स्थितम् ।

योऽपि शाब्दधीहेतोः शब्दस्य दोषाभावान्न तस्य क्वचिद्व्यभिचारः, अपि तु लिङ्गस्येति विभागो दर्शितः, सोऽपि न चतुरश्रः । यद्यपि वक्तृगोचराशयदोषादयो[1] न शब्दनिष्ठाः तथापि दुष्टवक्तृभिव्यङ्ग्यत्वस्य शब्दनिष्ठत्वात् तस्यैव[2] च शाब्दज्ञानहेतुदोषत्वाङ्गीकरणात् । तस्मात् सुव्यवस्थितमिदं पौरुषेयमपौरुषेयं च शाब्दमिति । तदवान्तरविशेषास्तु विस्तरभयान्नाभिधीयन्ते इति सर्वमनवद्यम् ॥

इति शाब्दपरीक्षावादः चतुस्त्रिंशवादः
समाप्तः ।

---

१. चरा आश्रयदोषादय. घ. ङ. २. त्वात्तथैव च शाब्द०. घ.

अथोपमानम् ॥

[उपमानपरीक्षावादः]

तत्रानुभूतवस्त्वन्तरस्य वस्त्वन्तरेऽनुभूयमाने तत्प्रतियोगिकपूर्वानुभूतवस्तुविषयासन्निकृष्टसादृश्यज्ञानमुपमानम्। अत्र केचिद्द्रव्यादिवैधर्म्यात् सादृश्यं तत्त्वान्तरमाहुः। तदयुक्तं; गुणावयवसामान्यानामेवैकत्र प्रतीतानामन्यत्र सादृश्यबुद्धिविषयत्वात्। यथा देवदत्तो यज्ञदत्तजन्यत्वेनोपलक्ष्यमाणो यज्ञदत्तपुत्रबुद्धिविषयो भवति, स्वरूपेण तु निरूप्यमाणो देवदत्तबुद्धेरेव। न च स्वरूपवैलक्षण्यमपि; तस्यैव देवदत्तस्योपलक्षणभेदेन विलक्षणबुद्धिविषयत्वात्। तथा गुणावयवसामान्यान्यपि गवयाश्रिताकारेणोपलक्ष्यमाणानि गवि गवयवद्गवयसादृश्यबुद्ध्योर्विषयः। स्वरूपेणैव निरूप्यमाणानि तदित्यनुवृत्तबुद्धेरेव विषयः न तद्वत्तादृशबुद्ध्योरिति।

एतेनैतन्निरस्तं यदाहुः—न सामान्यमनुवृत्तत्वात्, न योगः सम्बन्धत्वात्। तद्वदिति हि तद्धीः न तदिति न संबन्ध इति चेति।

यत्पुनर्गुणादिसामान्यानि गुणादिवर्तीनि बहूनि च। सादृश्यन्तु गुणादिमद्वर्त्यबहु चेति भेद इति। तदसत्; गुणादिवर्तिनामपि गुणादिसामान्यानां समवेतसमवायात् गुणादिमद्वर्तित्वाद्बहुत्वेऽप्येकप्रतियोग्याश्रिताकारेण निरूप्यमाणानामेकत्वाच्चेति।

---

१. अत्रानुभूत०. ग. २. तत्र. ग. ङ. ३. ण निरूप्य०. ग. ङ. ण च निरूप्य०. घ. ४. व न तद्वत्तादृश०. घ. ५. ध्योरपीति. ग. ६. णादिवर्तित्वात्. ग.

यत्तु गुणादिसामान्यानि समवेतसमवायाद् गुणादिमद्वर्तीनि सादृश्यन्तु तद्वतमिति भेद इति । तदतिस्थवीयः; उभयत्रापि तद्वतत्वबुद्धेः अविशेषात् । न हि सामान्यं समवेतसमवायात् तद्वतं, सादृश्यन्तु समवायादेव तद्वतमिति विशेषमुपलभामहे । इयांस्तु भेदः गुणादिसामान्यानि गुणादिवर्तित्वात्तेषाञ्च काचित्कत्वात् पिण्डैकदेशे तद्वतत्वेन भान्ति । सादृश्यन्तु गुणादिसामान्यसमाहाररूपत्वात् तस्य च सकलपिण्डगतत्वात् तद्वतत्वेनैव भातीति ।

यत्तु सामान्यान्याश्रयभेदेऽपि तान्येव । सादृश्यन्तु प्रत्याश्रयं भिन्नमिति भेद इति । तदतिमन्दं; सामान्यानामेव तत्तदाश्रिताकारेण निरूप्यमाणानां प्रत्याश्रयं भेदात् । किञ्च सादृश्यस्य तत्त्वान्तरत्वे देवदत्तो यज्ञदत्तेनाल्पसदृशः विष्णुमित्रो बहुसदृश इति प्रत्ययो[1] विरुध्यते । न हि[2] त्वन्मते सादृश्यस्याऽल्पत्वमहत्वे नाम सम्भवतः; न तावत्परिमाण[3]भेदात्, अद्रव्यत्वेना[4]परिमाणत्वात् । नाप्याश्रयपरिमाणभेदात्, एकरूपस्य देवदत्तस्याश्रयत्वात् । अस्मन्मते गुणादिसामान्यानामल्पसङ्ख्याभाजामल्पत्वं बहुसङ्ख्याभाजां बहुत्वमिति नाल्पत्वबहुत्वयोरनुपपत्तिः ।

यत्त्वभिव्यञ्जकगुणादिसामान्यादल्पत्वबहुत्वाभ्यामभिव्यक्तिबहुत्वाल्पत्वे स्यातां, तच्चालपाभिव्यक्तमल्पं, बह्वभिव्यक्तं[5] बह्विति । तन्न; सादृश्यस्यानवयवत्वात् । घटादौ हि सावयवे कतिपयावयवानभिव्यक्ते-

---

१. त्ययौं विरुध्येते. घ. २. हि तन्मते. ग. ङ. ३. रिणाम०, ग. ङ. ४. रिणाम०. ग. ५. बहुत्वाभिव्यक्तं ङ.

रूपाभिव्यक्तत्वम्, इह त्वनभिव्यक्तांशाभावान्नाल्पत्वम्। न चेमौ प्रत्ययौ भ्रान्तौ; बाधकाभावात्। इत्यलमनेन।

नन्वेवं प्रत्यक्षगवयसादृश्यात् परोक्षगोसादृश्यमनुमेयमस्तु, नोपमेयम्। तन्न; व्याप्त्यसिद्धेः। प्रथमत [१]एव हि गामनुभूय गवयं [२]पश्यन्नुपमिनोति।

स्यादेतत्—यो यत्सादृश्यप्रतियोगी स तेनापि सदृशः यथा यमाविति सामान्येन व्याप्तिलाभ इति। तदयुक्तम्—

[३]सादृश्यमात्रे गोस्साध्ये यतो नेष्टं प्रसिद्ध्यति।
साध्ये गवयसादृश्ये दृष्टान्तः साध्यवर्जितः॥

यदि गवयसादृश्येन व्याप्तिमगृह्णतोऽपि यो यत्सादृश्यप्रतियोगी स [४]तेनापि सदृशः यथा यमौ इति सामान्यव्याप्तेरेव गवयसादृश्यमनुमातुं [५]शक्येत ततः स्यादप्युपमानस्यानुमानेऽन्तर्भावः। न च तत् शक्यम्। न हि सामान्यव्याप्तिमूला साध्यसिद्धिः स्वसिद्धिपर्यवसानायानियतरूपविशेषमालिङ्गन्ती [६]नियतरूपं गवयसादृश्यविशेषमालिङ्गितुमर्हति; तथा सति कलमबीजेनाङ्कुरविशेषस्य व्याप्तिमगृह्णतोऽपि योऽङ्कुरस्य बीजव्याप्त इति सामान्यव्याप्तिग्रहादेव कलमबीजानुमानोदयप्रसङ्गात्। अतस्सामान्यव्याप्त्या सादृश्यमात्रे साध्ये न गवयसादृश्यस्येष्टस्य सिद्धिः। गवयसादृश्ये तु साध्ये दृष्टान्तः साध्यविकल इति कथमनुमानान्तर्भावः?

---

१. एव गामनुभूय. ग. २. श्यन्नुमिनोति. क. ग. ङ. ३. गोरसाध्ये. घ. ४. श इति सामान्यव्याप्तेरेव. ग. ङ. ५. शक्यते. क. ६ क्षी. ङ.

यत्तु यदि प्रत्यक्षसाधर्म्यात् परोक्षविषयगोसाधर्म्यज्ञानाय[1] प्रमाणान्तरं कल्प्यं तर्हि प्रत्यक्षपुरुषवैधर्म्यात् परोक्षमहिषवैधर्म्यज्ञानायापि[2] प्रमाणान्तरं कल्प्यं स्यादिति । अत्र वदामः—यस्य तावत् प्रमाणस्य न कथञ्चिदपि कल्पप्रमाणसामग्रीतो निर्वाहः तस्यैव तदतिरेकेण सामग्र्यन्तरकल्पना[3] । यस्य तु निर्वाहस्तस्य तदतिरेकेण सामग्र्यन्तरकल्पनमन्याय्यमित्यविवादम् । तत्र च वैधर्म्यं द्विविधम्—पुरुषगोचरधर्मायोगित्वं पुरुषागोचरधर्मयोगित्वञ्चेति । ततश्च प्रमाणसामग्रीत्वेन कल्पयोग्यस्मृत्यनुदयादेव पुरुषगोचरधर्मायोगित्वलक्षणवैधर्म्यविशिष्टत्वेनापि पुरुषविधर्मा महिष इति विशिष्टप्रत्ययोपपत्तौ नामानाधिकपुरुषागोचरधर्मयोगित्वलक्षणवैधर्म्यान्तरपूर्वकविशिष्टप्रत्ययाय सामग्र्यन्तरं कल्प्यम् । साधर्म्यस्य तु न कथञ्चिदपि कल्पसामग्र्यन्तर्भाव इति सिद्धमुपमानं प्रमाणान्तरमिति ।

यत्तु नैयायिकोक्तमुपमानं गवयशब्दवाच्यः क इति पृष्टवतो[4] गोसदृशो गवयशब्दवाच्य इति श्रुतातिदेशवाक्यस्य गोसदृशपिण्डमनुभवतः स्मरतश्च वाक्यार्थं अयमसौ गवयशब्दवाच्य इति भवति मतिः सोपमानफलमिति । तदयुक्तम्; तस्य वाक्यप्रत्यक्षसमाहारफलत्वात् । ननु गोसदृशो गवयशब्दवाच्य इत्यत्र गोसादृश्यं निमित्तस्वरूपानुप्रवेशि निमित्तोपलक्षकं वेति सन्देहात् पूर्वं निमित्ततावतीर्णेन समयपरिच्छेदसिद्धिः । अनुभूयमाने तु गवये वाक्यमनसन्निहितमेव । न च यो यत्रासति

---

१. क्षगवयसाधर्म्यज्ञानाय. ग. ङ. २. दिति । तत्र वदामः. ङ. ३. नात् यस्य तु. ङ. ४. नुभूतवतः. ङ. ५. स्य वाक्यस्य प्रत्यक्ष. क.

वृत्त्यन्तरे प्रयुज्यते स तस्य वाचकः यथा गोर्गोशब्द इत्यनुमानात् समयपरिच्छेद इति वाच्यम् ; असति वृत्त्यन्तर इति हेतुविशेषणस्य सन्दिग्धासिद्धत्वात्। न च वाच्यं वाक्यगतस्य गोसदृशपदस्य गोसादृश्यविशिष्टनिमित्तपरत्वं गोसादृश्योपलक्षितनिमित्तपरत्वं वेति सन्देहाद्वाक्यं समयानिश्चायकत्वादपर्यवसितमिदानीं स्मृतिसमारूढं समयपरिच्छेदायालमिति; वाक्यस्य प्रागपर्यवसितत्वासिद्धेः। वाक्यगतस्य हि गोसदृशपदस्य[1] यद्यपि विशेषणोपलक्षणयोः सन्देहः तथाप्युभयसाधारणसामानाधिकरण्यमात्रेणापि वाक्यस्य पर्यवसितत्वान्नानन्वयः[2]। यत्र तु पदार्थ एवान्वययोग्यः तत्र मानान्तरोपनीतेनान्वयः यथा गङ्गायां घोष इत्यत्र। न च प्रकृते तथा सामानाधिकरण्येनाप्यन्वयोपपत्तिरिति। तदाहुः—

श्रुतान्वयादनाकांक्षं न वाक्यं ह्यन्यमिच्छति।
पदार्थान्वयवैधव्यात्तदाक्षिप्ते हि सङ्गतिः॥

इति। अत्र ब्रूमः—गवयशब्दवाच्यः क इति प्रश्ने गोसदृशो गवयशब्दवाच्य इत्युत्तरं तावदवश्यं निमित्तकथनपरमित्यविवादम्। अन्यथा प्रश्नोत्तरयोरसङ्गतिः[3] स्यादिति। अत्र च प्रष्टव्यो नैयायिकः किं गोसदृशपदेन निमित्तमुपदर्शितं न वेति। तत्र यद्युपदर्शितं तर्हि[4] तदैव गवयशब्दवाच्यत्वमपि[5] परिच्छिन्नमित्युत्तरत्रापि[6] अयमसौ गवयशब्दार्थ[7] इति सप्रत्यभिज्ञं प्रत्यक्षमेव।

---

१. षयोः सन्देहः क. घ. ङ. २. नान्वयः. ग. ङ. ३. तत्र च. ग. ४. तदेव. ङ. ५. त्वमिति किमपि परिच्छिन्न. ङ. ६. त्राप्यसौ गवय. ङ. ७. शब्दवाच्यार्थ इति. ग. ङ.

अथ गोसदृशपदस्य निमित्तपरत्वेऽवगतेऽपि गोसादृश्यविशिष्ट-परत्वं[1] गोसादृश्योपलक्षितपरत्वं वेति सन्देहात् निमित्तमनुपदर्शितं तर्हि वाक्यमपर्यवसितमेव; तात्पर्यसन्देहे वाक्यस्यापर्यवसानात् नवकंबलो वणिगितिवत्। न हि तत्र प्रथमं विमर्शारूढान्वयादृते वाक्यार्थनिश्चयः, पश्चात्तु तात्पर्यार्थावगतौ स्मृतिस्थं तदेव वाक्यं वाक्यार्थनिश्चायकमिति तद्वदिहापि। यदि[2] न पूर्वं निमित्तावगमः तर्हि गवये प्रत्यक्षे तदेव वाक्यं स्मृतिस्थं तत्सहायं समयपरिच्छेदाय स्यात्। पटो भवतीति वाक्ये तु पटस्य रक्ततादिसन्देहेऽपि पटपदस्य पट एव तात्पर्यात् तस्य चासन्देहा-दन्वयप्रतिपत्तिरेव। न चेहापि सामानाधिकरण्यमात्रे[3] तात्पर्यम्; उक्तेन न्यायेन निमित्तपरत्वात्, सामानाधिकरण्यमात्रस्य[4] चानिमित्तत्वादिति। तस्मादस्मदुक्तमेवोपमानमिति[5] सर्वं निर्मलम्।

इति उपमानपरीक्षावादः पञ्चत्रिंशः
समाप्तः।

---

१. त्तमुपदर्शितं. क. घ. २. दि पूर्वं. ग. ३. रणे तात्पर्यम्. क. ङ. ४. स्य वानिमित्तत्वादिति. ग. स्य निमित्तत्वादिति. घ. ५. नं निर्मीलतीति सर्वं. ग.

॥ अथार्थापत्तिः ॥

[अर्थापत्तिपरीक्षावादः ।]

अर्थापत्तिस्तु, तत्रैकदेशिप्रणीतमर्थापत्तिलक्षणम् —उपलब्धोऽर्थः कल्पनां विनार्थान्तरं सन्देहयन्नर्थं कल्पयति सन्दिग्ध एव वा कल्पयति। विदितश्च यः सदा गृह एव दृष्टः कश्चित्कालं जीवनश्च निश्चितं गणितागमेन तस्य गृहेऽदर्शनात् पूर्वनिरूपितगृहदेशत्वधर्महानाज्जीवनं सन्देहं नीतं बहिर्भावकल्पनया पुनर्निश्चितमिति गृहाभावो जीवने सन्देहमापादयन् गमयति जीवनं वा तदापादितसन्देहं गमयति। उभयथापि हेतुस्वरूपानुप्रविष्टस्य जीवनस्य सन्दिग्धत्वात् सत्यामपि व्याप्तौ नानुमानत्वमतः प्रमाणान्तरमिति।

तदिदमसारम्। तथा हि—सन्दिग्धे जीवने तस्य बहिर्वृत्तित्वेन पुनर्निश्चय एव तावदशक्यः। सर्वत्र सन्दिग्धे वस्तुन्यन्यतरपक्षावधारणं तदसाधारणधर्मोपलम्भादेव। यथोर्ध्वत्वदर्शनात् स्थाणुर्वा पुरुषो वेति सन्देहे पुरुषासाधारणचेष्टादिधर्मदर्शनादेव पुरुषत्वनिर्णयः तथेहापि यदि गृहाभावदर्शनेन जीवनं सन्दिग्धं तर्हि जीवनासाधारणधर्मान्तरदर्शनादेव बहिर्वृत्तितया जीवनं निश्चेतव्यं, न च तदस्ति अतः कथं सन्दिग्धाज्जीवनात् बहिर्वृत्तित्वेन जीवननिश्चयः कथञ्च यस्मादेवदत्तो जीवति

---

१. ष्टः किञ्चित्कालं. ग. ष्टः कश्चित्कालं. घ. २. र्वनिरूपित. ग. ३. था हेतु. क. ४. रुषसाधारण. घ. ५. पि गृहाभाव. घ. ६. वनसाधारण. ग. ७. ति न वा. घ.

वा न वा तस्माद् बहिरस्तीति कल्पनीयम्? न हि कोटिद्वयसाधारणं बहिरस्तित्वम्; अजीवनपक्षे प्रमाणविरुद्धत्वात्। अतः कथं तस्मिन्नपि शङ्क्यमाने तद्विरुद्धं बहिरस्तित्वं निश्चीयते। सन्देहस्तु कारणानुगुणो बहिर्भावेऽपि भवेदिति। नैवमनुमानार्थापत्त्योर्भेदः, न चैतल्लक्षणमपि। ननु जीवतो गृहाभावाद्बहिर्भावव्याप्तादनुमानमेव[1] नार्थापत्तिः। तदयुक्तम्; यतः।

हेतू भवेतां प्रत्येकं न गृहाभावजीवने।
बहिस्सत्त्वमविज्ञाय न च सिध्येत् समुच्चयः॥

गृहाभावजीवनयोर्हि प्रत्येकमलिङ्गत्वात् संसृष्टयोरेव लिङ्गत्वं वाच्यम्[2]। जीवता गृहे बहिर्वा स्थातव्यमिति नियमाज्जीवने प्रतिपन्ने गृहे बहिर्वा स्थितिरपि प्रतिपन्नैव[3]। ततश्च देवदत्तो गृहे बहिर्वा स्थितो गृहे नावस्थित इत्युभयं परस्परविरुद्धं नदीतीरफलसदसद्भावविषयवाक्यद्वयप्रतिपन्नार्थद्वयवन्न समुच्चित्य प्रतिपत्तुं क्षमम्। बहिर्भावकल्पनोत्तरकालन्तु जीवनगृहाभावयोस्समुच्चित्य प्रत्ययो भवन्नपि प्रमेयाभावान्नानुमानाङ्गमिति। नन्वेवं यदि जीवतो गृहाभावात् न बहिर्भावावधारणं कुतस्तर्हि तदवगमः? प्रमाणयोर्विरोधादिति ब्रूमः। ननु प्रमाणश्चेन्न विरोधः विरोधश्चेत् न प्रमाणम्। तन्न; असाधारणविषयस्यासाधारण[4]विषयेण विरोधादप्रामाण्यं इदं रजतं नेदं रजतमितिवत्। साधारण-

---

१. मेवेदं नार्थापत्तिः. ङ. २. च्यम्। तत्र जीवता. ङ. ३. व। अतश्च. ङ. ४. स्य साधारण. ग. ङ.

विषयस्य तु प्रामाण्यं विरोधेऽपि विषयान्तरे व्यवस्थितत्वात्[1]। यथात्रैवोदाहरणे देवदत्तो गृहे वा बहिर्वा संस्थितो गृहे नावस्थित इति प्रमाणद्वयम्। न च नानयोर्विरोधः; गृहे नावस्थितो गृहे बहिर्वावस्थित इति विरुद्धविषयत्वात्। न चाप्रामाण्यम्; इदं रजतं नेदं रजतमितिवत् सर्वथा विषयापहाराभावात्। सर्वत्र चार्थापत्तौ साधारणासाधारणप्रमाणाविरोध एव सामग्री। स एव च भाष्येऽनुपपत्तिरित्युच्यते। तेदविरोधोपपादनाय च विषयान्तर एवैकस्य[3] स्थापनं सार्थापत्तिरिति यद्युच्येत भवतु साधारणासाधारणप्रमाणाविरोधस्सामग्री तथाप्यनुमानादनतिरेक एव। सर्वतः[4] साधारणप्रमाणस्य[5] स्वविरुद्धासाधारणप्रमाणगृहीतेतरविषयत्वव्याप्तिरिति। तन्न; तादृशव्याप्तेरर्थापत्तिं विना दुर्ग्रहत्वात्।

अथैकं[6] देशं स्वसम्बन्धितया प्रत्यक्षयन्[7] देशान्तराणि[8] योग्यानुपलब्ध्या निषेधन्[9] जीवता स्वेन तत्र वान्यत्र वा स्थातव्यमिति साधारणप्रमाणस्यान्यत्र[10] स्वाभावग्राहिणानुपलम्भेन सह विरोधे साधारणप्रमाणं तत्रैव स्वसत्त्वविषयं पश्यन् व्याप्तिं निश्चिनोति। तन्न; साधारणप्रमाणं[11] हि तत्र वान्यत्र[12] वेत्यनियतैक[13]विशेषविषयपरिग्रहेणेतरविशेष[14]निषेधात्मकं नतु युगपदुभयालम्बनम्। तथा च तदेशावस्थानलक्षणविशेषलाभेन कृतार्थं सत् पश्चात्तदितरदेशावस्थानलक्षणविशेषान्तरनिरपेक्षं तद्बाधेऽपि न बाध्यत इति कथं तत्र प्रमाण[15]विरोधं पश्यति कथन्तरां च व्याप्तिं

---

१. त्। यत्रैवोदाहरणे. ग. ङ. २. तदा विरोधोप. ङ. ३. कस्यावस्थापनं. घ. ४. वैत्रं. ङ. ५. स्य सविरुद्ध. घ. ६. थैकदेशं. ग. ङ. ७. क्षवदेशान्तराणि. ङ. ८. णि तु. क. ९. धयन्. ग. ङ. १०. त्र स्वभाव. ग. ङ. ११. णं तत्र. ङ. १२. वेति नियतैक. घ. १३. कदेशविषय. ङ. १४. षपरिग्रहेणेतर. ग. १५. माणं विरोधं. ङ.

गृह्णातीति। प्रकृते पुनरर्थापत्त्युदाहरणे[1] तु बहिर्भावकल्पनायाः पूर्वलब्धैक-विशेषं साधारणं विशेषमात्रापेक्षमेकविशेषाबाधेऽपि[2] बाध्यत एवेति भेदः।

नन्वेवं यो धूमवान् सोऽग्निमानिति व्याप्तिग्राहकप्रमाणस्य पर्वत-धूमवत्त्वप्रत्यक्षस्य[3] च पर्वते वह्निमत्तां विना परस्परानुपपत्तिलक्षणविरोधा-द्वह्निमत्तापि कल्प्यतां किमनुमानेन? स्यादेवं यद्यनयोर्विरोधो भवति। न त्वसावस्ति। न ह्येकगृहीतं विषयमितरदंशेनापि निषेधति। न च लेशतोऽप्यनपहृतविषयस्य विरोधः सम्भवति; अतिप्रसङ्गात्।

यत् पुनरनुपपत्तिमात्रं व्याप्तिबलायत्तं तन्नार्थापत्तेः कारणम्। ननु[4] यो धूमवान् सोऽग्निमानिति व्याप्तिग्राहकप्रमाणेन पर्वते वह्निमत्त्वं प्राप्तं वह्निमत्तानुपलब्ध्या विरुद्धमिति तदपि तत्र कल्प्यमेव। तन्न; सत्यामपि तादृशव्याप्तावविशेषेण पर्वते वह्निमत्त्वानुमानात् पूर्वं तदनुपलम्भेन विरोधाभावात्। न ह्यप्राप्तस्य निषेधो विरोधमापादयति[5]। यथा च पर्वते वह्निमत्त्वमनुमानमन्तरेण व्याप्तिमात्रात् न सिध्येत्[6] तथानुमानपरीक्षायामेव समर्थितम्।

एतेन धूमवतः[7] पूर्वभागे परभागे[8] वा वह्निरिति व्याप्तेः पूर्वभागे योग्यानुपलब्धिनिरोधात्[9] परभागे वह्निरपि कल्प्यः स्यादिति निरस्तम्; उक्तेन क्रमेण पर्वते वह्निमत्त्वानुमानात् पूर्वं पूर्वभागे वह्निमत्त्वप्रतिषेधेन

---

१. णबहि. ग. ङ. २. षबाधोऽपि. क. घ. षबोधोऽपि. ङ. ३. स्य पर्वतवह्निमत्तां विना न परस्परानु. ङ. ४. त्वं वह्निमत्तानुपलब्ध्या विरुद्धमिति. ङ. ५. मासादयति. ङ. ६. था पर्वते. ग. घ. ७. त् तत्तथानुमान. ङ. ८. वत्त्वपूर्वभागे. ङ. ९. गे वह्निरिति. घ. १०. लम्भविरोधात्. ङ.

विरोधस्यैवानुपपत्तेः। उत्तरकालन्तु[1] पूर्वभागे योग्यानुपलम्भनिरोधात् परभागे वह्निमत्त्वज्ञानस्यार्थापत्तित्वेनाभ्युपगमात्।

एतेन यदाहुः—

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः।
न मानयोर्विरोधोऽस्ति प्रसिद्धे चाप्यसौ समः[3]॥

इति। तदपि पराकृतं वेदितव्यम्।

ननु यदि सर्वार्थापत्तौ साधारणासाधारणप्रमाणविरोधः[4] सामग्री कथं तर्हि शक्तिकल्पनम्? उच्यते—यादृशात् करतलानलसंयोगादाद्रौ दृष्टः तादृशादेव मन्त्रादिप्रयोगे सति कदाचित्तददर्शनात् करतलदहन-संयोगातिरिक्तं[5] दृश्यमदृश्यं वा यत्किञ्चित् कारणमस्तीति साधारणप्रमाणं गमयदृश्यकारणाभावग्राहिणा[6] योग्यानुपलम्भेन प्रतिहन्यते। तदनयोर्विरोधादविरोधायादृश्यमपि कारणं कल्प्यं, तच्छक्तिरित्युच्यते। न चादृष्टसाकल्यवैकल्याभ्यामेव[7] तदुपपत्तेरविरोधः; तस्य[8] दृष्टकारणसाकल्यमात्रहेतुत्वात्। अन्यथा दृष्टकारणसाद्गुण्येऽप्यदृष्टवैगुण्यमाशङ्कमानानां क्वचिदपि कार्यानिश्चयेन प्रवृत्त्यनुपपत्तेः कर्मानन्तरभाविविभागोत्पत्तिनियमभङ्गप्रसङ्गाच्च। तथा मन्त्रप्रतिबद्धेन च पावकेनादह्यमानस्य तदितरपावकेनापि तत्र एवादह्यमानत्वप्रसङ्गाच्च। स्यादेतत्—प्रतिबन्धकाभावः

---

१. म्भाविरोधात्. ङ. २. दाहुरिति—अनियम्यस्य. घ. ३. मः॥ तदपि. घ. ४. रोधसामग्री. ग. ५. नसंयोगस्यातिरिक्तं. क. नस्य संयोगस्यातिरिक्तं ग ६. रोधायादृश्यमपि कारणं. ग. ७. दुत्पत्तेः. विरोधः ग. ८. तत्र दृष्टकारणं साकल्य. ङ. ९. रणात् साद्गुण्येऽपि. ङ. १०. नादह्यमानस्य. ङ.

कारणम्। तस्य च प्रतिबन्धकसन्निधौ निवृत्तेः कार्यानुत्पत्तिरिति। तन्न; अभावस्याकारकत्वात्। न च वृन्तसंयोगाभावसहकृतं फलगुरुत्वं पतनहेतुरिति वाच्यम्; तत्रापि पतनप्रतिबन्धिद्रव्यापेक्षया बलवतो गुरुत्वस्यैव पतनहेतुत्वस्वीकारात्।

यत्तु विहिताकरणात् प्रत्यवाय इति। तत्रापि यदहरहरुपानीयमानमवर्जनीयमेनः तस्यैव निखनन्तिरक्षापितस्य प्रत्यवायहेतुत्वं न तु विहिताकरणस्य। यथोक्तं—

स्वकाले यदकुर्वंस्तु करोत्यन्यदचेतनः।
प्रत्यवायो हि तेनैव नाभावेन स जन्यते॥

इति।

ननु विशेषादर्शनस्य संशयहेतुत्वं योग्यानुपलम्भस्य चाभावज्ञानहेतुत्वं भवद्भिरेव स्वीकृतम्। सत्यम्। अत एवाकारकत्वादित्युक्तम्। द्वयी खलु वस्तुनः सिद्धिः, ज्ञानतः स्वरूपतश्च। तत्र ज्ञानस्वरूपसिद्धौ व्याप्रियमाणानि ज्ञापकान्युच्यन्ते। स्वरूपसिद्धौ व्यापृतानि तु कारकाणि। तदेवं योग्यानुपलम्भविशेषादर्शनयोर्ज्ञानस्वरूपे कारकत्वेऽपि तदितरत्र कारकत्वाभावात् ज्ञापकत्वमेव न कारकत्वम्। एष एव हि ज्ञापककारकयोर्भेदः—यत् ज्ञाने कारकत्वं तदितरत्र कारकत्वञ्चेति। तस्माद्भावस्य ज्ञापकत्वमेव न कारकत्वम्।

---

१. तस्यास्य च. ङ. २. नुपपत्तिरिति. ङ. ३. पतत्पतनहेतुरिति. क. ४. मेव न तस्यैव. ङ. ५. तस्य निख. ग. ६. योऽपि. क. योऽस्य. घ. ङ. ७. ते॥ ननु. घ.

यत्त्वभावस्याकारकत्वे भावस्यापि अकारकत्वप्रसङ्ग इति, तदयुक्तम्; भावकारकत्वस्यावश्याश्रयणीयत्वात्। अन्यथा भावसामग्र्यामसत्यामपि प्रतिबन्धकाभावमात्रेण कार्योत्पत्तिप्रसङ्गात्।

अथ भावसामग्र्यां सत्यामपि प्रतिबन्धके सति कार्यानुत्पत्तेः प्रतिबन्धकाभावोऽपि कारणमुच्यते। तन्न; भावसामग्र्यां सत्यां कार्यानुत्पत्तेरसम्भवात्। यदि हि भावसामग्री परिपूर्यते भवत्येव कार्यमिति। तदेवं भावसामग्रीसम्भवे प्रतिबन्धकाभावापेक्षया कार्यविलम्बादर्शनात् प्रतिबन्धकाभावे सत्यपि भावसामग्र्यपेक्षया कार्यविलम्बदर्शनाच्चावश्याङ्गीकरणीया भावसामग्र्येव कार्यहेतुः न प्रतिबन्धकाभाव इति।

यत् पुनरभावस्य कारकत्वनिवृत्तौ कार्यत्वमपि निवर्तत इति, तदयुक्तम्; अनन्यथासिद्धमुद्गरपाताद्घन्नयव्यतिरेकानुविधायिनो घटादिप्रध्वंसस्य कार्यत्वावश्यंभावात्।

एतेनैतन्निरस्तम्। यदाहुः—

'भावो यथा तथाभावः कारणं कार्यवन्मतम्।'

इति।

अतो यत् कारकं तद्भावरूपमेवेति भावत्वनिवृत्तौ कारकत्वमपि निवर्तत इति न प्रतिबन्धकाभावस्य कारकत्वम्। अपि च प्रतिबन्धकाभावस्य कारकत्वे प्रतिबन्धकेतरेतराभावस्य प्रतिबन्धकसन्निधावपि सद्भावात् कार्योदयप्रसङ्गः। न च प्रतिबन्धकप्रागभावप्रध्वंसौ कारणम्; देशान्तरस्थेऽपि प्रतिबन्धके तयोरभावेन कार्यानुदयप्रसङ्गात्।

---

१. श्याश्रयणीया भाव. घ. २. अन्यथासिद्ध. ग. ३. तेन तन्निरस्तम्. क. ४. केतरयोरभावेन. ग. घ.

स्यादेतत्—प्रतिबन्धकसंसर्गाभावः कारणम्। न च प्रतिबन्धकसंसर्गे सत्यप्युत्तम्भकसन्निधौ कार्यदर्शनात् तस्याकारणत्वमिति वाच्यम्; असत्प्रतिपक्षस्य मण्यादिस्वरूपस्य प्रतिबन्धकत्वात्, उत्तम्भकसन्निधौ च सत्प्रतिपक्षकत्वात् मण्यादिस्वरूपस्य प्रतिबन्धकत्वमेव नास्तीति। तदयुक्तम्; मण्यादौ प्रतिबन्धके संसृज्य वियुज्य पुनस्संसृष्टे कार्योदयप्रसङ्गात्। अस्ति हि तदापि प्रथमसंसर्गप्रध्वंसः; तस्याविनाश्यत्वात्[1]। न च सर्वेषामेव संसर्गाभावानां सम्भूय हेतुत्वम्; तथा सति संसर्गप्रध्वंसे विद्यमानेऽपि भाविसंसर्गान्तरप्रध्वंसानां भूतसंसर्गप्रागभावानाञ्च सम्भवाभावेन कार्यानुदयप्रसङ्गात्। एतेनेतरेतराभावान्यत्वप्रयोजकाभावोऽपि प्रत्यूढो वेदितव्यः।

यत्पुनरुच्यते सर्वत्र प्रतिबन्धकसंसर्गप्रागभाव एव हेतुः। न चाग्न्युदाहरणे प्रतिबन्धकमण्यादौ संसृज्य वियुक्ते संसर्गप्रागभावाभावात् कार्यानुदयप्रसङ्गः; तत्र तेजोवयवानां विशरारुत्वेन प्रतिबन्धकसंसृष्टानामजनकत्वादन्येषाञ्च तत्कालोत्पन्नानां संसर्गप्रागभावसहकृतानामेव जनकत्वादिति। तदयुक्तम्; स्थिरावयवानामेव तुलादीनां प्रतिबन्धकसन्निधौ कार्यमनुत्पादयतां पुनस्तदपगमे कार्योत्पाददर्शनात्। तथा चोपदिशन्ति—

कुलिशेन्द्रगतन्नाम बहिर्मांसाष्टकावृतम्।
शुद्धस्यापि तुलास्थस्य गुरुत्वं जनयेद्ध्रुवम्॥

३ ४
वायुवेश्मनि वायुस्थं बहिरष्टानिलावृतम्।
नाम कुर्यात्तुलास्थस्य ब्रह्महन्तुश्च लाघवम्॥

---

१. नाशित्वात्, घ. २. जकभावोऽपि. क. ३. स्थां. ङ. ४. बर्हिरष्टा. क.

[1]वह्न्यात्मा वदने न्यस्तो नकारो रसनां दहन् ।
मन्त्रसिद्धिं हरेत् पुंसो बाढं च प्रतिभां तथा ॥

[2]कुर्याद्बर्हिशिखास्त्रस्था प्रतिवादिनि सूक्ताम् ।

इत्यादि ।

किञ्च प्रतिबन्धकसंसर्गाभावस्य हेतुत्वे संसृज्यमानेऽपि प्रतिबन्धके प्रतिबन्धकान्तरसंसर्गाभावात् कार्योदयप्रसङ्गः ।

यत्पुनरत्रोच्यते[3]—यथा यज्जातीये सति कार्यं जायत इत्यवधृते[4]-ऽर्थादसति न जायत इति स्थिते तज्जातीयस्य कस्यचित् सम्भवेऽपि तज्जातीयान्तरासम्भवान्न कार्योदयः, तथा यज्जातीये सति प्रतिबन्धो जायत इत्यवधृते अर्थादसति न जायत इति स्थिते तज्जातीयस्य कस्यचित् सम्भवेऽपि तज्जातीयान्तरासम्भवान्न प्रतिबन्धानुदयः स्यात्, अनुकूलप्रतिकूलयोरविशेषादिति । तदयुक्तम् । नहि सहकारिषु सत्सु बीजजातीये कस्मिंश्चिदपि सति कार्यं जायत इत्यवधृते बीजजातीयस्य कस्यचिदसम्भवमात्रेणाङ्कुरस्यासम्भवोऽप्यवधृतो भवति, तथा सति पूर्वावगतस्यैव विरोधात् । किन्तु बीजजातीये सर्वस्मिन्नेवासम्भवत्यङ्कुरस्यासम्भव इति[5] । तस्मात् सहकारिषु सत्सु तज्जातीयकारणमात्रादेव कार्योत्पत्तिः । कार्यनिवृत्तिस्तु तज्जातीयसमस्तकारणनिवृत्तेरेव ।

---

१. वन्ध्यात्मा वदने न्यस्तो कुगरा रसनाम्दविन् . ग. वह्न्यात्मवदने. ङ. २. द्बर्हिशिवोऽस्यस्य प्रतिवादिनि. ग. द्बर्हिशिखास्यस्था प्रतिवादिनि. घ. द्बर्हिशिखोऽस्त्रस्य प्रतिवादिनि. ङ. ३. ते यज्जातीये. ग. ङ. ४. धृतोऽर्थादसति. घ. ५. स्मिन्नेवासम्भव इत्यङ्कुर. क. ङ.

यत्पुनरेकप्रतिबन्धकसन्निधानादेव प्रतिबन्धसिद्धेः कार्यानुत्पत्तिरिति, तदयुक्तम्; एकप्रतिबन्धकसन्निधौ तदभावमात्रस्यैव प्रतिबन्धात्। सर्वो हि स्वाभावमेव प्रतिबध्नाति नाभावान्तरम्। अत एकबीजप्रतिबन्धेऽप्यप्रतिबद्धबीजान्तरसहितैः क्षितिपवनपाथोभिरिवैकप्रतिबन्धकाभावप्रतिबन्धेऽप्यप्रतिबद्धप्रतिबन्धकाभावान्तरसहकृतैः कार्योत्पत्तिर्दुरपह्नवैव, ननु सिद्धापि शक्तिः किं प्रतिबन्धकेन नश्यति, अभिभूयते वा? न नश्यति; प्रतिबन्धकापगमे कार्यानुदयप्रसङ्गात्। नाभिभूयते; मूर्तिरहितायाः तदयोगादिति। तदयुक्तम्। द्वे किल भावानां शक्ती एका भावकारणजन्यौ इतरा तज्जन्येति। तत्र भावकारणजन्या सहजेत्युच्यते। सा च सहकारिषु सत्सु कार्योत्पत्तिविनाश्यां कार्यजननशक्तिमुत्पादयति। सा च कार्यमेव। एवञ्च यत्र कार्यजननशक्तिरुत्पन्नापि प्रतिबन्धकसन्निधेर्नश्यति तत्र कार्यानुदयेऽपि प्रतिबन्धकापगमे पुनरुत्पन्नया कार्यजननशक्त्यैवाविनष्टया कार्योत्पत्तिः। यत्र पुनरप्रतिबद्धबलेन प्रतिबन्धकेन सहजशक्तेरपि विनाशः तत्र कार्योदय एव पुनर्नास्तीति। एवमन्यत्राप्युदाहरणेषु साधारणासाधारणप्रमाणविरोधस्यार्थापत्तिसामग्रीत्वं द्रष्टव्यम्। अतोऽस्त्येवानुमानादर्थापत्तेर्भेदः॥

सा पुनर्द्वयी दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति। ननु केयं श्रुतार्थापत्तिः? द्वारं द्वारमित्येकवाक्यार्थप्रतिपत्त्यर्थमुच्चरितेन द्वारपदेन प्रतिपन्नस्य द्वारपदार्थस्य सान्वयप्रतिपादनाय योग्येनाकाङ्क्षितेनावरणाद्यर्थान्तरेण

---

१. त्पुनरनेक. ङ. २. बन्ध. ग. घ. ङ. ३. प्यप्रतिबन्धकाभावान्तर. ग. प्यप्रतिबन्धप्रतिबन्धकाभावान्तर. घ. ४. न्या। अपरा तज्जन्येति. ग. ५. ५. न्निधौ. ग. ६. बन्धबलेन. ग. ङ. ७. नर्द्वे. क. ८. त्यर्थसमुच्चितेन, ङ.

श्रुतशब्दविषयेणाश्रुतशब्दविषयेण वा भवितव्यमिति साधारणप्रमाणस्य श्रुतशब्दविषयत्वेन तादृशार्थान्तराभावग्राहिणानुपलम्भेन सह विरोधादाकाङ्क्षितस्य योग्यस्यावरणाद्यर्थान्तरस्याश्रुतशब्दविषयत्वेन कल्पनं श्रुतार्थापत्तिरिति। नन्वेवं श्रुतार्थापत्तेर्दृष्टार्थापत्तेश्च को भेदः? श्रूयताम्— श्रुतार्थापत्तिः शब्दमेव कल्पयति नार्थमिति। ननु द्वारशब्दार्थस्यावरणाद्यर्थान्तरमन्तरेणानुपपत्तेः तत् कल्प्यं न तच्छब्दः। मैवम्; आवरणादिशब्दगम्येनैवावरणाद्यर्थेन विनानुपपत्तेः, शाब्दस्य शाब्देनैवान्वयात्। तथा च शब्दगम्यार्थे कल्प्ये लाघवाच्छब्द एव क्लृप्ते[1] तद्गम्यस्यार्थस्य तत एव सिद्धेरर्थापत्तिपरिक्षयाच्छब्द एव कल्प्य इति।

तदाह—

'प्रमाणग्राहिणीत्वेन यस्मात्[2] पूर्वविलक्षणा।'

इति। शाब्दस्य शाब्देनैवान्वय इति नियम एव कुत इति चेत् व्युत्पत्तिबलादिति ब्रूमः। तथा हि—व्युत्पित्सुर्गामानय गां बधानेति प्रयोजकवृद्धवाक्यश्रवणात्[3] प्रयोज्यवृद्धगतां गवानयनविषयां गोबन्धनविषयाञ्च शब्दकारणिकां धियमनुमाय[4] तत्र तत्रावापोद्वापाभ्यां गोमात्रे गोशब्दं, बन्धनमात्रे च बन्धनशब्दं, आनयनमात्रे चानयनशब्दं व्युत्पद्यमानस्तत्संसर्गात्मकवाक्यार्थप्रतिपत्तावुपायं चिन्तयन्नन्तरङ्गत्वादन्यत्रानुपक्षीणत्वाच्च पदार्थानामेव तदुपायत्वं बुध्यमानः प्रमाणान्तरप्रतिपन्नानामाकाङ्क्षादिमतामप्यश्वमहिषादिपदार्थानां[5] बन्धनाद्यन्वयलक्षणवाक्या-

---

१. ल्प्यत इति. घ. २. क्षणाः. घ. ३. कवाक्यश्रवणात्. घ. ४. पोद्वाराभ्यां. ग. ५. नयतिव्युत्पद्यमान. ग. ङ.

र्थानुप्रवेशाभावाच्छाब्दस्य शाब्देनैवान्वय इति निश्चिनोति । ततश्च यत्र
[1]
क्वचिदध्याहारादिष्वपरिपूर्णत्वाद्वाक्यार्थप्रतिपत्तेस्साकाङ्क्षत्वं तत्रापि शब्द-
[2]
मेव कल्पयति नार्थमात्रम्; कल्पनरूपापरित्यागात् । न चाद्यव्युत्पत्ता-
वेवाध्याहृतेन पदार्थमात्रेणाप्यन्वितो वाक्यार्थः प्रतीयत इति शक्यं वक्तुं,
[3] [4]
येनायं नियमो भज्येत । यथा हि त्वन्मते तावदाद्यव्युत्पत्तावेव निधिमानेष
भूभाग इत्यादिषु कार्यपदाभावेऽपि प्रवृत्तिहेतुत्वेन कार्यबोधमनुमाय तदु-
पायं चिन्तयन् सन्निहितत्वविशेषमात्रेण शब्दस्यैव तदुपायत्वमवधारयति,
ततश्च द्वितीयादिषु व्युत्पत्तिषु क्रमेण कार्यपदाभावं जानानोऽपि न पूर्वावगतं
[6]
कार्यपरत्वं परित्यजति किन्त्वध्याहारादिभिरपि तदेव निर्वहति, तथैव
[7] [8]
प्रथमं परिपूर्णपदवाक्यश्रवणोऽपि व्युत्पित्सुः प्रवृत्त्यादिभिर्वाक्यार्थधिय-
मनुमाय प्रमाणान्तरप्रतिपन्नेषु बहुष्वप्यन्येषु पदार्थेषु कथं द्वित्रा एवैते
पदार्थाः परस्परसंसर्गात्मकवाक्यार्थभावमनुभवन्तीति चिन्तयन् दृष्ट्वा-
च्छब्दप्रतिपन्नत्वमेव विशेष इत्यवदधाति, ततश्च द्वितीयादिषु व्युत्पत्तिषु
वाक्यार्थमपरिपूर्णं जानानोऽपि न पूर्वावगतं शब्दप्रतिपन्नस्यैव पदार्थस्य
[9]
वाक्यार्थत्वमवजानीते, किन्तु शब्दं कल्पयित्वापि तन्निर्वहत्येव । यदि
चैवमुत्तरत्राध्याहारादिषु क्वचिद्दर्शनमात्रेणैव शब्दप्रतिपन्नत्वं विहायार्थमात्र-
स्यैव वाक्यार्थानुप्रवेशित्वं क्रियते तर्हि प्रथमं कार्यान्विते शक्तिग्रहणेऽपि

---

१. दिषु परि. ग. २. स्यापेक्षत्वं. ग. ङ. ३. तथा हि. घ. ङ
४. ष भाग. ङ, ५. तविशेष. ख. ग. ङ. ६. तमेव. ग. ७. वणेऽपि. क. ग. घ.
८. र्थविषयमनुमाय. ग. ९. त्रापि अध्या. ग.

काष्ठैः[1] स्थाल्यामोदनमित्यादिषु[2] कार्यादर्शनात् कार्यान्वितत्वं विहायेतरान्वितमात्रे[3] शक्तिः कल्पनीया स्यात्।

यद्युच्येत यथा शालिबीजे सत्येव शाल्यङ्कुरदर्शनान्न बीजमात्रे शक्तिः किं तु शालिबीजे। तथा कार्यान्वित एव शाब्दधीदर्शनात् कार्यान्वित एव शब्दस्य शक्तिर्नेतरान्वित इति, तर्हि शब्दप्रतिपन्नस्यैव वाक्यार्थानुप्रवेशदर्शनाच्छब्दप्रतिपन्न[4] एव वाक्यार्थानुप्रवेशीति सर्वं समानम्। करिष्यते चायन्निबन्धो वाक्यार्थविचारावसरे[5] सम्यगिति नेह प्रपञ्च्यते। अतः शाब्दस्य शाब्देनैवान्वय इति सिद्धम्। अत एव विकृतिषु सौर्यादिषु कर्मस्वसन्निहिताग्न्यादित्वात् तत्पदनिवृत्तेर्न्यूनसाकाङ्क्षमन्त्रपूरणाय[6] पदस्यैवोहः क्रियते नार्थमात्रस्य। तथाध्याहारेऽपि 'इषेत्वे'त्यत्र 'छिनद्मी'ति पदमध्याहियते नार्थमात्रम्।

यत्पुनः कैश्चिदुक्तं मन्त्रस्याभिधानिकं[7] प्रकाशनं कार्यं प्रकृतावगतं तस्य शब्दकल्पनयैवोपपत्तेस्तत्कल्पनमिति। तन्न; 'निर्वपामि'पदेन 'पेत्वे'ति पदाभ्याञ्च सूर्यार्थेन[8] छिनत्त्वर्थेन[9] च विशिष्टस्य स्वार्थस्य पृथगुभयत्राभिधानादाभिधानिकप्रकाशनस्यापि सिद्धेः। न च मन्त्रस्य स्वपदप्रकाशितार्थाभिधानं कार्यमिति तदर्थं पदस्योह इति वाच्यम्; ऊहप्रवरनामधेयानाममन्त्रत्वं इत्यूह्यपदस्यामन्त्रत्वस्थितेः। अतः शाब्दस्य शाब्देनैवान्वय इति नियममन्तरेण पदोहस्यैवानुपपत्तेस्स एव तत्र प्रमाणम्। तथाच प्रथाणग्राहिणीत्वेन सिद्धः श्रुतार्थापत्तेर्भेद[10] इति सर्वमनाविलम्॥

इत्यर्थापत्तिपरीक्षावादः समाप्तः।

---

१. कार्येषु स्थाल्यामोदन. ङ. २. नं पचतीत्यादिषु कार्यदर्शनात्. च. ३. तत्त्वमात्रे. ग. ४. वेशिनि स. क. ग. वेशिनी स. ङ. ५. र्थावसरे. ग. ६. वृत्तौ. घ. ७. कं कार्यं. ग. ८. न च विशिष्टस्य. घ. ९. र्थे विशिष्टस्य. ङ. १०. तया च. क. ग. घ.

॥ अथाभावः ॥

[अभावपरीक्षावादः]

अभावस्तु, दृश्यानुपलम्भजं सन्निकृष्टाभावज्ञानमभावो नाम[1]। नन्वभावो नाम तत्त्वान्तरं नास्ति यदवगमाय षष्ठप्रमाणमाद्रियते[3]। तन्न। इह भूतले घटो नास्ति अघटं भूतलमित्यादिविशिष्टभूतलव्यवहारस्य विशिष्टभूतलवेदनमूलत्वात् तद्विवेचनत्वेन तत्त्वान्तरमास्थेयमिति। न च वाच्यं भूतलवेदनादेव व्यवहार इति ; घटवत्यपि प्रसङ्गात्।

यत्तु तन्मात्रवेदनमभावव्यवहारसाधनमिति, तन्मन्दम्; मात्रशब्दार्थस्य भूतलातिरेके तत्त्वान्तरत्वापत्तेः। अनतिरेके च घटसंसृष्टेऽपि प्रसङ्गात्। एतेन केवलशब्दार्थोऽप्यपास्तः। नन्वेकाकिभूतलज्ञानं नास्तीति व्यवहारसाधनम्। तन्न। किमिदमेकाकित्वं किमेकसंख्यायोगित्वं उत "एकादाकिनिच्चासहाय" इति द्वितीयासहायत्वम्? पूर्वत्र घटवत्यपि प्रसङ्गः। उत्तरत्र द्वितीयासहायत्वम् इति तत्त्वान्तरत्वापत्तिः। न च वाच्यं घटविशिष्टाद्विविक्तभूतलबुद्धिः कारणमिति। विवेको हि भेदः। सच[5] स्वरूपमितरेतराभावो वा धर्मान्तरं वा? स्वरूपश्चेत्तस्य भूतलमात्रव्यवहारहेतुत्वेन नाभावविशिष्टभूतलव्यवहारहेतुत्वम्। न हि विशिष्टो व्यवहारस्तद्विषयश्चाविशिष्ट इति न्याय्यम्; विषयवैशिष्ट्यहेतुत्वात् व्यवहारवैशिष्ट्यस्य। किञ्च स्वरूपभेदपक्षे तत्कालोत्पन्नघटसंसृष्टे कस्मिंश्चिद्भूतले तदितरभूतलस्य स्वरूपमेव ततो भेद इति स्वरूपस्य च यावद्भूतलविनाशमवस्थानात् कदा-

---

१. जं असन्निकृष्ट. क. जन्यासन्नि. घ. २. षष्ठं प्रमाणं. क. घ. ३. माणं आश्रीयते. घ. ४. त्वमिति तत्त्वान्तरत्वापत्तिः। न च. ग. ५. न्तरापत्तिः. ङ. ६. च रूप. ङ. ७. यविशिष्ट इति न्याय्यम्; ङ.

विज्ञातघटसंसर्गमपि तद्भटाभावव्यवहारं प्रसुवीत, स्वरूपस्यानपायात्। अथ तदानीं न तद्भिन्नं भूतलं, घटसंसृष्टत्वात् तर्हि न स्वरूपं भेदः, तस्य तदानीमप्यनपायात्। इतरेतराभावभेदस्त्वभावस्वीकारभयादेव नाभ्युपगतः। धर्मान्तरभेदपक्षेऽपि तस्य भावस्वरूपत्वादर्शनादभाव एवेति घटसंसृष्टभूतलाद्विविक्तमिति रिक्तं वचः। एतेन तद्भिन्नतदितरतदन्यपक्षा निरस्ताः।

यत्तु संसृष्टभूतलाद्विभक्तं[२] भूतलं कारणमिति, तत्र विभागस्य संयोगपूर्वत्वान्मेरुसंयोगस्य[३] काश्यामभावात्तत्र तदभावो निर्विषयः स्यात्। किञ्च रसे रूपं नास्तीति व्यवहारो भ्रान्तः प्रसज्येत। न हि रसे रूपविभागोऽस्ति[४], गुणस्य गुणासमवायात्।

एतेन प्रतियोगिसंसृष्टात् परं पृथग्भावव्यवहारालम्बनमित्यपास्तम्; परत्वपृथक्त्वयोरपि गुणत्वात्। न च दृश्ये प्रतियोगिनि भूतलोपलम्भनं कारणम्; दृश्यमाने प्रतियोगिनि दृश्यत्वानपायात्। न च स्मर्यमाण इति विशेषणीयम्; दृश्यमानस्य तत्समीपनिषेधाभावप्रसङ्गात्। न च प्रतियोगिनि जिघृक्षित इति वाच्यम्; देशान्तरागते प्रिये पुत्रादौ जिघृक्षानुपरमात्तदभावः प्रसजतीति। न च देशान्तरस्थे प्रतियोगिनि देशान्तरज्ञानमभावव्यवहारकारणम्; शाबलेयस्थिते गोत्वे बाहुलेयोपलम्भस्य गोत्वाभावव्यवहारकारणत्वप्रसङ्गात्। ननु भूतलज्ञानमेवाभावव्यवहारसाधनम्। न च घटवति प्रसङ्गः, घटेन व्यवहारशक्तिप्रतिबन्धात्।

---

१. पस्य दर्शनात्. क. घ. २. द्विविक्तभूतलं. ग. ३. र्वकत्वात्. घ. ४. स्ति, गुणे गुणासमवायात्. घ. ५. थग्भावव्यव. ग. ६. म्बमित्यपास्तं. क. घ. ङ. ७. भ्यस्य. क. म्भनस्य. ग. घ.

तन्न । सर्वस्य हि ज्ञानस्य स्वविषयव्यवहारशक्तिरेका । सा यदि भूतल-ज्ञानस्य घटसंसृष्टे घटेन प्रतिबद्धा तर्हि भूतलव्यवहारमपि तत्र न प्रसुवीत; स्वविषयव्यवहारशक्तेरेकत्वात् तस्याश्च प्रतिबद्धत्वात् । न च वाच्यं सर्वमेव ज्ञानं स्वविषयव्यवहारे प्रतियोग्यभावव्यवहारे च शक्तं, तत्र प्रतियोगिसंसृष्टे प्रतियोग्यभावव्यवहारशक्तिर्नश्यति, इतरां तु स्वकार्यं करोतीति; सर्वज्ञानस्यैं विशिष्टविषयत्वेन विशिष्टव्यवहारकत्वनियमात् । भूतलज्ञानस्य चाविशिष्टभूतलविषयत्वादभावाविशिष्टभूतलव्यवहारशक्तिः प्रमाणबाधितेति ।

किञ्चायं प्रतिबन्धः शक्तेः कार्यान्मुख्यविघातः स्वरूपध्वंसो वा । सर्वथा नाभावादन्यस्सुनिरूप इति प्राप्तं तत्वान्तरम् ।

यत्तु यत्राभावधीस्तत्र संसृष्टधीस्वरूपधीर्नास्ति स्वरूपधीस्त्वस्तीति द्वयी स्वरूपधीरास्थेया। तत्र संसृष्टस्वरूपधीतोऽन्या स्वरूपधीस्तन्मात्रधीः तद्धीवेद्यं च तन्मात्रमिति न मेयान्तरमिति । तदयुक्तम् ; यतः—

उपलक्षणभावे वां प्रसङ्गो घटवत्यपि ।
मृतसञ्जीवनी वा स्याद् धीविशेषे विशेषणे ॥

अत्रेदं परैः प्रष्टव्यः—किमभावव्यवहारविषयस्य भूतलस्य संसृष्टधी-स्वरूपधीतो विलक्षणस्वरूपधीवेद्यत्वमुपलक्षणं विशेषणं वा ? उपलक्षणत्वे स्वरूपधीवेद्यस्य पुनः प्रतियोगिसंसर्गेऽप्यभावव्यवहारहेतुत्वं भवेत् । विशे-

---

१. तले ज्ञानस्य. ग. ङ. २. बन्धत्वात्. ग. ङ. ३. तरथा तु. ग. ४. स्य चाविशिष्ट. घ. ५. तले शक्तिः. ग. ६. पप्रध्वंसो वा. ग. ७ ष्टस्वरूप-धीर्नास्ति. ग. ङ. ष्टधीः स्वरूपाधीः नास्ति. घ. ८. त्र स्वरूपधीतोऽन्या. क. ९. वेद्यन्त्वतन्मात्रमिति. ग. ङ. १०. वे चाप्रसङ्गो. ङ. ११. रं प्रष्टव्यम्. ङ. १२. ष्टस्वरूपधीतो. ग. घ. १३. धीत्वमुपलक्षणं. ग.

षणत्वे तु भूतलस्य विलक्षणधीवेद्यत्वं तद्विनाशे नश्यतीति भावाभावयोरेकनिषेधस्येतरविधिरूपत्वादनन्तरक्षणे प्रतियोगिसद्भावप्रसङ्ग इति मृतसञ्जीवनीचोद्यं दुर्वारम्। किञ्च विलक्षणधीवेद्यत्वस्य भूतलविशेषणत्वे तदप्यवगन्तव्यं विशिष्टव्यवहाराय, न च तदवगमोपायं पश्यामः।

यत्तु विलक्षणस्वरूपधीः स्वप्रकाशा, अतस्सा भूतलस्वरूपञ्च वेद्यं, स्वप्रकाशत्वाच्च न मानान्तरापेक्षेति विषयवैशिष्ट्यात् विशिष्टविषयव्यवहारसिद्धिरिति। तन्न। सर्वं हि वेदनं वेदनतयैव स्वप्रकाशं न वेद्यतया। अतः कयं वेद्यकोटिनिविष्टभूतलस्वरूपविशेषणीभूतनञर्थत्वं तस्य? किञ्च संसृष्टस्वरूपबुद्धावपि स्वरूपबुद्धित्वमस्त्येव, विशेषणेन स्वरूपस्यातिरस्कारात्। इति विशिष्टस्वरूपासिद्धावपि स्वरूपबुद्धित्वं स्वप्रकाशत्वञ्चास्तीति घटवेत्यपि प्रसङ्गः।

यत्पुनर्जिज्ञासापेक्षं भावस्वरूपवेदनं नास्तीति व्यवहारहेतुरिति। तन्न; तादृशस्वरूपवेदनस्यैव सूक्ष्मकण्टकाद्यभावव्यवहारहेतुत्वव्यभिचारात् स्वरूपवेदनस्य विषयातिरेके तत्त्वान्तरत्वापत्तेः। अनतिरेके विशिष्टव्यवहारं प्रत्यकारणत्वाच्च निराकर्तव्यम्।

नन्वभावज्ञानसाधनं यादृशभूतलज्ञानं तदेवाभावव्यवहारसाधनमस्तु, किमभावज्ञानेन। तन्न, अस्मन्मते तु भूतलज्ञानस्यैवाभावज्ञानकारणत्वात्। न च घटवति प्रसङ्गः; तत्सहकारिणो योग्यानुपलम्भस्याभावात्।

---

१. ष्टव्यवहारासिद्धिरिति. क. घ. ङ. २. न न वेद्यतया. क. ३. टिविशिष्टभूतल. ङ. ४. ति सारात्. ग. ५. वति प्रसङ्गः. घ. ६. न्तरापत्तेः. क. ७. वसाधनज्ञानं. घ. ८. ज्ञाने कारणत्वात्. ग.

यत्पुनरनुपलम्भस्य ज्ञाततया हेतुत्वेऽनवस्थानात् सत्तया हेतुत्वं वाच्यम्। तथा च प्रातश्चत्वरे मैत्रमनुपलभ्य मध्याह्ने चोपलभ्य सायंसमये प्रातरिह मैत्रो नासीदिति ज्ञानमुदेति तदा प्रातःकालीनोपलम्भावस्य मध्याह्नोपलम्भेन नाशित्वाद्योग्यस्मृत्यनुदयस्य मध्याह्नानुभवजनितसंस्कारजसायंकालीनस्मृतिविनष्टत्वादनुपलम्भो न सत्तयापि कारणमिति, तन्न; मैत्रमात्रस्मृत्युदयेऽपि प्रातःकालविशिष्टमैत्रविषयस्मृत्यनुदयस्य तदानीमपि भावात् तज्जन्यत्वाच्च प्रातरिह मैत्रो नासीदिति ज्ञानस्य। किञ्च तन्मात्रभावबादिनोऽप्येवंविधे स्थले तन्मात्रावगमाय योग्यस्मृत्यनुदयस्यैव हेतुत्वं वाच्यम्। न च तस्य लिङ्गत्वेन हेतुत्वम्; अज्ञातस्य तत्त्वानुपपत्तेः। न च तस्य मानसत्वम्; स्मरणस्यैवामानसत्वात्। न ह्यमानसाभावो मानसो भवति। अतो बलात् सत्तयैव योग्यस्मृत्यनुदयस्य कारणत्वं वाच्यम्। अथ तु वैय्यत्यात्तन्मात्रं प्रातरेवावगतं सायं स्मर्यत इति पक्षः, तर्ह्यभावोऽपि प्रातरवगतस्सायं स्मर्यत इत्यस्तु। अथ प्रातः प्रतियोगिस्मृत्यभावात् कथं प्रतियोगिनिरूपणनिरूप्यस्याभावस्यावगमः? तर्हि तन्मात्रस्यापि तत्स्वभावत्वात् प्रातरनवगम एव। अथ न तन्मात्रस्यायं स्वभावः किन्तु तद्व्यवहारस्येति, तर्ह्यभावस्यापि नायं स्वभावः किन्तु तद्व्यवहारस्येति सर्वमनभिनिविष्टचेतसां समानमेव।

यत्तु प्रातःकालविशिष्टमैत्रानुभवाभावे संस्काराभावात् स्मृतियोग्यत्वं नास्तीति। तन्न; तुल्योपलम्भयोग्यवस्त्वन्तरेषु स्मर्यमाणेषु संस्कारातिरिक्तसुस्मूर्षादिकारणान्तरसाकल्यलक्षणत्वात् स्मृतियोग्यत्वस्य।

---

१. ततः प्रातःकालीन. घ. २. भावात् वादिनोऽपि. घ. ३. गतः. घ. ४. रवगम. ग. ५. रस्यापि. ग. ६. वेन. ग. ङ.

यत्तु स्मृत्यनुदयेन प्रमाणोदय इति, तत्र प्रमाणशब्दस्य[2] यथार्थज्ञानोपलक्षणत्वान्न विरोध इति सिद्धं तत्त्वान्तरमभाव इति ।

न चास्य प्रत्यक्षत्वम्; प्रमाणाभावात् । नन्वनन्यथासिद्धेन्द्रियान्वयव्यतिरेकानुविधानादैन्द्रियकत्वमस्तु । तन्न; विषयतदधीनेतरकारणसाकल्यलक्षणयोग्यत्वायेन्द्रियस्यान्यथासिद्धत्वात् । ननु तर्हि रूपादिज्ञानेऽपि तादृशयोग्यत्वाय चक्षुरुपक्षीणमिति न क्वचिच्चक्षुः कारणं स्यात् । तन्न; तत्र हि रूपाद्युपलब्धिकारणत्वेनैव चक्षुः क्लृप्तमिति यदन्तराकारणानां मिथः प्रत्यासत्तियोग्यत्वापादनं तत्तस्यावान्तरव्यापार इति शक्यावगमम्[3]। इह तु चक्षुरवान्तरव्यापारत्वावगमस्य चक्षुःकारणत्वावगमपूर्वकत्वात् अभावज्ञाने च चक्षुःकारणत्वमेवाक्लृप्तमिति तत्र योग्यत्वापादनस्य चक्षुरवान्तरव्यापारत्वायोगात्तत्रैवोपक्षीणं चक्षुरित्यवगमात् ।

एतेन निर्विकल्पकज्ञानोपक्षीणत्वादिन्द्रियस्य[4] न सविकल्पकानामैन्द्रियकत्वमित्येतन्निरस्तम्[5]; सविकल्पकानामप्यपरोक्षत्वेन कारणानन्तरानुपलम्भे[6] चेन्द्रियकारणत्वे क्लृप्ते तदुपयोगित्वेन निर्विकल्पकस्येन्द्रियव्यापारत्वावगमात् न निर्विकल्पक एवोपक्षीणमिति । तस्मादत्रेन्द्रियकारणत्वावगमपूर्वकं विषयतदधीनेतरकारणं मिथः प्रत्यासत्तिरूपयोग्य-

---

१. दयो प्रमाणोदय. क. २. स्य याथार्थ्यज्ञानोप०. ग. ३. रत्वावगमस्य. क. ४. ल्पज्ञानोप. ग. ल्पकोपक्षीण. घ. ५. ल्पकमैन्द्रियकमित्यपास्तम्. घ. ६. यत्वमित्येतन्निरस्तम्. ङ. ७. नामित्यपरोक्षत्वेन. ङ. ८. स्मेन च. घ. ९. कस्यैन्द्रियस्य व्यापारत्वावगमान्निर्विकल्पकमेवोपक्षीणमिति. ग.

त्वस्येन्द्रियावान्तरव्यापारत्वज्ञानं, ततश्च तत्रानुपक्षीणत्वादननन्यथासिद्धेन्द्रियान्वयव्यतिरेकानुविधानादैन्द्रियकत्वमिति चक्रकं दुर्वारम् ।

नन्वन्यत एवाभावज्ञानस्यैन्द्रियकत्वमवगंस्यते— यदज्ञायमानकारणं तदैन्द्रियकं यथा रूपज्ञानं तथा चाभावज्ञानमिति । तन्न; स्मृतावनैकान्तिकत्वात् ।

यत्तु स्मृतिरपि मानसी संस्कारस्तु तत्प्रत्यासत्तावुपयुज्यत इति, तत् लिङ्गादेरपि मनःप्रत्यासत्त्युपयोगित्वेन सर्वज्ञानस्य मानसत्वप्रसङ्गात् निराकरणीयम् । न च स्मृतिव्यतिरिक्तत्वे सतीति विशेषणीयम् ; सकलसपक्षानुगतस्य भावविषयत्वे सतीति विशेषणस्यापि दुर्वारत्वात् ।

यत्त्वपरोक्षप्रतीतित्वात्तदैन्द्रियकत्वम् । आपरोक्ष्यञ्च कार्यैकजात्ये कारणवैजात्यानुपपत्तेः ज्ञातानुपलम्भजस्य लैङ्गिकाभावज्ञानस्य परोक्षत्वादज्ञातानुपलम्भजस्यापरोक्ष्येण भवितव्यमिति, तन्न ; अपरोक्षत्वेऽप्यवान्तरभेदेन कारणभेदोपपत्तेः । अन्यथा चाक्षुषस्यापरोक्षत्वात् तदितरकारणस्य स्पार्शनस्य परोक्षत्वप्रसङ्गात् । अज्ञातकरणत्वाच्चापरोक्ष्यमैन्द्रियकत्ववन्निराकरणीयम् ।

यत्तु भावरूपकारणसहकृतस्यैव मनसः प्रवृत्तिरिति नियमादभावसहकृतस्य न प्रवृत्तिरिति, तदयुक्तम्; एवं सत्यनुमेयाभावेष्वभावज्ञानस्येन्द्रियेतरकारणत्वव्याप्तेरिह भूतले घटो नास्तीत्यत्राकारणत्वप्रस-

---

१. स्येन्द्रियान्तरव्यापारत्वं ज्ञातं ततश्च. ग. स्येन्द्रियान्वयव्यतिरेकानुविधानात् . घ. २. त्राल्पक्षीण. ग. ३. कं दुर्निवारम् . ग. ४. न्वत एव. ग. ५. त् न च. ग. ६. रोक्ष्यत्वात्तदितर. ङ. ७. स्य स्पर्शनस्य. क. ग. ङ. ८. पकरण. क. ग. घ.

ङ्गेनार्थापत्तिविरुद्धत्वात्। ननु व्याप्तेर्विशेषाभावाद् इन्द्रियकारणत्वमर्थापत्तिविरुद्धमनुपलम्भकारणत्वञ्च विरुद्धमस्तु। तन्न; लाघवतो विशेषस्य वक्ष्यमाणत्वात्।

यानि चक्षुरभावग्राहकं इन्द्रियत्वात् मनोवत्, अभावः स्वप्रतियोगिसर्वप्रमाणात्यन्तसजातीयग्राह्यः अभावत्वादनुमेयाभाववत्, सत्ता सामान्यसमवायातिरिक्ता, अस्मत्प्रत्यक्षात् परावृत्ता, जातित्वाद् गोत्वादिवदिति साधनानि, तानि बाह्येन्द्रियस्य संयोगादित्रिविधसन्निकर्षवत एव तज्ज्ञानहेतुत्वव्याप्तेरभावे च तदभावाद्विशेषविरुद्धानि। अन्यथा चक्षुर्धर्माधर्मग्राहकम् इन्द्रियत्वाद् मनोवदित्यपि स्यात्।

किञ्च अभावः प्रत्यक्षो न भवति अभावत्वादनुमेयाभाववत्। सत्ता अस्मदादिप्रत्यक्षात् परावृत्ता जातित्वाद् गोत्ववदित्यादिना प्रथमस्य हेतोस्सप्रतिसाधनत्वं द्वितीयतृतीययोर्विरुद्धाव्यभिचारित्वञ्च द्रष्टव्यम्।

यत् पुनर्यद्भ्रमो यद्दोषमनुविधत्ते तत्तज्ज्ञानकारणं, अभावभ्रमश्चेन्द्रियदोषमनुविधत्ते तत्तस्यैन्द्रियकत्वमिति, तन्न; अभावज्ञानं प्रति योग्यत्वस्य ज्ञाततया हेतुत्वात् योग्यत्वभ्रमादेवाभावभ्रमः, नेन्द्रियदोषात् लिङ्गभ्रमादिव लैङ्गिकभ्रम इतीन्द्रियदोषानुविधायित्वस्यासिद्धत्वात्।

नन्वघटं भूतलमित्यत्रानुपलम्भस्य विशेषणीभूताभावमात्रावगम एव व्यापारावगमाद्विशिष्टावगमाय सप्तमप्रमाणानभ्युपगमात् सुरभिचन्दनादिष्विव विशेषणावगमसहायं चक्षुरेव विशिष्टावगमशक्तमित्याश्रयणीयम्।

---

१. तज्जननव्याप्तेरभावे. ग. २. क्षुरभावग्राहकमिन्द्रियत्वात्. क. ३. सत्प्रत्यक्षापरावृत्ता. घ. ४. क्षत्वात् परावृत्ता. ग. ५. त्वं द्रष्टव्यम्. ग. ६. गमाय सहायं. ग.

ततश्च तदेवाभावविशिष्टेऽपि शक्तमस्तु किमन्तरा षष्ठप्रमाणेन? न च विशिष्टावगमस्य विशेषणावगमहेतुत्वात् तदर्थं प्रमाणान्तरं, यस्य विशेषणस्य प्रतियोगिव्यङ्ग्यस्वभावत्वं नास्ति तस्यैव दण्डादेर्विशिष्टज्ञानालम्बनत्वाय पृथक् ज्ञानापेक्षा। अभावस्य तु प्रतियोगिव्यङ्ग्यस्वभावस्याज्ञातस्यैव विशिष्टज्ञानालम्बनत्वमिति भेदात्। तस्मादिह भूतले घटो नास्तीत्यत्राभावज्ञानं केवलेन्द्रियाधीनं सप्तमप्रमाणाधीनं वेति विकल्पः प्राप्त इति। तदिदमनुपपन्नम्; एवं सति विशेष्यमात्रोपक्षीणस्य चक्षुरादेर्विशिष्टेऽपि[२] शक्तिकल्पनाभयादभावस्य स्वप्रतियोगिव्यङ्ग्यस्वभावस्य विशिष्टज्ञानालम्बनत्वं विनैव विशिष्टव्यवहारहेतुत्वमिति विशिष्टज्ञानस्याप्यपलापप्रसङ्गात्। अथ विशिष्टव्यवहारस्य विशिष्टज्ञानहेतुत्वात् तस्मिन्नसति स न भवति तर्हि विशिष्टज्ञानस्य विशेषणज्ञानहेतुत्वात्[३] तस्मिन्नसति तदपि न भवत्येवेति। तदेवमुक्तेन क्रमेण संग्रहश्लोकद्वयं निरस्तं वेदितव्यम्।

यदुक्तमुदयनेन—

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात्[४]।
अज्ञातैकरणत्वाच्च भावावेशाच्च चेतसः॥
प्रतियोगिनि सामर्थ्याद्व्यापाराव्यवधानतः।
अक्षाश्रयत्वादोषाणामिन्द्रियादिविकल्पनात्[५]॥

इति।

यत्पुनर्भावानुपलम्भस्याभावोपलम्भहेतुत्वे[६] अभावानुपलम्भस्यापि भावोपलम्भहेतुत्वमिन्द्रियादेरहेतुत्वमिति, तन्न; अनुपलम्भमात्रादन्धादे-

---

१. त्वाय. ग. २. ष्टे शक्ति०. ग. ३. नमूलत्वात्. क. घ. ङ. ४. स्यापरिक्षयात्. घ. ५. तकारण. ग. घ. ङ. ६. तु॥ यत्पुन०. घ. ७. नरभावानुपलम्भस्या०. क. ग.

रुभयत्रापि ज्ञानाभावात्। भावाभावयोरेकस्योपलम्भहेतुत्वेनेन्द्रियादिकं परिकल्प्य तस्मिन् सत्यनुपलम्भादितरस्योपलम्भ इत्येकत्रेन्द्रियकारणत्वस्यावश्यकत्वे भावस्य रूपाद्यात्मना स्वतो भिन्नस्य भावरूपाच्चक्षुराद्यात्मना स्वतो भिन्नादवगम इत्यौचित्यात् कल्प्यम्। अभावस्य तु प्रतियोगिभेदाद्भावरूपादनुपलम्भादवगम इति।

यत्तु चक्षुरादेरभावोपलम्भेऽपि कारणत्वं नाङ्गीकृतं, तत् प्रमाणविरोधात्। तथाहि—इन्द्रियाणां प्राप्यकारित्वात् प्राप्तेश्च भावरूपत्वात् भावस्य चाभावे समवायानभ्युपगमात् विशेषणविशेष्यभावस्य च सम्बन्धान्तरपूर्वकत्वनियमादैन्द्रियकत्वं प्रमाणविरुद्धमेव।

न च वाच्यं भवत्वेवं संयुक्ततदात्मकत्वेनाभावस्य सन्निकर्षोपपत्तेरैन्द्रियकत्वमस्तीति; अनुपलम्भस्येन्द्रियव्यापाराभावेऽप्यभावज्ञानं प्रति स्वरूपेण कारणत्वस्यावश्याश्रयणीयत्वात्। यथोक्तम्—

स्वरूपमात्रं दृष्ट्वा च पश्चात् किञ्चित् स्मरन्नपि।
तत्रान्यनास्तितां पृष्टस्तदैव प्रतिपद्यते॥

इति।

न चैतदनुपलम्भलिङ्गकमनुमानम्; अनुपलम्भस्यानुपलम्भान्तरलिङ्गत्वेनानवस्थापातात्, अज्ञातस्य चालिङ्गत्वात्। न च मानसत्वम्; उपलम्भस्यैवामानसत्वात्। न हि तस्मिन्नमानसे तदभावस्य

---

१. त्वे इन्द्रियादिकं. ग. घ. २. मस्तिवति. घ. ङ. ३. यस्य व्या०. घ. ४. यत्वम्।. घ. ५. न्यन्नास्तिकां पृष्टः. ग. ६. ते॥ नचैत०. घ. ७. त्वेऽनवस्थानात्. ग. ङ. ८. तस्यालिङ्गत्वात्. ग. ९. म्मस्यामानसत्वात्. ग.

मानसत्वं युक्तम्। उपलम्भस्यामानसत्वञ्च प्रत्यक्षपरीक्षायामेव समर्थितम्। अतोऽत्रावश्याश्रयणीयत्वादनुपलम्भहेतुत्वस्यान्यत्रापि तस्यैव हेतुत्वं कल्प्यम्।

किञ्च—

अनिर्विकल्पपूर्वत्वात् संयोगादेरसम्भवात्।
इन्द्रियस्यान्यथासिद्धेस्संबन्धान्तरकल्पनात्॥
प्रत्यक्षत्वमभावस्य विरुद्धं गौरवाय च।
इत्यनेवंविधस्यैव तत्र प्रामाण्यकल्पनम्॥

अभावस्य हि प्रतियोगिव्यङ्ग्यत्वेन निर्विकल्पकानर्हत्वात् संयोगादिसन्निकर्षानाधारत्वादिन्द्रियस्य च योग्यत्वापादन एवोपक्षीणत्वाद्विशेषणविशेष्यभावलक्षणसम्बन्धान्तरस्य च कल्प्यत्वादिन्द्रियस्याभावज्ञानहेतुत्वं प्रमाणविरुद्धमिति गौरवाय चेत्यनुपलम्भस्यैवान्यत्रानुपक्षीणस्य प्रमाणविरुद्धकल्पनान्तरविधुरस्याभावज्ञानहेतुत्वं कल्प्यम्। नन्वनुपलम्भस्य लिङ्गत्वेनैव गमकत्वान्न मानान्तरत्वम्। तन्न; अनुपलम्भस्य लिङ्गत्वेनैव गमकत्वेऽज्ञातस्य लिङ्गत्वानुपपत्तेरनुपलम्भस्य चाभावरूपत्वेनानुपलम्भान्तरवेद्यत्वेनानवस्थाप्रसङ्गात्। तत्सिद्धमनुपलम्भष्टं प्रमाणान्तरमिति॥

अकृतेदश्चिदानन्दः प्रमाणानां परीक्षणम्।
खण्डनं परतर्काणामाचार्यमतमण्डनम्॥

इत्यभावपरीक्षावादः सप्तविंशवादः
समाप्तः।

---

१. स्संयोगान्तर. ग. २. माणान्तरविरुद्धकल्पनान्तर. घ. ३. द्धत्वं कल्पनान्तर. ग. ४. त् सिद्धमनुपलम्भाष्टं. ५. णम्। बन्धनं परतर्काणामाचार्यमतबन्धनम्. ग. णम्। खण्डनं परतर्काणामाचार्यमतखण्डनम्. घ. णम्। बन्धनं पर. ङ.

[स्फोटवादः ॥]

अथ युक्त्या निराकर्तुं विमतानारभामहे[1] ।
पदस्वरूपसम्बन्धतन्नित्यत्वे च वादिनः ॥

तत्र प्रथमं पदस्वरूपं निरूपयामः । केचिदाहुः—उत्तीर्णवर्णमन्यदेव किञ्चिदेकं[2] तत्त्वं[3] पदमिति । तदयुक्तम् । तथाहि—तत् खल्वेकं पदतत्त्वं अनवयवं सावयवं वा स्यात् । न तावत् सावयवम्[4]; तदावेदकप्रमाणाभावात् । न च वर्णा एवावयवाः, तेषां विभुत्वेनावयविन्यूनपरिमाणत्वलक्षणावयवत्वविरोधात् । न चानवयवम्; वर्णव्यतिरिक्तस्य कस्यचिदनुपलम्भात् । नन्वनेकेषु वर्णेष्वेकं पदमिति एकस्य वस्तुनोऽनुभवाद्वर्णानाञ्च नानात्वेन तत्त्वानुपपत्तेस्तदतिरिक्तेन पदेन भवितव्यम् । मैवम्; अनेकेषामपि वर्णानामेकार्थप्रतिपत्तिहेतुत्वेनैकबुद्धिविषयत्वोपपत्तेः[5] । नन्वेवमिदं पदमस्यार्थस्य वाचकमिति पदत्वज्ञानाधीनमेकार्थप्रतिपत्तिहेतुत्वज्ञानं तदधीने च पदज्ञाने परस्पराश्रयत्वमापद्येतैव । मैवम्; अनवगतपदभावानामपि वर्णानामन्वयव्यतिरेकाभ्यामेकार्थप्रतिपत्तिहेतुभावस्य स्वध्यवसानत्वात् ।

स्यादेतत्—वर्णेभ्योऽर्थप्रतीतिरेव न सम्भवति[6]; तेषां प्रत्येकमहेतुत्वात् सहभावस्य चाभावात् । न हि क्रमवदुच्चारणाधीनज्ञानानां ज्ञाय-

---

१. हे । वेदस्वरूप. ग. २. ञ्चित्तत्वं. ग. ३. त्त्वं निरवयवं. ग. ४. म्; वेदकप्रमाणाभावात्. क. ५. न्त्वेकमिदं. ग. ६. वतीति. ग. क.

मानत्वेन सहभावस्सम्भवी[1]। न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसचिवो-ऽन्त्यो वर्णानुभवोऽर्थधीहेतुः; अन्यविषयेभ्यस्संस्कारेभ्योऽन्यत्र प्रत्ययोत्पत्तेरनुपपत्तेः। नचैकस्मृतिसमारूढा वर्णा एवाभिधेयधीहेतव इति साम्प्रतम्; अक्रमव्युत्क्रमभिन्नवक्तृभ्योऽप्येकस्मृतिसमारोहिभ्यस्तेभ्योऽभिधेयधीप्रसङ्गात्। तदयुक्तम्; अन्यूनाधिकक्रमवदेकवक्तृभिव्यक्तवर्णानुभवसंस्कारजनितस्मरणविपरिवर्तिभ्यो वर्णेभ्य एवाभिधेयप्रत्ययस्योत्पत्तेः। न च वर्णानामभिधेयप्रत्ययायैवंविधत्वकल्पनं गौरवायेति साम्प्रतम्; एवंविधत्वस्य स्फोटाभिव्यक्तिपक्षेऽप्यवश्याङ्गीकरणीयत्वात्[3]। न हि स्फोटाभिव्यक्तिरप्यनेवंविधेभ्यो वर्णेभ्यस्सम्भवतीति[4] प्रागुक्तदोषस्य स्फोटाभिव्यक्तिपक्षेऽपि प्रसङ्गात्। अतो यावद्द्रव्यः[5] स्फोटाभिव्यक्तिस्तावद्द्रव्यस्तावद्द्रव्योऽभिधेयप्रत्ययो नानुपपन्नः।

यत् पुनः स्फोटस्य प्रत्यक्षत्वात्[6] तस्य प्रत्येकवर्णावभास्यत्वेऽपि स्फुट-स्फुटतमाद्यवभासितया न द्वितीयादीनामानर्थक्यम्। अभिधेयावभासस्यत्व-प्रत्यक्षत्वात्[9] तत्र च स्फुटादिविभागाभावाद्द्वितीयादीनामानर्थक्यमिति[10], तदयुक्तम्; स्फोटस्य प्रत्यक्षत्वेऽपि तस्याविभागत्वेन[11] किञ्चित् स्फुटं किञ्चिद् अस्फुटमिति विभागाभावेन द्वितीयादिवैय्यर्थ्यस्य तादवस्थ्यात्। भवतु वा स्फोटस्य सभागत्वं तथापि यथैकस्या एव प्रत्यक्षसामग्र्या भूयोभूयोऽभ्यासादवभासवैशद्यम्[12], एवमेकस्यैव वर्णस्य भूयोभूयोऽभ्यासादवभास-

---

१. वसम्भवः. ग. २. वोऽस्त्येव वर्णानुभवोऽर्थधीहेतुः. ग. ३. श्याश्रयणीयत्वात्. घ. ४. वति, प्रागुक्तदोषस्य. ग. ङ. ५. यावद्द्रयो. ग. ६. स्तावद्द्रव्यस्तावद्द्रव्यो. ग. ७. त् न तस्य. ग. ८. भासिन द्वितीयादीनामानर्थक्यम्. ग. ङ. ९. दिभानाभावात्. ग. १०. क्यमेवेति. क. ११. भागित्वेन. ग. १२. मू, एकस्यैव. घ.

वैशद्यं न वर्णान्तरेभ्य इति स्यात्। एतेनाभिधेयप्रत्ययोत्पत्त्यनुपपत्तिरेव वर्णोत्तीर्णपदतत्त्वे[1] प्रमाणमित्यपास्तम्; वर्णेभ्य एव तदुपपत्तेः[2] प्रदर्शितत्वात्। किञ्च पदस्फोटस्याभिधेयप्रत्ययगम्यत्वे स्फोटज्ञानाधीनोऽभिधेयप्रत्ययः तदधीनं च स्फोटज्ञानमिति अन्योन्याश्रयित्वं[3] स्यात्। अतस्सिद्धमेकाभिधेयधीहेतुभूता वर्णा एव पदमिति॥

इति स्फोटवादोऽष्टत्रिंशः

समाप्तः।

[ईश्वरवादः॥]

कः पुनरत्र[4] पदार्थेन सम्बन्धः? प्रत्याय्यप्रत्यायकभाव इति ब्रूमः। न च वचनीयम् अगृहीतसङ्गतेरपि प्रत्यायकत्वप्रसङ्ग इति; यदालोक इव चक्षुषस्सङ्गतिग्रहोऽपि पदस्य ज्ञानजनने सहकारी। न च सङ्केतयितृसव्यपेक्षमेव सम्बन्धज्ञानम्, येन सम्बन्धस्यानित्यता भवेत्। किन्तु वृद्धव्यवहारादेव। न च वृद्धव्यवहारस्यापि मूलभूतसङ्केताभावेन प्रवृत्तिरिति वाच्यम्; पूर्वस्य पूर्वस्योत्तरमुत्तरं प्रति हेतुत्वेन वृद्धव्यवहारप्रवाहानादितयैव तदुपपत्तेः। न च देवदत्तादिशब्दाः सङ्केताधीनाभिधानाधीना इति गवादिशब्दैरपि तथा भवितव्यम्; तेषु सङ्केतयितुरनुपलम्भात्। न चेश्वर एव सङ्केतयिता; तत्सद्भावे प्रमाणाभावात्।

---

१. पदत्वे, क. ग. ङ. २. तेर्दर्शितत्वात्. घ. ३. यश्च स्यात्. घ. ४. नस्तत्र. ग. ५. स्तोदयेत्. ग. ६. ताभिधानाधीना. ग. ङ.

नन्वस्त्येव तत्र प्रमाणम् । तथाहि—क्षित्यादिकं सकर्तृकं कार्यत्वात्, यदुक्तसाधनं तदुक्तसाध्यं यथा घटः तथाचेदं तस्मात्तथेति । यद्वा सर्वं कार्यं सर्वावित्[1]कर्तृकं कार्यत्वात् यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति यथाम्बरम्, न चेदं नोक्तसाधनं अतो नोक्तसाध्यमपीति । न चासिद्धं कार्यत्वम्; अपरमाणुत्वे सति मूर्तत्वान्मध्यमपरिमाणशालित्वाद्वा घटवदिति तत्सिद्धेः । न च कर्मद्वारा चेतनानामेव कर्तृत्वात् सिद्धसाध्यत्वम्, उपादानादीनां साक्षात्कारचिकीर्षाप्रयत्नाधाररूपत्वात् कर्तृत्वस्य, तस्य च पृथिव्यादिगोचरतया चेतनानामसम्भवात् । न चानुमजन्मसु दूर्वाङ्कुरादिषु व्यभिचारः; तेषां पक्षीकरणात् । न च योग्यानुपलम्भविरोधः; परकर्तुः परं प्रति प्रत्यक्षानर्हत्वेन सत्यप्यनुपलम्भमात्रे योग्यानुपलम्भस्यासिद्धेरिति ।

तदिदमनुपपन्नम् । तथा हि—

सोपाधिकत्वादव्याप्तेर्विशेषणविरोधतः ।
प्रतिहेतुविरुद्धत्वात् कार्यत्वं नेष्टसाधनम् ॥

यद्भावाभावौ हि शरीरकर्तृ[2]त्वं तदभावश्चानुमापयतः तत् किमपि विप्रतिपन्नकर्तृकेभ्यो[3] भूधरादिभ्यो व्यावृत्तं प्रसिद्धकर्तृकेषु प्रासादाट्टालादिष्वनुस्यूतं सन्निवेशविशेषादियोगित्वं भवद्भिरप्यङ्गीकरणीयम्; अन्यथा चिरोत्पन्नेषु प्रयोजनाभावादस्मृतशरीरकर्तृकेषु चैत्यादिषु शरीरकर्तृरहितेषु पर्वतादिषु च विशेषाभावाच्चैत्यादेश्शरीरकर्तृत्वानुमानं पर्वता-

---

१. र्वज्ञकर्तृकं. क. र्वेवित्कर्तृपूर्वकं. ङ. २. र्तृकत्वं. ङ. ३. भ्योऽसारादिभ्यो. ग. भ्यो धारादिभ्यो. ङ.

देस्तदभावानुमानं च निर्बीजं प्रसजेत्। अतो येन पर्वतादिभ्यो व्यावृत्तेन विशिष्टव्यवहारहेतुविशिष्टानुमानलिङ्गहेतुत्वेन वादिप्रतिवादिभ्यामवश्यमिष्टेन सन्निवेशविशेषादियोगित्वलक्षणेन विशेषेण चैत्यादेरशरीरिकर्तृकत्वानुमानं तद्विशेषप्रयुक्तव्याप्त्युपजीवि कार्यत्वं न सकर्तृकत्वे प्रयोजकमिति।

यत्तु यथा कलमबीजाङ्कुरस्य कलमबीजं प्रत्येव प्रयोजकत्वं न बीजमात्रं प्रति तथा सन्निवेशविशेषादियोगित्वस्यापि शरीरिरूपकर्तृविशेषं प्रत्येव प्रयोजकत्वं न कर्तृमात्रं प्रतीति, तदयुक्तम्; सन्निवेशविशेषादौ सपक्षव्यापकत्वेन सम्भवति कार्यत्वस्य तत्प्रयुक्तव्याप्त्युपजीवित्वं प्रति निश्चयाभावेऽपि सन्देहस्य दुर्वारत्वात्। न हि साध्यव्यापकविशेषान्तरदर्शनेऽपि नेदमस्य प्रयोजकं किन्त्वन्यदेवेति निर्णयस्य शपथादृते शरणमस्ति। न हि प्रयोजकत्वसन्देहेऽपि गमकत्वम्। न हि धूमस्य वान्यस्य वाग्निं प्रति प्रयोजकत्वमिति सन्दिहानो धूमेन वह्निमनुमातुमलम्। अतः सन्दिग्धप्रयोजकत्वादप्रयोजकत्वाद्वा न कार्यत्वं सकर्तृकत्वसाधनाय प्रभवति।

यत्तु कलमाङ्कुरस्येत्यादि, तत्र कलमाङ्कुरं विहायाङ्कुरान्तरमपि जनयद्बीजान्तरं दृष्टमिति बीजमात्रस्य कलमाङ्कुरव्यभिचारात् न कलमाङ्कुरं बीजमात्रप्रयोजकम् अपि त्वङ्कुरमात्रमेवेति निश्चीयते। प्रकृते तु न तथा व्यभिचार इति यत्किञ्चिदेतत्।

---

१. स्वरूपकर्तृत्वे. ङ. २. जनमिति. ङ. ३. प्रति, तदयुक्तम्. ङ.
४. ङ्कुरत्वं बीज. ग. ङ. ५. अप्रयोजकमेवेति निश्चीयते. ङ.

अपि च विशेषविरुद्धं कार्यत्वम् । तथा हि— ज्ञानचिकीर्षाप्रयत्न-समवायित्वं कर्तृत्वमभिमतम् । तच्च शरीरसम्बन्धात् प्रागूर्ध्वं वा शरीर-सम्बन्धेतरदेशे वा न दृष्टमिति शरीरहेतुकमेव ; तद्भावाभावनिबन्धनत्वात् कार्यकारणभावस्य, अन्यथा बीजादेरप्यङ्कुरादिकं प्रत्यकारणत्वप्रसङ्गात् । अतस्सर्वत्र शरीरसम्बद्धस्यैव ज्ञानचिकीर्षाप्रयत्नसमवायित्वलक्षणकर्तृत्व-दर्शनात् कर्तृत्वं शरीरिण एव नाशरीरिण इति स्थितम् । एतेन शरीर-व्यापारे व्यापार्यशरीरस्य करणत्वाभावात् कर्तुश्शरीरमव्यापकमित्यपा-स्तम् ; करणत्वाभावेऽपि कारणत्वस्य दुर्वारत्वात् । न हि शरीरसमवेतो व्यापारः स्वसमवायिकारणं शरीरमतिपत्य भवतीति सम्भवति । अतो यत्र यस्य कर्तृत्वं तत्र तच्छरीरस्य कारणत्वमवश्याङ्गीकरणीयम् । न च कर्तुश्शरीरसम्बन्धे जन्यज्ञानेष्वुपाधिरिति वाच्यम् ; तस्य साधनव्यापक-त्वेनोपाधित्वानुपपत्तेः । एतेन धर्माधर्माश्रयत्वादीनामप्युपाधिभावो निरस्तः । तथा च कर्तृत्वस्य शरीरित्वं व्यापकमिति कार्यत्वं क्षित्यादौ स्वकर्तृकत्वं साधयत् स्वसाध्यविरुद्धमकर्तृकत्वमिव स्वसाध्यव्यापक-शरीरित्वविरुद्धमशरीरित्वमपि कर्तुः प्रतिक्षिपति । न च स्वसाध्यविरुद्ध-मेव प्रतिक्षिपति न स्वसाध्यव्यापकविरुद्धमिति वाच्यम् ; स्वसाध्य-विरुद्धस्येव स्वसाध्यव्यापकविरुद्धस्यापि स्वविरोधित्वात् तत्प्रयुक्तत्वाच्च प्रतिक्षेपस्य । अन्यथा कार्यत्वं स्वविरुद्धमकार्यत्वमेव प्रतिक्षिपति न साध्य-विरुद्धमकर्तृकत्वमिति क्षित्यादेरकर्तृकत्वमप्रतिक्षिप्तं प्रसजेत् । अतः

---

१. वनियमनिबन्धनत्वात्. ग. २. म्बन्धस्यैव. ग. ङ. ३. श्याश्रयणीयम् । ख. ४. म्बन्धजन्यज्ञानत्वमुपाधिरिति. ग. म्बन्धेन जन्य. घ. ५. नत्वमुपाधिरिति. क. घ. ६. पकं शरीरित्व. घ. ङ.

कार्यत्वं सकर्तृकत्वेन व्याप्तं क्षित्यादौ तत्साधनाय प्रवृत्तं तद्व्यापकशरीरि-कर्तृकत्वविरोध्यशरीरिकर्तृकत्वमप्यप्रतिक्षिप्य तत् साधयितुमशक्तं योग्या-नुपलम्भविरोधाच्छरीरिकर्तृकत्वमादायापि साधयितुमसमर्थं निरुद्धा-शेषविशेषत्वेन सामान्यस्यापि निरोधात् सकर्तृकत्वमसाधयदात्मन[1]-स्सकर्तृकत्वस्य प्राचीनसम्बन्धाध्यवसानमेव विघटयति— नाहं स-कर्तृकत्वेन व्याप्तमिति। न च वाच्यं कथं कर्तृविशेष[2]निरोधे[3] कर्तृ-सामान्यस्यापि[4] निरोध इति; कर्तृसामान्यस्य कर्तृविशेषमनन्तर्भाव्य क्षित्यादिविशेषणत्वानुपपत्तेः। न हि कर्तृविशेषमनुपधाय कर्तृसामान्येन क्षित्यादिकं सम्बद्धं प्रत्येतुं शक्यम्; तथा सति कर्तृसामान्येन स्वत-स्सम्बन्धिनः क्षित्यादेरपि कर्तृत्वप्रसङ्गात्। अतस्सकलविशेष[5]निरोधे सामान्यस्यापि[6] निरोध एवेति।

स्यादेतत्— एकव्याप्तिविघटनेन तदितरव्याप्तिसिद्धौ नोभय-विघटनमुचितम्। तथा च सकर्तृकत्वशरीरिकर्तृकत्वयोरेव व्याप्ति-विघटनात् कार्यत्वसकर्तृकत्वयोर्व्याप्तिः सिध्यतीति। तदयुक्तम्; विशेषा-भावात्। न हि कार्यत्वसकर्तृकत्वयोर्व्याप्तेः सकर्तृकत्वशरीरिकर्तृकत्वयो-र्व्याप्तेश्च विशेषमुपलभामहे, येनेयमेव बाध्या नेयमित्युच्यते।

यत्तु कार्यस्य कर्तृशून्यस्याकस्मिकत्वप्रसङ्ग इत्यादि विपक्षे बाधक-मेव विशेष इति, तदिदानीमेव निराकरिष्यामः। एतेन यदभिदधाति —

---

१. त्वं साधयदात्मनः. ग. ङ. २. त्मना सकर्तृकत्वस्य. ङ. ३. षविरोध. ग. ङ. ४. धेन कर्तृ. ङ. ५. पि विरोध. ग. ६. षविरोधे. ग. ७. पि विरोध एवेति. ग.

कार्यत्वेन पृथिव्यादौ शरीरिकर्तृकत्वं प्राप्तमप्राप्तं वा? यदि प्राप्तं सिद्धं तर्हि सकर्तृकत्वम्; विशेषविधौ सामान्यस्यावश्यकत्वात्। अथाप्राप्तं कथं तर्हि स्वविरुद्धमशरीरिकर्तृकत्वं प्रतिक्षिपेदिति, तन्निरस्तम्; उक्तेन क्रमेण पृथिव्यादिगतकार्यत्वप्रमितेरेव[1] स्वपरिपन्थित्वेन प्राचीनव्याप्ति-विघटनहेतुत्वात्। अतो विशेषविरुद्धं कार्यत्वम्। न च असिद्ध्याद्यनन्तर्गतत्वेन विशेषविरोधो न दूषणम्; असिद्ध्यादिपञ्चकस्यानुमानोत्पत्ति-प्रतिबन्धेनैव दूषणत्वात्, तस्य च प्रकृतेऽपि व्याप्तिविघटनद्वारेण प्राप्तत्वा-दसिद्ध्यादिदूषणान्तर्भावेऽनन्तर्भावे वा दूषणत्वानपायात्। अन्यथा भव-तामपि पृथिव्यादिकं धर्माधर्मरागद्वेषाश्रयकिञ्चिज्ज्ञानचेतनकर्तृकं कार्य-त्वाद् घटवदिति पार्श्वस्थप्रणीते कः परिहारः? न हि ईश्वरानुमानादमुष्य मनागपि विशेषमुपलभामहे। तत्सिद्धं विशेषविरोधो[2] न दूषणमिति। नन्वेवं सामान्यतो दृष्टानुमानाय दत्तो जलाञ्जलिः। दीयतां काममम्। न हि सङ्गतिग्रहणसापेक्षं लिङ्गमदृष्टचरतया दृष्टचरपरिपन्थित्वेन च सङ्गति-शून्यमनुमापयितुमलम्। अग्न्यनुमानेऽपि पूर्वदृष्टचरोष्णभास्वरत्वादिरूपा-लिङ्गितत्वेन तद्विरुद्धानुष्णाभास्वरत्वादिरूपातिरस्कारेणैव वह्निरसिध्यति। देशकालौ तु न साध्यभूतवह्निस्वरूपानुप्रविष्टाविति तद्भेदेऽपि[3] न साध्यभूत-वह्निभेदः। तस्मात्[4] सर्वत्र पूर्वपरिचितरूपेणैव साध्यसिद्धिः नापरिचित-रूपेण परिचितपरिपन्थिना वा रूपेणेति।

कथं तर्हि सङ्गतिग्रहणशून्यस्यातीन्द्रियत्वेन चक्षुषस्सिद्धिः?

---

१. प्रतीतेरेव. ग. २. धो दूषणमिति. क. ङ. ३. पि साध्यभूत. क. घ. ४. र्वत्र परिचित. ङ.

उच्यते—रूपप्रतिपत्तिलक्षणं कार्यं कारणव्याप्तं कारणं गमयति। तदैन्द्रियककारणाव्यभिचारित्वेनाकारणत्वग्राहिणा प्रमाणेन[1] प्रतिहन्यते। तदनयोर्विरोधादविरोधायातीन्द्रियमपि कारणं कल्प्यम्। तच्च दर्पणादौ प्रतिहतस्य परावृत्त्य ग्रहणं मूलदेशविनाशाद्विनश्वरत्वं[3] रूपप्रतिपत्तिहेतुत्वमित्यादि तेजोन्तरसाधारणबहुदृष्टोपपत्त्यर्थं[4] बहुबाधादेकबाध एव ज्यायानिति लाघवपक्षपातिन्यार्थापत्त्या तेजोन्तरसाधारणप्रत्यक्षत्वरूपव्यापकैकविशेषविरोधेनाप्यप्रत्यक्षत्वं परिकल्प्य तैजसमिति निश्चीयते। सर्वत्र चैवंजातीयकेष्वर्थापत्तिरेव शरणमिति द्रष्टव्यम्। नन्वेवं कार्यस्य कारणमात्रेणापि कथं व्याप्तिः? यत् कारणं तद् दृश्यमेवेति कारणत्वव्यापकदृश्यत्वविरोधे कारणत्वमेव प्रतिक्षिप्यत इति, तदयुक्तम्। एवं हि यत् कार्यं तत् कारणवत्, यच्च कारणं तद् दृश्यमेवेति व्याप्तिद्वयम्। तदनयोरदृश्यकारणेषु कार्येषु परस्परविरोधात् किं कार्यं कारणवदिति व्याप्तिर्भज्यताम्, उत कारणं दृश्यमेवेति व्याप्तिः उतस्विदुभयमपि परस्परविप्रतिहततयेति विमर्शे कार्यस्य[5] कारणशून्यस्याकस्मिकत्वेन नित्यं सत्त्वमसत्त्वं वा भवेदिति कारणाभावप्रतिक्षेपिप्रमाणान्तरानुरोधेन कार्यं कारणवदिति व्याप्तिर्गृह्यते तदितरा भज्यते। तदेवं साध्यव्यापकतया सपक्षे दृष्टोऽपि विशेषो यत्र प्रमाणान्तरं नोपरुणद्धि तत्र स्वंविरुद्धां[8] व्याप्तिं विघटयति। यत्र तूपरुणद्धि तत्र स्वयमेव[10] लीयत इति विशेषः। न च दृश्यत्वस्य कारणव्यापकत्व इव शरीरित्वस्यापि कर्तृव्यापकत्वे किञ्चिद्बाधकान्तरमस्ति;

---

१. कार्यकारण. ग. ङ. २. न विहन्यते. घ. नाप्रतिहन्यते. ङ. ३. शानश्वरत्वं. घ. ४. णदृष्टोपपत्त्यर्थं. घ. ५. नाप्रत्यक्षत्वं. ग. ६. त्रैवं. घ. ७. यैकारणशून्य. ङ. ८. न्तरविरोधेन. घ. ९. पक्षदृष्टो विशेषो. ग. पक्षदृष्टोऽपि विशेषो. ङ. १०. स्वविषयां. घ. ११. व लीयत इति. क. घ.

येन व्यापकतयावधृतमपि शरीरित्वविशेषमव्यापकीकृत्य कर्तृमात्रानुमानमुदीयात् । नन्वस्ति बाधकं कार्यस्य कर्तृशून्यस्याकस्मिकत्वप्रसङ्ग इति । तन्न; कार्यस्य कारणमात्रादेवोपपत्तेः । न च कार्यमात्रं प्रति कर्तुरपि कारणत्वात् समवाय्यसमवायिनिमित्तानामन्यत(रा?मा)पाय इव कर्त्रभावेऽपि कार्यत्वानुपपत्तिरिति वाच्यम् ; कार्यमात्रं प्रति कर्तुः कारणत्वासिद्धेः । न च पूर्वोक्तसन्निवेशविशेषयोगिनि पटादौ कर्तुः कारणत्वदर्शनात् कार्यमात्रं प्रत्यपि तस्य कारणत्वम् ; तथा सति कार्यविशेषप्रयुक्तानामपि कारणविशेषाणां कार्यमात्रं प्रति हेतुत्वे पटादिषु तत्तत्कार्यहेतुभूतपरस्परविलक्षणक्षणिकतत्तज्ज्ञानचिकीर्षाप्रयत्नस्यैव कर्तुः कारणत्वं दृष्टमिति क्षित्यादावपि तादृश एव कर्तुः कारणत्वं प्रसजेत् । अथ दृष्टान्ते तादृशकर्तुरेव कारणत्वदृष्टावपि कार्यमात्रस्य कारणमात्रेणाप्युपपत्तेर्न तद्विशेषादरः कार्यः, तर्हि दृष्टान्ते कर्त्राधिष्ठितानामेव कारणत्वदृष्टावपि कार्यमात्रस्य कारणमात्रेणाप्युपपत्तेः न कर्त्राधिष्ठितत्वविशेषादरोऽपि कार्यः । कथं तर्हि समवाय्यसमवायिनिमित्तनियम इति चेत्, न कथञ्चित् । न हि भूतभविष्यतोः समवाय्यसमवायिशून्यनिमित्तमात्रहेतुकं प्राकट्यमभ्युपगच्छतां तादृशो नियमो नियमो नाम । तस्मात् कार्यमात्रस्य कारणमात्रमेवाङ्गीकरणीयम्[3] । कारणविशेषास्तु कर्त्रादयस्तत्र तत्र यथादर्शनमेवाङ्गीकरणीयाः ।

यत्पुनर्भिन्नदेशकालानां कारणानां चेतनानधिष्ठितत्वे कथं कार्यानुगुणतया परस्परोपसर्पणम् ? न हि कुम्भकारमन्तरेण कुम्भहेतवः परस्परमुपसर्पन्तीति । तत्र किमिदं कुम्भादौ[4] तथा दृष्टमिति व्याप्तिमात्रं उता-

---

१. त्वमव्यापकीकृत्य. क. २. कार्यकारणमात्रादेवोपपत्तेः. ङ. ३. मात्रे वावश्याङ्गीकरणीयम् . घ. मात्रमेवावश्याङ्गीकरणीयम् . ङ. ४. दौ न दृष्टमिति. ङ.

नुपपत्तिरेव? पूर्वस्मिन् पूर्वोक्त एवातिप्रसङ्गो दूषणम्। उत्तरस्मिंस्तु तत्तत्कालविशेषसमासादितपरिपाकतत्तददृष्टवच्चेतनसम्बद्धानि कानिचित् कारणानि मिथः सन्निदधति कार्यं चोत्पादयन्तीति नं काचिदनुपपत्तिः। अपि च सिद्धेऽपि ईश्वरकर्त्तरि कथं भिन्नदेशकालानां कार्यानुगुणतया परस्परोपसर्पणम्? ईश्वरेच्छाप्रयत्नाभ्यामिति चेत्, कथं ताभ्यामपि सकलदेशकालप्रवृत्ताभ्यां कदाचिदेव क्वचिदेवोपसर्पणनियमः? कादाचित्कंचेतनादृष्टपरिपाकादिति चेत् तर्हि तत एवाङ्गीकरणीयात् कारणानां परस्परसन्निधानं सन्निहितेभ्यश्च कार्यमिति कृतमीश्वरपरिकल्पनेन। अत उक्तेन क्रमेण बाधकान्तराभावाद् दृष्टान्तदृष्टं शरीरित्वं सकर्तृकत्वस्य व्यापकमेवेति तद्बाधे कार्यत्वसकर्तृकत्वयोर्व्याप्तिरेव विलीयत इति सिद्धम्। एतेनार्थापत्तिगम्यत्वमपि क्षित्यादिकर्तुरपास्तम्; उक्तेन क्रमेण कार्यमात्रस्य कर्त्तारं विना कारणमात्रेणाप्युपपत्तेः।

एवं दूषिते परोक्तानुमाने स्वपक्षसिद्ध्यर्थमनुमानमुच्यते— क्षित्यादिकमकर्तृकं शरीर्यजन्यत्वात् गगनवदिति। ये पुनरिदमेवानुमानं क्षित्यादौ सकर्तृकत्वानुमानपरिपन्थित्वेन विशेषानुमानतया प्रमाणयन्ति तेषां गगनादावजन्यत्वप्रयुक्तमकर्तृकत्वमिति शरीर्यजन्यत्वमसमर्थविशेषणत्वादगमकमेव। अस्माकं तु पूर्वोक्तदूषणेनैव जन्यत्वसकर्तृकत्वयोर्व्याप्तिविघटनाच्छरीरित्वं कर्तृव्यापकमिति स्थितौ व्यापकभूतशरीरिजन्यत्वनिवृत्तेरेव गगनादावपि सकर्तृकत्वनिवृत्तिरिति निश्चयान्नाजन्यत्वप्रयुक्तव्याप्त्युपजीवित्वेनासमर्थविशेषणत्वं शरीर्यजन्यत्वस्य।

---

१. न कदाचिदनुपपत्तिः. ङ. २. त्कत्वे चेतनादृष्ट. ग. ३. बाधान्तराभावात्. ङ. ४. ककर्तुरपास्तम्. घ. ५. दिरकर्तृकं. ग. ङ.

किञ्च प्रतिहेतुविरुद्धश्च कार्यत्वम्। तथा हि— आत्मत्वं क्षित्यादिकर्तृव्यक्तिसमवेतं न भवति जातित्वाद् गोत्ववत्। एवं द्रव्यत्वसत्त्वे अपि पक्षीकृत्य वक्तव्यम्। तानेव च पक्षहेतुदृष्टान्तानाश्रित्य सर्वज्ञकर्तृकत्वाभावोऽपि समर्थनीयः। ननु कथं क्षित्यादिकं सर्वज्ञकर्तृकं न भवतीति पक्षीकरणीयम्? साध्यविशेषणस्य सर्वज्ञत्वस्य प्रमाणान्तरेण प्रमितौ[1] तद्बाधादप्रमितावप्रसिद्धविशेषणत्वापत्तेः। अन्यथा शशविषाणस्याप्रमितेः शशविषाणं नास्तीति बुद्धेरबाधिताया निवृत्तिप्रसङ्गात्। न च शशे विषाणाभाव एवावगम्यते न तु शशविषाणस्य क्वचिदप्यभाव इति वाच्यम्; शशे विषाणस्येव जगति शशविषाणस्यापि लौकिकानामबाधितनिषेधप्रवृत्तेः। शशस्य निषेधाधिकरणत्वे निषेध्यविषाणोपसर्जनत्वानुपपत्तेश्च।

यत्पुनरशशशृङ्गोपलम्भसामग्र्या[2] आभासरूपत्वात्तस्यां सत्यामनुपलम्भाभावादसत्याश्चोपलम्भसामग्रीरूपयोग्यत्वस्यैवाभावात्[3] कथं योग्यानुपलब्धिरशशशृङ्गं निषेधतीति। यथोक्तम्—

> दृष्टोपलम्भसामग्री[4] शशशृङ्गादियोग्यता।
> तस्याज्ञानुपलम्भोऽस्ति नास्ति सानुपलम्भने॥

इति। तदयुक्तम्— शशशृङ्गस्यापि पशुशृङ्गत्वेन पशुशृङ्गोपलम्भसामग्र्या एव तदुपलम्भसामग्रीत्वात्[5]। कथं पशुशृङ्गोपलम्भसामग्री तदुपलम्भसामग्री? तस्यां सत्यामपि तदनुपलब्धेरिति चेत्। कथं पशुशृङ्ग-

---

१. तौ तद्बाधाप्रतीतौ क. घ. ङ. तौ बाधादप्रमितौ. ग. २. दभाव. क.
३. म्या अभावरूपत्वात्. क. ग. घ. ४. दृष्टोपलम्भ. ग. ५. तदुप. ग.

स्यापि सामग्री? तस्यां सत्यां पशुशृङ्गस्यापि कदाचिदनुपलब्धेः। अथ यद्यस्यां सत्यां यत्र यदि भवेत् तर्हि तत्तत्रोपलभ्यत एवेति नियमः। सैव[३] तदुपलम्भसामग्री, तर्हि पशुशृङ्गोपलम्भसामग्र्यां सत्यां कदाचिदपि यदि शशशृङ्गमपि भवेदुपलभ्यत एवेति सैव तस्याप्युपलम्भसामग्री। तथाप्युपलम्भसामग्र्यां सत्यां कदाचिदपि शशशृङ्गं नोपलब्धचरमिति चेत्, सत्यम्। अत एव तस्यात्यन्ताभावः। यथाप्युपलम्भसामग्र्यां सत्यां[४] प्रागनुपलम्भात् प्रागभावोऽनुमीयते यथा च पश्चादनुपलम्भात् प्रध्वंसः तथा क्वचित् कदाचिदप्यनुपलम्भादत्यन्ताभावोऽपीति न काचिदनुपपत्तिः। अतः प्रकृतेऽपि सर्वज्ञस्यात्यन्तनिषेध्यत्वात्[५] अन्यत्राप्रमितिर्गुणायैवेति नास्माकमप्रसिद्धविशेषणत्वम्। भवतामेव तु क्षित्यादिकं सर्वज्ञकर्तृकमिति साधयतां तदपवादः।

किञ्च क्षित्यादिकं सर्वज्ञकर्तृकमिति साधयद्भिः यत् सर्वज्ञकर्तृकं न भवति[६] न तत् कार्यं यथा व्योमेति वैधर्म्येण व्याप्तिः प्रदर्शनीया। तथा च तत्रोपादानाद्यभावप्रयुक्तकार्यं न सर्वज्ञकर्तृकत्वाभावप्रयुक्तमित्यप्रयोजकत्वमेव। ततस्सिद्धं साधर्म्येण वैधर्म्येण वा क्षित्यादिगोचरत्वेन सकर्तृकत्वं सर्वज्ञकर्तृकत्वं वा कार्यत्वहेतुः न साधयतीति। एतेनाचेतनोपादानत्वं व्याख्यातम्।

यत्पुनरचेतनं चेतनाधिष्ठितं सत् कार्यकरम् अचेतनत्वाद्वास्यादिवत्, क्षित्यादिकं चेतनप्रयत्नधार्यं गुरुत्वे सत्यपतमानत्वाद्विहङ्गशरीरवदित्यादि।

---

१. थ यस्यां. ग. ङ. २. यद्यत्र. ग. ङ. ३. ल्यां शशशृङ्गमपि. ग. ४. वोऽवसीयते तथा च. घ. वोऽवसीयते ङ. ५. ल्यन्तं निषेध्यत्वात्. घ. ६. ति तत्. घ.

तदपि योऽधितिष्ठति[1] प्रयतते वा स शरीर्येव, रागद्वेषाश्रय एव, धर्माधर्मवानेव, चक्षुरादिजन्यकतिपयविषयक्षणिकबुद्धिरेवेत्यादिव्यापकभूतानेकविशेषविरोधादाभासीकरणीयम् । अतस्सिद्धं न प्रमाणान्तरमीश्वरसाधनमिति । आगमोऽपि पौरुषेयः साशङ्कत्वेनाप्रमाणमेव । अपौरुषेयस्त्वनाशङ्कितपुरुषदोषत्वेन स्वयं परमेश्वरं साधयन्नपि नास्मत्पक्षं क्षिणोतीति सर्वमनवद्यम् ।

इति युक्तिभिरेताभिः केवलं विश्वकर्तरि ।
चिदानन्दे चिदानन्दस्तर्कगम्यत्वमस्यति ॥

इति ईश्वरवादो नामैकोनचत्वारिंशो वादः
समाप्तः ।



[शब्दनित्यत्ववादः ।]

ननु माभूत् सङ्केतधिता तथापि शब्दानामनित्यत्वात्तदाश्रयस्य सम्बन्धस्यानित्यत्वं तदवस्थमेव । मैवम् ; सदकारणत्वेन वर्णनित्यत्वस्यैव प्राप्तेः[2] । असिद्धम् अकारणत्वमिति चेत् न ; दृश्यमानस्य कारणस्यानुपलब्धौ गगनादिवदकारणत्वसिद्धेः । उपलभ्यत एव तालवादिव्यापारो

---

१. ति यतते वा. ग. २. तेः । सिद्धं. ग. ङ.

वर्णकारणमिति चेत् न; ह्यस्तने य एव गकारो देवदत्तेनोच्चरितः स एव यज्ञदत्तेनाद्योच्चरित इति वक्तृभेदे तालवादिभेदे चैकस्यैव गकारस्य प्रत्यभिज्ञानेन तस्य तदहेतुंत्वनिश्चयात्। ननु ज्वालाप्रत्यभिज्ञावद् गकारप्रत्यभिज्ञापि सामान्यमन्यद्वा किञ्चिदवलम्ब्योदीयमानाँ न व्यक्तयैक्यव्यवस्थापनायालम्। तदयुक्तम्;

जात्यैक्यं प्रत्यभिज्ञेयं व्यक्तयैक्यासम्भवे यतः।
अभ्रान्तत्वोपपत्तौ वा न च भ्रान्तत्वकल्पनम्॥

यस्य हि प्रत्यभिज्ञानस्य प्रबलप्रमाणसिद्धभेदतया व्यक्तिगतमेकत्वं गोचरीकर्तुमयुक्तं तस्यैव सामान्यादितद्धर्मगतैकत्वगोचरतोपवर्णनं न्याय्यम्; गुणानामगुणपरतन्त्रत्वस्वभावेन गुणिपारतन्त्र्यस्यैवौत्सर्गिकत्वात्। अन्यथा जातिगोचरतयैव सर्वत्र प्रत्यभिज्ञोपपत्तेः क्वचिदपि न सा व्यक्तयैक्यं गोचरयेत्। न च सम्भवत्यभ्रान्तत्वे भ्रान्तत्वमपि न्याय्यम्। अतोऽवयविनाशेन निरुपाधिकतया सम्बद्धमवयवविशरणमध्यक्षयतेक-स्यामेव वर्तिकायां ज्वलद्दीपनिर्वापणेन दीपान्तरादीपने दृश्यमानेऽप्य-परस्य पार्श्वस्थस्य स एवायं दीप इति प्रत्यभिज्ञानञ्च पश्यन्नवयवविशरण-लिङ्गकावयविविनाशानुमानोपगृहीतादीपभेदप्रत्यक्षादेव दीपप्रत्यभिज्ञायाः सादृश्यदोषनिदानत्वं निश्चिनोति ततश्च कारणदोषज्ञानाद् बुद्ध्येकज्ञानादिवत्

---

१. ना व्यक्तयैक्य. ग. नव्यक्तयैक्य. ङ. २. भिज्ञानोपपत्तेः. घ. ३. विविनाशेन. ङ. ४. धितया सम्बन्धिनाशमवयविशरण. ग. ५. नाशोप. गृहीतादीप. ग. ६. यास्सौसादृश्य. क. घ. ङ. ७. नादिव प्रत्यभिज्ञानस्यासमीचीनत्वं. ग. ङ.

प्रत्यभिज्ञानस्यासमीचीनत्वं निर्णीयत[1] इति युक्तम् । इह तु गकारप्रत्यभिज्ञाने[2] न तथा कारणदोषज्ञानं नापि निरुपाधिकतयाविनाशेन प्रतिबद्ध[3]स्य साधनस्य दर्शनमिति न तस्य सामान्यादिगतकत्वगोचरत्वं भ्रान्तत्वं वा शक्योपपादम् ।

ननु नष्टश्शब्दः निवृत्तश्शब्द इति शब्दध्वंसस्यापि प्रत्यक्षत्वात् कारणदोषाधीनत्वेन भ्रान्तत्वं गत्वादिसामान्यालम्बनत्वञ्च सुज्ञानम् । मैवम्; अभावमात्रस्यैव प्रत्यक्षायोग्यत्वस्थितेः । न च योग्यानुपलम्भो बाधकः; तस्यापि योग्यत्वज्ञानसहितस्यैवाभावज्ञानहेतुत्वात्, शब्दे च तदसम्भवात् । न हि तालवादिव्यापारस्य शब्दोपलम्भहेतुत्वनिरासेन शब्दोत्पत्तिहेतुत्वसाधनमन्तरेण तालवादिव्यापाराभावे शब्दोपलम्भयोग्यत्वमवगन्तुं शक्यम्; विषयतदधीनेतरकारणसाकल्यलक्षणत्वात्तस्य । तस्मान्नानुपलम्भोऽपि बाधकः । न चैवं कुलालादिकारणकलापस्यापि घटोपलम्भहेतुत्वप्रसङ्गः; घटोपलम्भस्य तमन्तरेणापि दृष्टत्वात् । न हि तदतिरिक्त[4]त्वापि भवतस्तज्जन्यत्वं सम्भवति । न चैवं तालवादिव्यापाराभावे वर्णोपलम्भो दृष्ट इति न वर्णानां घटतुल्यचर्चत्वम् । कथं तर्हि नष्टः शब्दो निवृत्तश्शब्द इति चेन्नित्यस्यैव कालस्य[5] तत्तदवच्छेदकनाशान्नष्टः कालो निवृत्तः काल इति यथा तथा तत्तदवच्छेदकद्रुतत्वतीव्रत्वादिधर्मविनाशात् नष्टश्शब्दो निवृत्तश्शब्द इति व्यवहार इति किमनुपपन्नम्? ननु शब्दोपलम्भस्य ध्वन्यन्वयव्यतिरेकानुविधायित्वात् ध्वनीनाञ्चाभिव्यञ्जकवैधर्म्यो-

---

१. निश्चीयत इति. क. २. भिज्ञानं न. ङ. ३. बन्ध. ग. ४. वे शब्दोपलम्भो. घ. ५. न दृष्टः शब्दो. ग. ङ. ६. स्य तदवच्छेदक. घ. ७. न दृष्टः. ग.

दुत्पादकत्वमवशिष्यते। तन्न; अभिव्यञ्जकवैधर्म्यासिद्धेः। नन्वभिव्यञ्जकपक्षे ध्वनयश्शब्दं श्रोत्रं वा संस्कुर्युः। तत्र शब्दसंस्कारपक्षे संस्कृतस्य सर्वगतत्वेन सर्वश्रोत्रश्रवणं समानदेशानां समानेन्द्रियग्राह्याणां व्यञ्जकनियमाभावेन युगपदखिलवर्णग्रहणञ्च प्राप्नोति। अथ श्रोत्रसंस्कारः, तथापि समानदेशसमानेन्द्रियग्राह्यग्रहणाय व्यञ्जकनियमाभावेन तदवस्थमेव निखिलवर्णग्रहणमिति। तदयुक्तम्; श्रोत्रध्वनिसंयोगस्यैव तदुपलम्भहेतुत्वात् शब्दोपलम्भहेतुत्वमेव च तदभिव्यञ्जकत्वमपीति। तस्मात्तत्प्रयत्नभेदभिन्नाः ध्वनयः श्रोत्रसंयुक्तास्सहकारिण इति तत्तत्सहकारिभेदेन श्रोत्रमपि तं तमेव वर्णं गृह्णाति न वर्णान्तरमिति नातिप्रसङ्गः; न च समानदेशसमानेन्द्रियग्राह्यप्रतीतौ सहकारिभेदोऽपि न दृष्टः; त्वन्मते एव नैल्यस्य शौक्ल्याभावस्य च समानदेशत्वे समानेन्द्रियग्राह्यत्वे च सति शौक्ल्याभावावगमस्य प्रतियोगिज्ञानापेक्षत्वादितरस्य च तदभावात् सौरस्य च तेजसो गगनगतपतङ्गावगमहेतुत्वेऽपि नक्षत्रावगमपरिपन्थित्वात्। समानदेशत्वमेकसमवायित्वमभिप्रेतम् अतो नोक्तव्यभिचार इति चेत् न; वर्णानामप्येकसमवायित्वस्यासिद्धेः।

एतेन समानेन्द्रियग्राह्यत्वे सति युगपदिन्द्रियसम्बद्धत्वात् प्रतिनियतव्यञ्जकव्यङ्ग्यत्वाभावोऽपि पराकरणीय एव; गोत्वमहिषत्वयोस्समानेन्द्रियग्राह्ययोर्युगपदिन्द्रियसम्बन्धेऽपि प्रतिनियताभ्यामेव व्यक्तिभ्यां व्यङ्ग्यत्वदर्शनात्।

---

१. समवायस्यैव. क. ग. घ. २. नाप्रसङ्गः. ङ. ३. भेदेनापि. घ. ४. पि दृष्टः. ग. ५. न्मते नैल्यस्य. घ. ६. यत्वग्रा. ग. ७. स्वन्मतत्वात्. ग. ङ. ८. ल्याभावोऽपि. ङ.

यत्तु शब्दस्य नित्यत्वे वक्तृदेशस्थतया दिग्विशिष्टतया च श्रवणं कथमिति चोद्यं, तद् उत्पत्तिपक्षेऽपि तुल्यत्वात् प्रमाणान्तरप्रमिताभिव्यञ्जकध्वनिदेशत्वसमारोपनिमित्तं भ्रान्तमेवेति कथञ्चित् परिहर्तव्यम्। तस्मादविरुद्धमेव शब्दाभिव्यञ्जकत्वं ध्वनीनाम् ।

यत्पुनरेकस्यैव गकारस्य तीव्रतीव्रतरमन्दमन्दतरत्वादिविरुद्धधर्माध्यासाद्भेद इति, तदयुक्तम्; मुख इव मणिकृपाणदर्पणादिधर्मसमारोपस्य तत्तदभिव्यञ्जकध्वनिधर्मसमारोपस्य शब्देऽप्युपपत्तेः। न चारोप्यस्य[2] ध्वनिधर्मत्वे वायुधर्मत्वेनाश्रावणत्वादन्येन च ग्रहणाभावादगृहीतस्य च स्मृत्यभावाद्ग्रहणेन स्मरणेन वानुपनीतस्य समारोपानुपपत्तेर्न तीव्रत्वादिसमारोप इति वाच्यम्; श्रोत्रप्रदेशवर्तित्वगिन्द्रियेणैव[3] ध्वनीनां तद्धर्माणाञ्च निर्विकल्पकेनैव युगपद्[4]वगतेः। न च निर्विकल्पकेन तथावगतौ सविकल्पकेनापि ध्वनीनामेव तारतरत्वादिधर्मविशिष्टत्वेनावगमप्रसङ्गः; शब्दस्य ध्वनिधर्मयोश्च श्रोत्रेण त्वचा च निरन्तरावगमदोषेण शब्दगततयैवारोपात्। अत एवात्रारोप्यारोपाधिष्ठानयोः सविकल्पकेन[5] न कदाचिदपि पृथग्ग्रहणम्; अभिव्यञ्जकध्वनिसन्निधेरवश्यम्भावात्। अत आरोपसम्भवादसिद्धं विरुद्धधर्माध्यासितत्वम्। एतेन प्रकर्षनिकर्षवत्त्वादयो[6] व्याख्याताः।

नचैवं अभिव्यङ्ग्यत्वे कल्प्यबाहुल्यादुत्पाद्यत्वमेव वर्णानां न्याय्यम्; उत्पाद्यत्वेऽपि संयोगविभागशब्दानां शब्दकारणत्वम्, आद्यस्य कार्यविनाश्यत्वम्, अन्त्यस्य कारणविनाश्यत्वम्, इन्द्रिय-

---

१. शसमारोप. घ. २. रोपस्य. ग. ३. शत्वागेन्द्रियेणैव, ङ. ४. दनवगतेः. घ. ५. तनुत्वादि. ग. ६. न कदाचिदपि. ग. ७. रुद्धाध्या. ग. ८. र्षनिकर्षत्वादयो. ग. र्षनिकर्षत्वादयो. घ.

समवेतस्य ग्राह्यत्वं, वीचीतरङ्गक्रमेणारभ्यत्वमित्यादिकल्प्यबाहुल्यस्य ततस्तरां विद्यमानत्वात्। किञ्च—

अकारणत्वे तालवादिव्यापारस्य व्यवस्थिते।
तद्व्यङ्ग्योऽनन्तरं दृष्टश्शब्दो मूलोदकादिवत्॥

यस्य हि यद्व्यापारानन्तरमुपलब्धस्य तदुत्पाद्यत्वं न सम्भवति तस्य तदभिव्यङ्ग्यत्वमेव यथा खननानन्तरोपलब्धस्य मूलोदकस्य, तथा च तालवादिव्यापारानन्तरमुपलब्धस्य शब्दस्यापि तदभिव्यङ्ग्यत्वमेव; तदुत्पाद्यत्वासम्भवात्। न च तदुत्पाद्यत्वमपि सम्भवति। कथम्? तालवादिव्यापारः शब्दकारणं न भवति व्यापारत्वात् उभयसिद्धवादित्यादेर्बाधकस्य विद्यमानत्वात्। नचैवं घटादेरपि कुलालादिव्यापारानुत्पाद्यत्वप्रसङ्गः; तस्य तदन्वयव्यतिरेकानुविधायित्वस्यानन्यथासिद्धयानुत्पाद्यत्वानुमानस्य बाधितत्वात्। प्रकृते च तदभावस्य प्रागेवदर्शितत्वात्।

यत्तु सामान्यविशेषवत्त्वे सत्यस्मद्बहिरिन्द्रियग्राह्यतया शब्देनानित्येन भवितव्यमिति; तत्तत एव रूपत्वादिवन्नित्येन भवितव्यम्; तथा अनारब्धेन्द्रियतया श्रोत्रेण मनोवन्नित्यग्राहकेण भवितव्यम्, तथा ध्वनिधर्मान्यत्वे सति श्रावणतया शब्देन शब्दत्ववन्नित्येन भवितव्यमित्यादिविरुद्धव्याप्तिप्रदर्शनेन पराकरणीयम्।

किञ्च गगनादिवदनवयवद्रव्यतयापि शब्दस्य नित्यत्वं सुज्ञानम्। न च द्रव्यत्वं दुरधिगमम्; साक्षादक्षसम्बन्धेन प्रतीयमानस्य घटस्येव

---

१. यित्वस्यान्यथा. घ. २. षत्वे. ङ. ३. व्यम्, अथाना. ङ. ४. व्याप्तिदर्शनेन. क. ग. ङ.

शब्दस्यापि द्रव्यत्वसिद्धेः । ननु शब्दे[3] साक्षादक्षसम्बन्धित्वं द्रव्यकर्मादिव्यतिरेकेण गुणत्वसिद्धावेवावगन्तव्यमिति स्वोपजीव्यप्रमाणबाधः । तन्न, यावद्द्रव्यो विरोधिभ्यः परिशेषं विना हेत्ववगम एव न भवेत्[4] तावत्परिशेषमात्रस्यैव हेतुनोपजीव्यत्वात् । साक्षादक्षसम्बन्धित्वस्य च द्रव्यत्वमनुगुणमेवेति विरोधिकर्मादिचतुष्टयव्यावृत्तिमात्रादेव हेतुत्वसिद्धेर्नोपजीव्यप्रमाणबाध[3] इति ।

किञ्च शब्दसाक्षात्कार[4]हेतुत्वेन शब्दश्रोत्रसम्बन्धे कल्प्यमाने साक्षात् सम्बन्धे सति सम्बन्ध्यन्तर[5]पूर्वकसम्बधकल्पनं गौरवायेत्यर्थापत्त्या साक्षादक्षसम्बधित्वस्य सिद्धिः[6] स्यात् । अन्यथा परिशेषाधीनत्वे द्रव्यकर्मादित्व इव गुणत्वेऽपि बाधादिन्द्रियसम्बन्धित्वमेव शब्दस्य भज्येत । न च कर्मादिचतुष्टयान्तर्गतस्यास्य न प्रत्यक्षत्वम् ; तस्य[7] स्वाश्रयस्यैव प्रत्यक्षत्वमिति नियमात् । अतः तन्निवृत्तिरेव शब्दस्य कर्मादित्वबाधिका । बहिरिन्द्रियव्यवस्थाहेतुत्वञ्च रूपादेरिव द्रव्यत्वबाधकम् । गुणत्वे तु न किञ्चिद्बाधकमिति वाच्यम् ; यत् ज्ञानाजन्यश्रावणं तत् न गुणः यथा शब्दत्वम् ; तथा यस्य गुणत्वं न तस्य ज्ञानाजन्यश्रावणत्वं यथा रूपस्येति व्यापकभूतज्ञानाजन्यश्रावणत्ववैधुर्यं निवर्तमानं गुणत्वस्यापि निवर्तकमित्यादेर्गुणत्वेऽपि बाधकस्य विद्यमानत्वात् । अतो द्रव्यत्वगुणत्वयोरविशेषात् पूर्वोक्तन्यायेन परिशेषादर्थापत्तेर्वा साक्षादक्षसम्बन्धित्वं शब्दस्य सिद्धमिति सिद्धं ततो द्रव्यत्वम् ।

---

१. ब्देन. क. २. त् न तावत्प. ङ. ३. धः । किञ्च. घ. ४. क्षात्करण. घ. ५. म्बन्धान्तर. ग. ङ. ६. सिद्धत्वात् . घ. ७. स्य संश्रय. ङ.

किञ्च शब्दो द्रव्यम् अनाश्रितत्वात् गगनवत्। न चानाश्रितत्वमसिद्धम्; विप्रतिपन्नं व्योम शब्दाश्रयो न भवति वस्तुत्वाद् घटवदिति तत्सिद्धेः।

यत्तु शब्दस्य द्रव्यत्वे द्रव्यस्य प्रत्यक्षत्वं विशेषगुणपुरस्कारेणेति तन्निवृत्तौ द्रव्यत्वनिवृत्तिरित्युक्तम्; तद् गुणस्य नित्येन्द्रियग्राह्यत्वं नीरसेन्द्रियग्राह्यत्वञ्च द्रव्यपुरस्कारेणैवेति तन्निवृत्तौ गुणत्वमपि निवर्तत इति परिहरणीयम्। किञ्च यानि शब्दस्य गुणत्वमद्रव्यत्वं वा साधयन्ति साधनानि[1] तानि सर्वाण्यपि गुणत्वाद्द्रव्यत्वयोस्साक्षादक्षसम्बन्धित्वेनाप्रमीयमाणत्वव्याप्तेः[2] शब्दे च तदभावाद्विशेषविरुद्धान्येव। द्रव्यत्वे तु साक्षादक्षसम्बन्धित्वं प्रयोजकान्तराणामपि व्याप्यमेवेति सिद्धं ततो द्रव्यत्वम्। तच्चानारम्भकत्वे सत्यनवयवद्रव्यत्वाद्विभुत्वयुक्तमपि प्राप्तम्। एवञ्च व्यक्तिभेदाभावात् तन्निबन्धनं गत्वादिसामान्यमपि दूरापास्तमिति सर्वं निर्मलम्॥

इति शब्दनित्यत्ववादो नाम चत्वारिंशवादः
समाप्तः।

---

१. नि सर्वाण्यपि. ग. ङ. २. णाद्द्रव्यत्वयो; क. घ, ३. मानत्व. ग. मानव्याप्तेः. ङ.

[क्षणिकवादः।]

ननु शब्दो विनाशी न वेति कोऽस्य विचारस्यावसरः? सर्वस्य क्षणिकत्वात्। तथा हि—प्रत्यक्षमेव तावद्यथा घटं परिच्छिन्दद्[1] घटाभावं व्यवच्छिनत्ति[2] तथा घटस्य वर्तमानक्षणसम्बन्धं परिच्छिन्दत्[3] पूर्वोत्तरक्षण-सम्बन्धित्वं व्यवच्छिनत्ति। तन्न; अतुल्यत्वात्। न हि यथा घटः[4] स्वाभावाभावात्मकः तथा वर्तमानक्षणसम्बन्धः पूर्वोत्तरक्षणसम्बन्धाभावा-त्मकः, येन वर्तमानक्षणसम्बन्धे परिच्छिद्यमाने पूर्वोत्तरक्षणसम्बन्धो व्यवच्छिद्येत। यस्तु वर्तमानक्षणसम्बन्धाभावः स स्वाभावात्मके वर्तमानक्षणसम्बन्धे परिच्छिद्यमाने व्यवच्छिद्येत। न च भावान्तरेभ्यो घटस्य प्रत्यक्षेण व्यवच्छेदाभावाद्[5] घटार्थिप्रवृत्त्यसम्भवः; भावान्तरेभ्यो व्यवच्छेदस्य दृश्यानुपलम्भसिद्धत्वात्[6]। न च पूर्वोत्तरक्षणसम्बन्ध-व्यवच्छेदस्यापि दृश्यानुपलम्भसम्भवेऽन्यत्वम्; पूर्वोत्तरक्षणसम्बन्धस्य पूर्वोत्तरयोः क्षणयोरुपलभ्यमानत्वान्न व्यावृत्तिसिद्धिरिति[7]। तस्मान्न क्षणिकत्वे प्रत्यक्षानुपलम्भौ प्रमाणम्।

नन्वनुमानं प्रमाणम्—यत् सत् तत् क्षणिकम्, सन्तश्च सर्वे भाव इति। न च वाच्यम्—बुद्ध्यादेरपि द्वित्रिक्षणावस्थायित्वात् क्षणमात्रस्थायि-

---

१. न्दत् पटाभावं. ग. २. त्ति यथा घटस्य. ङ. ३. न्दद् घटाभावं व्यवच्छिनत्ति. घ. ४. घटस्वभावाभावात्मकः. ग. ङ. ५. वात् पटार्थि. ग. ६. लम्भत्वात्. ङ. ७. व्याप्तिसिद्धिरिति. ग. ङ.

सदन्तरानुपलम्भेन व्याप्तिसिद्धिरिति; क्षणिकान्तराभावेऽपि[1] विपक्षादक्षणिकात् बाधकप्रमाणेन सत्त्वनिवृत्तादर्थात् क्षणिकत्वसत्त्वयोः प्रतिबन्धसिद्धेः। अत एव न दृष्टान्तापेक्षापि। सत्यपि दृष्टान्ते विपक्षव्यावृत्त्यसिद्धौ प्रतिबन्धासिद्धेः। न च वाच्यम्—विपक्षे बाधात् पक्षे[2] चाबाधात् यत् सत् तत् क्षणिकमिति क्षणिकत्वसिद्धौ सत्त्वहेतुकथनमनङ्गमिति, सामान्यतो व्याप्तिसिद्धावपि धूमादेरिव सत्त्वस्यापि साध्यसिद्ध्यर्थं पक्षधर्मप्रदर्शकस्यावश्यकत्वात्। अत एवोक्तम्—सन्तश्च सर्वे भावा इति। न गगनकुसुमसमा इत्यर्थः। ननु किं[3]क्षणिकत्वे सत्त्वस्य बाधकम्?

उच्यते—सत्त्वं ह्यर्थक्रियाकारित्वम् अन्यस्यानिरूपणात्। अर्थक्रिया कार्योत्पत्तिः। न च निध्यादेरर्थक्रियाभावादसत्त्वम्; तस्यापि सर्वज्ञ[4]ज्ञानालम्बनत्वेनार्थक्रियाकारित्वात्। अतोऽर्थक्रियाकारित्वमेव सत्त्वम्। तच्च यत् करोति तत् क्रमाभावे यौगपद्येन यौगपद्याभावे क्रमेणेति तृतीयप्रकाराभावात् क्रमयौगपद्याभ्यां व्याप्तम्। तत्र[5]क्षणिकस्य न तावत् क्रमेणार्थक्रियाकारित्वं तस्य तदैव द्वितीयक्षणजन्यार्थक्रियां प्रति शक्तत्वे यदा यज्जननसमर्थं तत्तदैव तज्जनयति यथान्त्यावस्थो बीजक्षण इति समर्थस्य क्षेपाभावात् प्रथमक्षण एव द्वितीयादिक्षणजन्यसर्वार्थक्रियाकरणात् कृतस्य च पुनःकरणाभावे द्वितीयक्षणे सर्वार्थक्रियाविरहलक्षणमसत्त्वमेव। अथाशक्तत्वं तर्हि यदा यज्जननसमर्थं न भवति न तत्तस्य जनकं यथा शिलाशकलमङ्कुरस्य इति द्वितीयक्षणजन्यार्थक्रियां प्रत्यजनकत्वात् द्वितीयक्षणे तदवस्थमेवासत्त्वम्।

---

१. पि पक्षादक्ष. ङ. २. क्षेऽबाधात् ङ. ३. मर्थं क्षणिकत्वे सत्यस्य. ग. ४. र्वज्ञानालम्ब. ग. ङ. ५. त्त्वम्। यच्च यत् . ग. ६. त्रापि क्षणिकस्य. क. ग. त्रास्य क्षणिकस्य. घ. ७. थापरस्थो बीजक्षण इति. ग. थावस्थो बीजक्षण इति . ङ.

अथ प्रथमहेतोस्सन्दिग्धविपक्षव्यतिरेकित्वात् शक्तस्यापि सहकार्यपेक्षस्य तत्क्रमेण क्रमादर्थक्रियाकारित्वम् । तन्न, अनुपकारिणां सहकारिणामनुपकारकतदितरविश्ववदनपेक्षणीयत्वात् । उपकारकत्वे तूपकार्यादभावादभिन्नोपकाराधाने[3] भावस्यैवोपकारभेदाज्जन्योपकारस्य[4] भावाभेदादजन्येति सर्वथोपकार्याभावोत्पत्तिरुपकारानुत्पत्तिर्वा भवेत् । भिन्नोपकाराधाने[7] तु तस्याप्यनुपकारिणोऽनपेक्षणीयत्वादुपकारान्तरकल्पने चानवस्थाप्रसङ्गाद् उपकाररूपेण च भावस्यैव कर्तृत्वे स्वरूपेणाकुर्वतः[8] पररूपेण कर्तृत्वात् सर्वस्य सर्वकर्तृत्वप्रसङ्गः ।

किञ्च उपकार्याज्जन्मवादुपकारस्य[9] भिन्नत्वात् तत एवागन्तोः कार्यसिद्धेरकारणं भावः प्रसजेत् । न च भावः स्वकारणादेव विलम्बकारिस्वभाव एवोत्पन्न इति स्वभावादेव विलम्बकारित्वम्; सहकारिसमवधानेऽपि विलम्बकारिस्वभावत्वेन कार्याजनकत्वप्रसङ्गात् । अथ सहकारिलाभे विलम्बकारिस्वभावो निवर्तते तर्हि स्वभावादनन्यो भाव इति स्वभावनिवृत्तौ भावोऽपि[10] निवर्तेत ।

एतेन कारणमात्रस्याजनकत्वात्[11] समग्रभावसम्पत्त्यर्थं सहकार्यपेक्षेति निरस्तम् ; समग्रत्वस्याप्यनुपकारकत्वेऽपेक्षाभावाद् उपकारकत्वे प्रागिव भेदाभेदविकल्पेन[12] दूषणप्राप्तेः । अतः सहकारिक्रमेणापि स्थिरस्यार्थक्रियाकारित्वमनुपपन्नमेव । न च युगपदर्थक्रियाकारित्वम्, प्रथमक्षण

---

१. स्यासहकार्यपेक्षस्य. ग. ङ. २. णामनुपकारकतादितर. ङ. ३. राभिधाने. घ. ४. जन्योपकारस्य. ग. ङ. ५. कार्यभावोत्पत्तिः. क. कार्योत्पत्तिः. ङ. ६. स्यानुपकारि. ङ. ७. ने चानवस्था. ङ. ८. ण कुर्वतः. ग. ९. यार्जन्मोपकारस्य. ग. १०. वो निवर्त्तेत. ग. ११. त्रस्य-जनकत्वात्. ग. ङ. १२. कल्पनदूषणत्वप्राप्तेः. ग. कल्पदूषणत्वप्राप्तेः क. घ.

एव सर्वार्थक्रियानिष्पत्तेर्निष्पन्नस्य च निष्पत्त्यभावाद्द्वितीयक्षणे सर्वार्थ-क्रियाविरहादसल्लक्षणत्वापत्तेः। तस्मादर्थक्रियाव्यापकौ क्रमाक्रमावुक्तेन न्यायेनाक्षणिकस्यासम्भवन्तौ ततो निवर्तमानौ स्वव्याप्यामर्थक्रियामपि निवर्तयतं इत्यर्थक्रियाकारित्वलक्षणं सत्त्वमक्षणिकान्निवृत्तं क्षणिकपक्षे व्यवतिष्ठमानं क्षणिकत्वं गमयति। न च कार्यकारणभावस्य बह्वन्वयव्यतिरेकमूलत्वात् क्षणिकत्वे च तदसम्भवादन्वयव्यतिरेकमात्रस्य बीजक्षण इव रसक्षणेऽपि भावादशक्यावगमं बीजकारणत्वमङ्कुरस्येति वाच्यं, बह्वनुस्यूततया प्रत्यवमृश्यमानस्यासतोऽप्येकाकारस्याङ्गी-करणात्। तादृशावमर्शहेतुत्वेन व्यक्तीनामप्यभेदात्। यथाहुः—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता॥

इति।

एतेनानुसन्धातुरभावात् साध्यासिद्धिरित्यपास्तं वेदितव्यम्। तस्मात् सिद्धं सत्त्वात् क्षणिकत्वम्।

किञ्च कृतका भावाः स्वहेतुभ्यो नश्वरस्वभावा वा जायन्ते अनश्वरस्वभावा वा? यदि नश्वरस्वभावाः जन्मानन्तरमेव नश्येयुः, अथानश्वरस्वभावाः न कदाचन नश्येयुः; स्वभावस्यानपायात्। न च कारणान्तरजन्मा विनाशः; तस्य भावकारणव्यतिरिक्तकारणत्वेन भावतादात्म्यायोगात्। अतदात्मनि चाभावे जातेऽपि भावस्य तादवस्थ्यमेवेति पूर्ववदुपलम्भादिप्रसङ्गात्। तदुक्तम्—यद्यभावो नाम तत्त्वान्तरं किं जातं भावस्य तादवस्थ्यादिति। तस्मात् स्वहेतोरयं

---

१. न क्षणिकस्या. क. २. र्तयेते. घ. ३. मर्शेन हेतुत्वेन. ङ.

विनश्वरस्वभाव एवोत्पन्नः उत्पन्नस्य नाशकानपेक्षत्वादुत्पत्त्यनन्तरं नाश एवेति ।

किञ्च यद्यस्य ध्रुवभावि न तस्य तत्र हेत्वन्तरापेक्षा यथा शरकृपाणादेर्लोहमयत्वे । ध्रुवभावी च कृतकानां विनाश इति भावस्य स्वोत्पत्त्यनन्तरमेव हेत्वनपेक्षो विनाशः प्राप्तः । तस्मात्तदेवेदमिति प्रत्यभिज्ञानंस्य स एवायं दीप इतिवत् सदृशपरम्परोत्पन्नवस्तुविषयत्वेन भ्रान्तत्वात् सिद्धं सर्वे भावाः क्षणिका इति ॥

तदिदमनुपपन्नम् । तथा हि—यत्तावत् सत्त्वात् क्षणिकत्वमित्युक्तं तत्र किमिदं क्षणिकत्वम् ? यद्येकक्षणसत्त्वं तर्हि सिद्धसाध्यत्वम् । अथ द्वितीयक्षणासत्त्वं तर्हि किमिदं द्वितीयक्षणासत्त्वं ? किं द्वितीयक्षणेऽत्यन्तासत्त्वं उत विनाशः ? न तावदत्यन्तासत्त्वम्, तस्य त्रिकालसत्त्वविरोधेन पूर्वक्षणे सत्त्वानुपपत्तेः । अथ विनाशः, तर्हि तस्य द्वितीयक्षणे विनाशात्मनो[2] सतस्तृतीयादिक्षणेषु सत्त्वमसत्त्वं वा भवेत् ; तृतीयप्रकारा[3]-सम्भवात् । तत्र न तावदसत्त्वं, भावाभावयोर्विधीयमानस्येतरनिषेध-रूपत्वात् निषिध्यमानस्य[4] चेतरविधिरूपत्वा[5]त् सत्त्वासत्त्वे सत्त्वमेवेति नष्टस्य पुनरुन्मज्जनप्रसङ्गात् । अथ विनाशस्य तृतीयादिक्षणे सत्त्वमेव तर्हि तत्रैव सत्त्वमनैकान्तिकम् । न च भावाभावस्यासद्रूपत्वात् कथं तस्य सत्त्वमिति वाच्यम्, घटादेर्ह्यसावसन् नात्मनः, तस्मिन् हि सति घटादिरेवासन्नित्युच्यते न स्वयम् । तस्माद् घटो नास्ति कण्टको नास्तीति प्रवृत्तिनिवृत्तिरूपामर्थक्रियां कुर्वन् विनाशोऽर्थक्रियाकारित्वलक्षणं सत्त्वं न जहातीति बलादङ्गीकरणीयम् ।

---

१. नं स एवायं. ग. ङ. २. नोऽसत. क. घ. ङ. ३. राभावात् क. घ. ङ. ४. स्येतर. ग. ५. त्वादसत्त्वमेवेति नष्टस्य. घ.

अस्मदभिमतन्तु सत्त्वमहेतुरिति तत्सद्भावासद्भावावचिन्तनीयावेव । यस्य तु हेतुत्वमर्थक्रियाकारित्वलक्षणस्य तस्याभावेऽपि सद्भावो दुर्निवार एव । न च वाच्यं भावसत्त्वं क्षणिकत्वसाधनमिति; भावसत्त्वस्याप्यभावसत्त्वस्येव क्षणिकत्वेन विनाप्युपपत्तेः सन्दिग्धविपक्षव्यतिरेकित्वेनानैकान्तिकत्वात् ।

स्यादेतत्—अभावोऽप्यभावान्तरजनने क्षणिक एवेति । तदयुक्तम् । अभावोऽप्यभावान्तरं जनयन्नप्यनन्तरक्षणे नश्यति न वा ? यदि न नश्यति तदवस्थमनैकान्तिकत्वम्, यदि नश्यति तर्हि स्वाभावाभावात्मकत्वाद् भावस्य स्वनाशनाशे पुनरुन्मज्जनप्रसङ्ग इति प्रागेवोक्तम् ।

किञ्च विनाशविनाशो भवतामप्यनिष्ट एव । यदाहुः—

हेतुर्यस्य विनाशोऽपि तस्य दृष्टोऽङ्कुरादिवत् ।
विनाशस्य विनाशस्तु नास्ति तस्माद्कृत्रिमः ॥

इति । तस्मात्तत्र सत्त्वमनैकान्तिकमेव ।

अपि च प्रथमक्षण इव द्वितीयक्षणेऽपि प्रत्यक्षमेव घटं परिच्छिन्ददभावं व्यवच्छिनत्ति । न च तद्द्वितीयक्षणे घटान्तरम्; तस्य तद्धेतुशून्यत्वे कादाचित्कत्वानुपपत्तेः । यथोक्तम्—

नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥

इति ।

---

१. भावोऽपि. घ. २. वारः घटवत् । न च. ग. ३. त् । अभावोऽप्यभा. घ. ४. वात्मकत्वाद् भावस्य. ङ. ५. ष्टमेव. ग. ६. मः ॥ तस्मात्तत्र. घ. ७. त्ति तद्द्वितीयक्षणे. घ. ८. अभावतोऽपि. ग.

स्यादेतत्—प्रथमक्षणवर्तिनो[1] घटस्य द्वितीयक्षणवर्तिनं[2] प्रति हेतुत्वमिति। तन्न; घटहेतुत्वस्य मृद्दण्डचक्रादित्वव्याप्तेः व्यापकभूतमृद्दण्डचक्रादित्वं निवर्तमानं स्वव्याप्यं घटहेतुत्वमपि घटस्य निवर्तयति। अत एवादृष्टहेतोरपि घटादेर्मृद्दण्डचक्रचीवराद्यनुमानम्। अन्यथा कथमनियतहेतुकत्वे नियतहेत्वनुमानम्? अत एवोक्तम्—

यज्जातीयो यतस्सिद्धः स तस्मादग्निकाष्ठवत्।
अदृष्टहेतुरप्यन्यो विषयस्सम्प्रतीयते॥

इति।

न च कपिलहरितवृश्चिकगोमयजन्यवृश्चिकद्वयवन्मृद्दण्डचक्रादिजन्यस्य घटजन्यस्य च कमपि भेदमुपलभामहे, येनास्येदं कारणमस्येदमिति व्यवस्थापयेमहि। तदुक्तेन क्रमेण द्वितीयक्षणे घटहेत्वभावेन घटान्तरोत्पादायोगात् सिद्धं द्वितीयक्षणासत्त्वं प्रत्यक्षविरुद्धमिति।

अपि च यज्जनयति तदन्यसहितमन्यासहितं वा जनयेत्; तृतीयप्रकारासम्भवात्। अत्र न तावदन्यासहितस्य जनकत्वम्; बीजस्येव क्षितिपवनपाथसामन्वयव्यतिरेकयोस्तुल्यत्वात्। तत्तुल्यत्वेऽपि कस्यचिदजनकत्वे सर्वस्याप्यजनकत्वप्रसङ्गात्। कार्यं प्रति नियतपूर्वक्षणवर्तित्वस्य च बीज इव कारणान्तरेष्वपि भावात् तन्मात्रत्वाच्च कारणत्वस्य। तस्मान्नान्यासहितस्य कारणत्वम्। यथाहुः—

न किञ्चिदेकमेकस्मात् सामग्र्यास्सर्वसम्भवः।

---

१. नो हि घटस्य. घ. २. र्तिनो हेतुजमिति। तन्न; हेतुत्वस्य. घ. ३. न्नः हेतुत्वस्य क.

इति । अथान्यसहितस्य जनकत्वं तर्हि यानि सहकुर्वन्ति तानि परस्परसाकाङ्क्षाण्यनपेक्षाणि वा कुर्युः ; तृतीयप्रकारासम्भवात् ।

न तावद्द्वितीयः ; ये यत्र परस्परानपेक्षा न ते तत्र सहकुर्वन्ति यथा तक्षककुलालकुविन्दाः पीठपिठरपटेष्विति परस्परानपेक्षत्वस्य व्यापकासहकारित्वस्य विरुद्धसहकारित्वोपलब्धेः ।

एतेन परस्परानपेक्षाणां स्वोपसर्पणप्रत्ययैर्देवमिलितानां काकतालीयन्यायेन सहकरणं प्रत्युदेम्, उक्तेन न्यायेन सहकारित्वस्य परस्परसहितत्वव्याप्तेः । कदाचिदुपसर्पणप्रत्ययैरनुपनीतेऽपि सहकारिण्यपि कार्योत्पत्तिसम्भावनेन कार्यपूर्वक्षणवर्त्तित्वानियमानुपपत्तेश्च । तस्मान्न परस्परानपेक्षाणि सहकुर्युः । नापि परस्परसाकाङ्क्षाणि ; यद्यस्यानुपकारकं न तत्तेनापेक्ष्यते यथा मेरुर्मन्दरेणेत्यनुपकारकत्वव्यापकानपेक्षत्वविरुद्धसापेक्षत्वोपलब्धेः अनुपकारकस्थानपेक्षणीयत्वादुपकारकस्य चोत्पन्नं प्रत्युत्पन्नस्य किञ्चित्कारकरूपत्वात् क्षणभङ्गपक्षे क्षणस्याभेद्यत्वेन तदयोगाभावादुक्तदोषापत्तेः न किञ्चिदुपकारकमुपकार्यञ्चेति । तस्मादनुपकारकस्यानपेक्षणीयत्वादनपेक्षितस्य च सहकर्तृत्वाभावात् यत् करोति तदन्यसहितमन्यासहितं वा करोति परस्परसहकारिणोः तृतीयप्रकाराभावादिति व्यापकभूते अन्यसहितत्वासहितत्वे पूर्वोक्तक्रमेण क्षणिकपक्षान्निवृत्ते स्वव्याप्यमर्थक्रियाकर्तृत्वलक्षणं सत्त्वमपि निवर्तयत इति सत्त्वं क्षणिकादपि निवृत्तं गन्धवत्त्ववदसाधारणानैकान्तिकम् ।

---

१. व्यावर्तकाः सहकारित्वस्य. ग. ङ. २. हम्. ग. ३. न कारणत्वस्य सहकारित्वस्य परस्परसापेक्षत्वसाहितत्वव्याप्तेः. क. ४. स्य च परस्पर. ग. ५. सापेक्षाणि ग. ६. स्यानुपपन्नत्वा . क. ७. रूपत्वात् . क. रणरूपत्वात् .ङ. ८. क्रमो क्षणिक . ग. ९. त्तेः स्वव्याप्य. ङ. १०. प्यत्वमर्थ. क. ११. याकारित्वकर्तृत्वलक्षणं. घ. १२. वर्तत इति. ग. ङ.

अपि च सहकारिक्रमेणाक्षणिकस्यापि क्रमेणार्थक्रियोपपत्तेस्सन्दिग्धविपक्षव्यतिरेकित्वादप्यनैकान्तिकं सत्त्वम् । न च सहकारिणामनुपकारिणामनपेक्षेति वाच्यम् ; अनुपकारिणामपि सहकुर्वतां परस्परसापेक्षस्वभावत्वात् । अन्यथा भवन्मतेऽपि बीजक्षितिपवनपाथसां परस्परानपेक्षाणामेव जनकत्वे यत् परस्परानपेक्षानेकहेतुकं तन्नाना यथा पावकपयसी इति परस्परानपेक्षानेकहेतुकत्वनानात्वयोर्व्याप्तेरङ्कुरस्यापि नानात्वप्रसङ्गात्। यथोक्तं भवद्भिरेव— अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदो वेति । तस्मात् परस्परानपेक्षानेकहेतुत्वव्याप्तकार्यनानात्वविरुद्धं कार्यैकत्वं स्वविरुद्धव्याप्तात् परस्परानपेक्षत्वान्निवर्तमानं स्वहेतूनां परस्परसापेक्षत्व एव व्यवतिष्ठत इति बलादुपकारगर्भत्वे[1] तदगर्भत्वे वाप्येककार्यनिवेशिनां परस्परसापेक्षत्वं स्वयंवादित्यङ्गीकरणीयम्[2] ।

अपि च भवतूपकारगर्भसापेक्षत्वं, तथाप्युपकार्यादुपकारस्य भेदाभेदवादिनां न प्रागुक्तदोषावकाशः ।

यत्त्वागन्तूपकारादेव कार्योत्पत्तेरकारणं बीजमिति । तन्न, बीजमात्र-(स्यैक?स्ये)वोपकारमात्रस्याप्यन्यगतस्य व्यभिचाराद् बीजगतस्यैवोपकारस्य हेतुत्वं वाच्यम् , तथा च विशिष्टहेतुत्वे विशेषणस्यापि हेतुत्वमनिवार्यमेव । तत् सिद्धमक्षणिकस्यापि सहकारिक्रमेण विलम्बोपपत्तेरपेक्षादव्यावर्तितं सत्त्वमनैकान्तिकमिति ।

---

१. त्वे वाप्येक. ख. २. भाव इत्यङ्गीकरणीयम्. क. ङ.

यत्तु विनश्वरस्वभावा इति, तत्र किमिदं विनश्वरस्वभावत्वम्? किं विनाशस्य हेतुशून्यत्वं, उत भावात्मकत्वम्, आहोस्विद्भावहेतुत्वम्, उतस्विद्भावसमानहेतुत्वमिति। तत्र न प्रथमः, हेतुशून्यत्वेन नित्यं सत्त्वमसत्त्वं वेति पूर्वोत्तरक्षणयोरिव मध्यमक्षणेऽपि भावस्याभावप्रसङ्गात्। नापि द्वितीयः, तत एव दोषात्। न च तृतीयः, क्रियाजन्यफलभागित्वलक्षणस्य, कर्मत्वस्य क्रियासमवायित्वलक्षणकर्तृत्वपूर्वकत्वात्। क्षणस्याभेद्यत्वेन क्षणभङ्गिनस्तदनुपपत्तेः स्वस्यैव नाश्यनाशकत्वमनुपपन्नमिति। न च चतुर्थः, भावसमानहेतुत्वेन हेतुत्वभेदेन कार्याभेदाद्भावाभावसङ्करप्रसङ्गात्। तस्मादागन्तुकत्वेनागन्तुकमुद्गरप्रहारादिरूपभावान्तरहेतुत्वाद् विनाशस्य कृतका विनश्वरा इति कृतकत्वविनाशयोर्व्याप्तिमात्रमवशिष्यते। तावन्मात्रसाधने च सिद्धसाध्यत्वमेव।

यत्तु ध्रुवभावित्वादहेतुकत्वानुमानम्। तत्रापि किमिदं ध्रुवभावित्वम्? किमहेतुकत्वं, किं तादात्म्यम्, उतैकहेतुत्वं, उत भावहेतुत्वं, उतस्विद्व्याप्तिमात्रमिति। न प्रथमः, साध्याविशिष्टत्वात्। न च द्वितीयतृतीयचतुर्थाः, हेत्वसिद्धेः। नापि पञ्चमः, कपालमालाया घटं प्रत्यवश्यंभावव्याप्तेः तस्याश्च मुद्गरप्रहारादिहेतुकत्वाद्ध्रुवभावित्वमनैकान्तिकमिति।

यत्तु घटादेः पूर्वापरक्षणयोः कुर्वदकुर्वत्स्वभावत्वादिना विरुद्धधर्माध्यासेन भेदानुमानम्, तदुक्तेन न्यायेन हेत्वसिद्धेरपाकरणीयम्।

---

१. ति, किमिदं. ग. २. समवायहेतुत्वेन. ग.ङ. ३. हेतुत्वभेदेन कार्यभेदात्. क. ४. वसहकारप्रसङ्गात्. ग. ५. नाश्यस्य. ग. ६. तुत्वानुमानम्. घ. ७. तुत्वम्. घ. ८. न द्वितीय. घ.

तदेवं क्षणिकत्वसाधकप्रमाणाभावात् स एवायं घट इति संस्कार-सहायेन्द्रियप्रभावितमबाधितं प्रत्यभिज्ञाप्रत्यक्षमेव घटस्य पूर्वापरकालयो-रैक्यमेव व्यवस्थापयति । न च प्रदीपप्रत्यभिज्ञानवदसत्यम्; तत्र हि प्रदीपावयवविश्लेषादेव प्रदीपनाशेऽनुमिते वर्तिप्रदेशवर्तिनः तेजःपुञ्जस्य प्रदीपहेतोर्दर्शनादवयविविनाशहेतोरवयवविश्लेषस्य दृष्टत्वात् सदृशा-परापरोत्पन्नविषयत्वमङ्गीकृतम् । इह तु क्षणिकत्वे प्रमाणाभावात् घटोत्पत्ति-हेतोर्मृद्दण्डादेर्घटनाशहेतोर्मुद्गरप्रहारादेश्च योग्यानुपलम्भबाधितत्वात् सदृशापरापरोत्पन्नविषयत्वमशक्यमित्यन्यथासिद्धत्वात् पूर्वापरकालयो-रैक्यमेव गृह्णातीति विवेकात् । तस्मात् सिद्धं न भावाः क्षणिका इति ॥

इति क्षणिकवादो नामैकचत्वारिंशवादः

समाप्तः ।

[आत्मवादः ।]

अथ देहेन्द्रियज्ञानसुखेभ्यो भेदमात्मनः ।
नानात्वं मुक्तिनित्यत्ववैभवे चाभिदध्महे ॥

---

१. यव-ग-ङ· २· यविविश्लेषस्य· घ· ३· दृश्यपरापरोत्पत्तिविषयत्व-मङ्गीकृतम् · क.

केचिदाहुः शरीरमेवात्मेति । तदयुक्तम् ; आत्मविशेषगुणानां ज्ञानसुखदुःखादीनां तद्गुणत्वानुपपत्तेः । शरीरविशेषगुणस्य यावच्छरीरभावित्वात् तन्निवृत्तौ शरीरविशेषगुणत्वस्यापि निवृत्तेः । किञ्च प्रत्यक्षशरीरगुणस्य स्वपरबाह्येन्द्रियग्राह्यत्वव्याप्तेस्तन्निवृत्तेरपि ज्ञानसुखादेश्शरीरगुणत्वनिवृत्तिः स्वध्यवसाना । कथञ्च शरीरे ज्ञानसुखादीनामुत्पत्तिः सम्भविनी ? न हि कार्यगतविशेषगुणं कारणगुणपूर्वकतामन्तरेण निष्पद्येत । न च शरीरकारणानामपि ज्ञानसुखादियोगित्वम् ; तथा सति शरीरस्य भौतिकत्वात् तत्समानकारणानां घटादीनामपि ज्ञानसुखादियोगित्वप्रसङ्गात् । अतो ज्ञानसुखादीनां शरीरसमवायित्वानुपपत्तेरन्यसमवायित्वं वाच्यम् । यश्च तत्समवायी स आत्मेति सिद्धः शरीरात्मनोर्भेदः ।

कथं तर्ह्यात्मनः स्थौल्यकार्श्याद्यभावादात्मगोचरस्याहंप्रत्ययस्य स्थूलोऽहं कृशोऽहमित्यादिशरीरगोचरस्थूलकृशादिबुद्धिसमानाधिकरणत्वमिति चेद्, अत्यन्तसंसृष्टत्वेन शरीरात्मनोरेकत्वसमारोपादिति ब्रूमः । न च बाधाभावान्न समारोपितैकत्वगोचरत्वं न्याय्यमिति वाच्यम् ; उष्णतोयप्रत्ययस्येव लौकिकबाधाभावेऽपि यौक्तिकबाधस्य विद्यमानत्वात् । तस्य[1] च प्रागेव दर्शितत्वात् । किञ्च मम शरीरमिति लौकिकोऽपि[2] शरीरात्मनोर्भेदप्रतिभासोऽस्ति । तस्मादात्मव्यतिरिक्तगोचरेदमित्यवभासविषयाच्छरीरादहमित्यवभासविषयस्य सिद्धं वैलक्षण्यम् ।

---

१. स्य प्रागेव. ग. २. किकेऽपि. घ. ३. चरस्येदं. ग. ङ. चरे इदं. घ.

एतेनेन्द्रियवैलक्षण्यमप्यात्मनो द्रष्टव्यं; पूर्वोक्तनयेन भूतचैतन्यस्य प्रसङ्गादेव बाह्येन्द्रियेभ्यो भेदस्य सिद्धत्वात्। न च मन एवात्मा[1]; तस्यात्माधिकरणसुखदुःखाद्यापरोक्ष्यसाधनेन्द्रियत्वेन कल्प्यस्य सिद्धरूपादपरोक्षरूपाच्चात्मनो विलक्षणत्वात्।

अस्तु तर्हि ज्ञानमेवात्मा। न च ज्ञानस्यात्मत्वे तस्य क्षणिकत्वात् पूर्वानुभूतवस्तुविषयत्वेन स्मरणाभिलाषविषयप्रत्यभिज्ञानानि न भवेयुः; अन्येनानुभूतेऽन्यस्य तदसम्भवादिति वाच्यम्; एकसन्ततिपतितेष्वेकेनोपलब्धेऽन्यस्य स्मरणाविरोधात्। तदिदमनुपपन्नम्; ज्ञातुर्ज्ञानत्वानुपपत्तेः। न हि कर्तैव क्रियेति सम्भवति, च्छेत्तुरपि च्छेदनाभेदप्रसङ्गात्। किञ्च योऽहं प्राग्दुःखमन्वभूवं स एवाहमेतर्हि सुखमनुभवामीति पूर्वापरकालयोरेकस्य प्रत्यभिज्ञायमानस्यानुभवितुः क्षणिकानुभवरूपत्वमाशङ्कितुमपि न शक्यते।

ये पुनरौपनिषदा नित्यमेव ज्ञानं, न च नीलवेदनसमये पीतवेदनानुपलम्भादनित्यत्वं, नीलाद्युपधानभेदेऽपि ज्ञानरूपस्यैकस्यानुभूयमानत्वादित्याहुः। तेऽप्यचेतयन्नेवेयन्तं कालमस्वाप्समिति सुषुप्तौ ज्ञाननिवृत्तिप्रतिसन्धानादपास्ताः। तथा यस्य मे पूर्वं सुखमवर्तत तस्य मे सम्प्रति दुःखं वर्तते इत्यात्मन एकत्वानुसन्धानेऽपि सुखनिवृत्तेरनुसन्धानादात्मनस्सुखरूपत्वमपि पराकृतं वेदितव्यम्।

---

१. न्यप्रसङ्गादेव. ग. ङ. २. त्मा, अस्यात्माधिकरण. ग. ३. क्षरूपादात्मनो, ग. घ. ४. लमहमस्वाप्समिति. घ. ५. स्वापमिति. ग. ६. स्ताः। यथा. ग. ७. र्तते. ग.

यत्पुनरात्मनः परप्रेमास्पदत्वात् सुखरूपत्वमित्युक्तम्, तदयुक्तम्; दुःखनिवृत्तेः परप्रेमास्पदत्वेऽपि सुखरूपत्वाभावात्, न च यदर्थमन्यत् यच्च नान्यार्थं तत् सुखम्। आत्मा च नान्यार्थः तदर्थं च विश्वमिति सुखमेवेति वाच्यम्; सुखस्यात्मार्थतया परार्थत्वादसुखत्वप्रसङ्गेन तस्य सुखलक्षणत्वानुपपत्तेः।

स्यादेतत्—"विज्ञानमानन्दं ब्रह्मे"ति श्रुतिरेवात्मनो विज्ञानानन्दत्वसमर्थनी। नचैकार्थनिष्ठत्वेन पर्यायतया विज्ञानानन्दपदयोरानन्त्यवैयर्थ्यम्; ऐकार्थ्येऽपि व्यवच्छेद्यभेदादेव पर्यायत्ववैयर्थ्ययोरभावात् प्रकृष्टप्रकाशश्चन्द्र इतिवत्। यथा खल्वस्मिन् ज्योतिर्मण्डले कतमश्चन्द्र इति चन्द्रप्रातिपदिकार्थं पृष्टः कश्चिदाह—"प्रकृष्टप्रकाशश्चन्द्र" इति। तत्र हि प्रकृष्टप्रकाशपदयोश्चन्द्रपदेनाभिन्नार्थत्वमङ्गीकरणीयम्, अन्यथा चन्द्रप्रातिपदिकार्थस्य पृष्टत्वात्तदितरार्थकथनेन प्रश्नोत्तरयोरसङ्गतिप्रसङ्गात्। अतस्तत्रैकार्थ्येऽपि यथा प्रकृष्टपदस्याप्रकृष्टखद्योतादि व्यवच्छेद्यं, प्रकाशपदस्याप्रकाशतिमिरादीति व्यवच्छेद्यभेदादवैयर्थ्यम्। एवं विज्ञानानन्दपदयोरर्थभेदाभावेऽपि अविज्ञानानन्दरूपव्यवच्छेद्यभेदादवैयर्थ्यम्। तथा च प्रयोगः—विज्ञानादिवाक्यमखण्डनिष्ठं लक्षणवाक्यत्वात्, प्रकृष्टप्रकाशश्चन्द्र इतिवत्। तत्सिद्धमात्मनो विज्ञानसुखरूपत्वमिति।

---

१. स्यान्यार्थतया. ग. ङ. स्यात्मार्थतया. घ. २. खप्रसङ्गेन. ग.ङ. ३. न्दसमर्थ. ग. ४. ति। अत्र. घ. ५. योर्भिथश्चन्द्रपदेन चाभिन्नार्थत्व. क. घ. ६. तरस्य कथनेन. क. घ. ७. रादिति. घ. ८. विज्ञानवाक्य. ग. ज्ञानादिपद. घ. ९. ति। तदेव तदचतुरश्रम्. घ.

तदेतदचतुरश्रम् ।

संसर्गविषयं वाक्यं नाखण्डविषयं क्वचित् ।
ऐकार्थ्येन व्यवच्छेद्यभेदोऽपि पदयोर्यतः ॥

सर्वमेव हि वाक्यं पदार्थसंसर्गविषयं न त्वखण्डैकपदार्थविषयम् ; एकेनैव पदेन तस्य प्रतिपत्तेरितरपदाम्नानवैयर्थ्यस्य दुष्परिहरत्वात् । न च व्यवच्छेद्यभेदादवैयर्थ्यम् ; ऐकार्थ्ये पर्याययोरिव व्यवच्छेद्यभेदस्यैवानुपपत्तेः । न हि कुम्भकरीरपदयोरेकार्थयोर्व्यवच्छेद्यभेदो नाम । यत्पुनः प्रकृष्टप्रकाशश्चन्द्र इति वाक्यमखण्डार्थनिष्ठतया अवश्याभ्युपगमनीयमित्युक्तम् , तदयुक्तम् ; तस्यापि संज्ञासंज्ञिसंसर्गमात्रपरत्वात् । नचैवं प्रश्नोत्तरासङ्गतिः , प्रश्नस्यापि कस्यात्र चन्द्रसंज्ञेति संज्ञासंज्ञिसंसर्गविषयत्वात् । अन्यथा चन्द्रस्वलक्षणस्य प्रत्यक्षत्वादस्मिन् ज्योतिर्मण्डले कतमश्चन्द्र इति प्रश्नस्य तन्मात्रविषयत्वेनानुत्थानात् । अतश्चन्द्रपदेस्यार्थेन संज्ञासंज्ञिसम्बन्धप्रतिपादनं तदर्थमनुपलक्ष्य न शक्यमिति तदर्थोपलक्षकप्रकर्षविशिष्टप्रकाशप्रतिपादनाय प्रकृष्टप्रकाशपदयोराम्नानस्यापि प्रश्नोत्तरोपयोगित्वात् न प्रागुक्तदोषावकाशः । तस्माद्विज्ञानादिवाक्यमपि विज्ञानादिविशेषणविशिष्टविषयम् । कथं तर्हि "विज्ञानमानन्दं ब्रह्मे"ति सामानाधिकरण्यमिति चेन्मैवम् , मधुरो गुळ इतिवद्भेदसहिष्णोरभेदात् समवायाद्वा तदुपपत्तेः ।

---

१. वं भेदोऽपि. ग. २. सर्गविषयत्वात्. क. ३. णप्रत्यक्षत्वात्. घ. ४. तन्मात्राविषयत्वेऽनुत्थानात्. ग. ५. दस्य स्वार्थेन. क. ६. क्षण. ग. ७. योः समाम्नानस्यापि. घ.

यत्पुनरद्वैतश्रुत्यनुरोधाद्विज्ञानादिवाक्यस्याखण्डार्थनिष्ठत्वोपवर्णनं तदद्वैतश्रुतेः प्रत्यक्षादिविरुद्धार्थतया यथाश्रुते प्रामाण्यानुपपत्तेः पराकरणीयम्। किञ्च श्रुतिरपि "स एको ब्रह्मण आनन्दः" "आनन्दं ब्रह्मणो रूपम्[1]" "आनन्दं ब्रह्मणो विद्वान्[2]" इत्यादिरानन्दात्मनोर्भेदमापादयन्ती तदैक्यस्यापबाधनी। तत् सिद्धं विज्ञानानन्दात्मानः परस्परं भिन्ना इति।

स पुनरयमात्मा सकलशरीरेष्वेक इत्यौपनिषदाः। तदयुक्तम्—

नैको भोक्ता यतो युक्तश्चैत्रमैत्रशरीरयोः।
तुल्यत्वेनोभयत्रापि व्यापारस्य प्रसङ्गतः॥

यदि हि मैत्रचैत्रशरीरयोरेक एवात्मा भवेत् तर्हि मैत्रे सुखिनि दुःखिनि वा मैत्रशरीरे यादृशो व्यापारो दृष्टः तादृशश्चैत्रशरीरेऽपि स्यात्। नचैवमस्ति। अतो मैत्राधिष्ठितत्वस्यापि निवृत्तिरेव।

एतेन स्वशरीरानननुभूतमेव[3] शरीरान्तरानुभूतमपि तच्छरीरोपहितत्वमुन्मुच्यात्मरूपेणानुसन्धत्त एव मैत्र इत्यपास्तम्, चरणतललग्नकण्टकोद्धरणाय करतलव्यापारवच्चैत्राङ्गलग्नकण्टकोद्धरणाय मैत्राङ्गस्यापि व्यापारप्रसङ्गात्। ऐकात्म्येऽपि देहान्तरानुभूतस्य मनोभेदानुसन्धानवैकल्यमिति चेन्मैवम्; करणभेदाभेदयोरनुसन्धानवैकल्यावैकल्ये प्रति प्रयोजकत्वानुपपत्तेः। उपपत्तौ च चक्षुरादिभेदेऽप्यनुसन्धानाभावप्रसङ्गात्। न च नास्त्येव चक्षुरादिभेदेऽनुसन्धानम्; "योऽहमद्राक्षं सोऽहं स्पृशामि"

---

१. नो भेदमापादयन्ती. ग. ङ. २. स्यावबाधनी. ग.ङ. ३. रानुभूतमेव. ग.घ.ङ. ४. कारण. ग. ङ.

योऽहमश्रौषं स एव पश्यामीत्यादेर्दर्शनात्। देहभेदादनुसन्धानवैकल्यमिति चेन्न, जन्मान्तरीयदेहान्तरानुभूतस्य[1] स्तन्यपानादेरिष्टसाधनतया बालेनानुसन्धीयमानस्य दृष्टत्वात्, जातिस्मराणां भवान्तरीयरहोवृत्तस्मरणस्य च दर्शनात्।

एतेन ब्रह्मैवात्रानुसन्धातृ जीवस्तु भोक्तैव "अनश्नन्नन्यो अभिचाकशीती"ति श्रुतेः। अतो देहान्तरे भोक्तुरन्यत्वाद्भोगप्रयुक्तत्वाच्च वेदनापरिहारस्य न चैत्राङ्गलग्नकण्टकोद्धरणाय[2] मैत्राङ्गे व्यापारप्रसङ्ग इति प्रत्यूढम्। अमुष्याः श्रुतेर्जीवब्रह्मभेदप्रतिपादनपरत्वे ब्रह्माद्वैतभङ्गप्रसङ्गः। अन्यपरत्वे वा भोक्तुरनुसन्धातुश्च मिथो भेदाभावेन[3] पूर्वोक्तदोषापत्तेः। अस्त्येव ब्रह्मणो भेदः किन्त्वसौ कल्पनानिर्मित इति नाद्वैतभङ्गप्रसङ्गः नापि प्रागुक्तदोषप्रसङ्ग इतिचेन्नैवम्; कल्पनानिर्मितस्य भेदस्य प्रामाणिकव्यवस्थाहेतुत्वानुपपत्तेः। न हि जातु कल्पनानिर्मितरजतभावं शुक्तिशकलं कटकमकुटादावुपयुज्यते। यथा च नाप्रामाणिकस्य प्रामाणिकाङ्गत्वं तथा प्रत्यक्षपरीक्षायामेव प्रतिपादितम्।

ननु यथैकस्यैव[4] नभसः श्रावणत्वेऽपि[5] तत्तदवच्छेदककर्णशष्कुलीभेदात् किञ्चिदेव शृणोति किञ्चिन्नेति व्यवस्था प्रतिकायं श्रोत्रभेदश्च घटते तथैकस्यैवात्मनस्तत्तदवच्छेदकभोगायतनादिभेदात् कश्चिदेव सुखी कश्चिन्नेति

---

१. स्तनपानादे, ग. ङ. २. द्वाराय. ङ. ३. नामात्रनिर्मित. ङ. ४. कस्य नभसः. ङ. ५. पि तदवच्छिन्न. ग. ङ.

व्यवस्था प्रतिदेहं जीवभेदश्च स्याताम् । तदिदमनुपपन्नम् ; दृष्टान्तदार्ष्टान्ति-
[1]
ककयोरतुल्यत्वात् । तथा हि—नभसस्तत्र तत्र तदेवेदं गगनमिति प्रत्यभिज्ञानाद् भेदावेदकप्रमाणाभावाच्च सिद्धमेकत्वम्, आत्मनि तु न प्रतिशरीरमेकत्वप्रतिसन्धानं नापि भेदावेदकप्रमाणाभाव इति न तदैक्यमभ्युपगन्तुमुचितम् ।

[2]
यानि पुनर्विवादपदानि शरीराणि चैत्राधिष्ठितानि जीवच्छरीरत्वात् चैत्रशरीरवदित्याद्यैक्यसाधनानि तानि विवादपदानि शरीराणि चैत्रा-
[3]
नधिष्ठितानि चैत्रशरीरसमकालत्वे सति तदन्यत्वाच्चैत्रवत् , तथात्मा-द्रव्यत्वातिरिक्तापरजात्याधारं भेदेन नानाशरीरात्मसम्बन्धसम्बन्धित्वा-द्विशेषगुणाधिकरणत्वाद्वा शरीरवदित्यादिभिः सप्रतिसाधनानि कर्तव्यानि। न च शरीरादौ नानात्वस्य कार्यत्वप्रयुक्तत्वादप्रयोजकत्वं पाश्चात्यहेतु-द्वयस्येति शङ्कनीयम् ; अकार्याणामपि परमाणूनां नानात्वाभ्युपगमेन कार्यत्वस्य साद्दश्यव्यापकत्वानुपपत्तेः । न च विशेषगुणाधिकरणत्व-मसिद्धम् ; अस्मदभ्युपगतस्यैवात्मनो नानात्वैकत्वविवादास्पदत्वात् तस्य च बुद्ध्याद्यधिकरणत्वात् ।

यत्पुनः 'एको देवस्सर्वभूतेषु गुढः'

'एक एव च भूतात्मा भूते भूते व्यवस्थितः।'

इत्यादिश्रौतस्मार्तपौराणिकादिवचनबलादात्मैक्यप्रसाधनं तद्

"निरञ्जनः परमं साम्यमेति"

---

१. भस्तत्र तत्र. ग. ङ. २. नि तानि चैत्राधिष्ठितानि. ग. ङ. ३. धार-भेदेन. घ. धानभेदेन. ङ.

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।"

इति तादृशवचनान्तरविरुद्धत्वेन तदर्थस्य प्रमाणान्तरतो निर्णयात् तस्य च पूर्वोक्तनयेन भेद एवानुगुणत्वात् पराकरणीयम्।

किञ्च आत्मैक्ये यदि कश्चिन्मुच्येत तदैव तादितरोऽपीति [1] बद्धमुक्तव्यवस्थापि नोपपद्यते।

कः पुनरसौ मोक्षः? केचित्तावन्नीलादिविषयोपधानविलये सत्यनुपधानस्य बोधसन्तानस्य स्वरूपेणावस्थानं मोक्षमाहुः। अन्ये तु निखिलबुद्ध्यादिविशेषगुणविलयेनात्मस्वरूपावस्थानम्, अपरे पुनः प्रपञ्चविलयम्। वयं तु निखिलदुःखप्रविलये सति नित्यनिरतिशयानन्दाभिव्यक्तिलक्षणं मोक्षमाचक्ष्महे।

तत्र न तावदाद्यः पक्षः साधीयान्[2]; निर्विषयबोधसन्तानाभावस्य बाह्यार्थसमर्थनसमयसमर्थितत्वात्[3]। किञ्च कस्य मोक्षः? न तावत् सन्तानस्य; सन्तानिव्यतिरेकिणस्सन्तानस्यानुपपत्तेः। उपपत्तौ वा संविदद्वैतभङ्गप्रसङ्गात्। नापि सन्तानिनः; तस्य क्षणभङ्गुरत्वेन मोक्षफलसम्बन्धानुपपत्तेः। एतेनोत्तराधरभावेन निरन्तरमुपजायमानरागादिदोषदूषितचित्तसन्तानस्य प्रदीपसन्तानस्येवात्यन्तिको विलयो मोक्ष इत्यपास्तम्; आत्मोच्छित्तेरपुरुषार्थत्वात्, [4] पूर्ववन्मोक्षफलं प्रति फलिनो निरूपणानुपपत्तेश्च। नापि द्वितीयः पक्षः; मुक्तेरपुरुषार्थत्वप्रसङ्गात्।

---

१. बन्धमुक्त. ग. ङ. २. न्; बाह्यार्थबोधसन्तानाभावस्य बाह्यार्थबोधसमर्थन एव समर्थितत्वात्. घ. ३. ह्यार्थबोधनसमर्थन. क. ह्यार्थबोधसमर्थन. ङ. ४. पूर्व मोक्ष. ग. ङ.

न च निखिलदुःखविलयरूपत्वात् पुरुषार्थत्वम् ; निखिलसुखविलयरूपत्वेनापुरुषार्थत्वस्यापि प्रसङ्गात् । न च निद्रायास्सुखाभावेऽपि निद्राभावमात्रेण समीहितत्वं दृष्टमिति वाच्यम् ; असम्भवादनल्पविषयत्वाद् दुःखाभावसमीहितत्वस्य[1] । अपरथा विस्मृत्य सुप्तोत्थितस्य दुःखाभावे[2]ऽनुसन्धीयमानेऽपि कामिनीसम्भोगादिसम्भवसुखलवलोपनिमित्तनिर्वेदानुपपत्तेः[3] । अतः स्वर्गादिसुखलोपेऽपि मोक्षस्य समीहितत्वं न केवलं दुःखाभावस्वरूपत्वात् किन्तु सुखरूपत्वात् । अन्यथा केवलदुःखाभावरूपत्वे मूर्च्छाया इव स्वर्गादिसुखलोपेऽपि समीहितत्वस्यानुपपत्तेः ।

एतेन प्रकृतिपुरुषविवेकज्ञानात् पुरुषस्य स्वरूपावस्थानं मोक्ष इत्यपास्तम् ; आनन्दादिव्यतिरेकसम्भवेनापुरुषार्थत्वस्य तादवस्थ्यात् । अस्तु तर्हि प्रपञ्चविलयो मोक्षः । मैवम् ; अलोप्यत्वात् प्रपञ्चस्य । न च तस्याविद्यानिमित्तत्वात् सति विद्योदये सम्भवत्येव तद्विलय इति वाच्यम् ; अविद्यामयत्वस्याप्रामाणिकत्वात् ।

यत्पुनः "यत्र त्वस्य सर्वमात्मैवाभूद्" इत्यादि मुक्तावात्मनोऽद्वितीयत्ववचनम्, तत् प्रमाणान्तरविरुद्धार्थत्वेन भोग्यभोगायतनभोगसाधनादिरूपप्रपञ्चसम्बन्धाभावपरमिति निश्चेतव्यम् । एतेन "यत्र त्वस्य सर्वमात्मैवाभी[4]त् तत् केन किं पश्येद्" इति व्याख्यातम् । नास्य कश्चित् सम्बन्ध्यस्ति अयमेव सर्वमिति लौकिकवदात्मनस्सबन्ध्यन्तरनिषेधपरत्वात् । प्रतिपादितश्चाविद्यायास्तन्निवृत्तेश्चाप्रामाणिकत्वमधस्ताद् इति नेह पुनर्विपञ्च्यते ।

---

१. दुःखभाव. क. २. दुःखभावे. क. ३. अथ स्वर्गादि. ग. ४. न कं. ग. ङ.

कथं संसारावस्थायामविद्यमानस्यानन्दस्य मुक्तावविर्भाव इति चेन्न; संसारावस्थायामपि विद्यमानत्वात्। कुतस्तर्हि विद्यमानः संसारावस्थायां नानुभूयत इति चेद् अनुभवहेतोरभावादिति ब्रूमः। कः पुनरनुभवहेतुः?[1] आत्यन्तिकदेहेन्द्रियादिसम्बन्धपरिध्वंससमधीचीनं मन एव। किं पुनरत्र प्रमाणम्? "आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यत"[2] इति श्रुतिरेव। न च "अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशत" इति श्रुतिरत्र बाधिका, अस्या वैषयिकसुखदुःखनिषेधपरत्वेनाप्युपपत्तेः। सामान्यविषयस्य विशेषविषयत्वेन सङ्कोचेऽपि श्रुतहान्यश्रुतकल्पनयोरभावात्। आनन्दश्रुतेस्तु दुःखाभावपरत्वे तयोरनिवार्यत्वात्। यत् पुनरसुखं तत् क्षणिकमिति व्याप्तेर्नित्यानन्दाभ्युपगमः प्रमाणबाधित इति चेन्नैवम्; तादृशव्याप्तेस्संसार्यनुभाव्यसुखविषयत्वात्। न च यत् सुखं तत् संसार्यनुभाव्यमिति वाच्यम्।

"आनन्दं ब्रह्मणो विद्वान् तच्च मोक्षेऽभिव्यज्यते"[3]

इति श्रुतिविरोधात्।

"अमनोऽपाण्यपादम्" इति वचनेन मुक्तस्यामनस्त्वप्रतिपादनात्[4] कथं नित्यानन्दानुभव इति चेन्न; मुक्तस्य संसारमूलप्रवृत्त्यसम्भवप्रदर्शनाय प्रवृत्तिसाधनत्वेन मनःपाणिपादानामभावप्रतिपादनपरत्वात्तस्य। "विज्ञातारमरे केन विजानीयाद्"[5] इति वचनस्यापि सांसारिकसुखदुःखाधि-

---

१. न इत्येव. ङ. २. त एवमिति श्रुतिरेव. ग. ३. इति विरोधात्. घ.
४. सभूतप्रवृत्त्या. ग. ङ. ५. मन्तरेण केन. ङ.

करणविज्ञातृगोचरज्ञानसाधननिषेधपरत्वात् । अन्यथा साधनान्तराभावेन मुक्तावानन्दाभिव्यक्तिश्रुतेरत्यन्तबाधप्रसङ्गात् । न हि ज्ञातुर्ज्ञातेर्विपरिलोपो विद्यत इति मुक्तस्य ज्ञानसत्त्ववेदनश्रुतेर्ज्ञानशक्तिगोचरतया व्याख्यानेन स्वारस्यभङ्गप्रसङ्गाच्च । तस्मान्निषिद्धकाम्यकर्मभ्यां परावृत्तस्य नित्यनैमित्तिकानुष्ठानेन शमदमब्रह्मचर्याङ्गकात्मज्ञानेन भोगेन च निरस्तसमस्तसंसारबन्धस्य मुक्तौ नित्यनिरतिशयानन्दानुभवो भवतीति सिद्धम् । तदुक्तं—

निजं यत्त्वात्मचैतन्यमानन्दोऽध्यक्ष्यते च यः ।
यच्च नित्यविभुत्वादि तेनात्मा नैव मोक्ष्यते ॥

इति ।

कथं पुनरस्य नित्यत्वविभुत्वे ? नित्यत्वन्तावद् "अविनाशी वा अरेऽयमात्मा" इति श्रुतेरम्बरादिवदनवयवद्रव्यत्वाच्चेति द्रष्टव्यम् । विभुत्वं पुनरपर्यायेण चरणशिरसोः कण्टकविद्धस्य युगपदुभयत्र वेदनानुसन्धानानुपपत्तेरणुत्वे निरस्ते मध्यमपरिमाणत्वे च कार्यत्वेनानित्यताप्रसङ्गात् परिशेषप्रमाणसिद्धमिति सर्वमवदातम् ॥

इति चिदानन्दपण्डितकृतौ नीतितत्त्वाविर्भावे आत्मवादो द्विचत्वारिंशवादः

समाप्तः ।

---

१. हि जातु जातेर्वि. ङ. २. क्तौ निरतिशयानन्दानुभवो. ग. ३. यथात्म. क. ४. क्षते ततः. क. ग. ङ. ५. त्यविभुत्वे. घ. ६. रमरादिवदनवयव. ङ.

[अन्विताभिधानवादः।]

पदानामन्विते शक्तिर्वाक्यार्थप्रतिपत्तये।
यैरकल्प्यत निर्मूला तान्निरासे यतामहे॥

अत्र हि प्राभाकरा वाक्यार्थप्रत्ययस्य कार्यस्य पदानामन्विते सामर्थ्यमन्तरेणानुपपत्तेस्तत् कल्प्यमित्याहुः। तथा हि — न तावद्वाक्यस्फोटाद्वाक्यार्थप्रत्ययः; तस्य पदस्फोटनिरासेन तुल्यन्यायतया निरस्तत्वात्। नापि श्रूयमाणा वर्णावली वाक्यार्थधीहेतुः; संसर्गरूपस्य वाक्यार्थस्य संसर्गिषु पदार्थेष्वप्रतिपन्नेषु प्रतिपत्तुमशक्यतया पदार्थस्मृत्यनपेक्षायास्तस्या हेतुत्वानुपपत्तेः। तदपेक्षाया वा हेतुत्वे तद्व्यवहितत्वेन श्रूयमाणताभङ्गप्रसङ्गात्। न च पदार्थस्मृतिनिरपेक्षा वर्णमालैव स्मृतिसमारूढा वाक्यार्थधीहेतुः; दीर्घतमेषु वाक्येषु वर्णावलीविस्मरणेऽपि पदार्थस्मृतिभिरेव वाक्यार्थधीदर्शनात्ताभिरेवोपपत्तौ वर्णमालाया अपि तद्धेतुत्वकल्पनस्य निर्मूलत्वाच्च। भवतु तर्हि वाक्यार्थप्रत्ययं प्रति पदार्थस्मृतय एव हेतुरिति चेत् तदयुक्तं; व्युत्पत्तिविरोधात्। तथा हि — गामानयेति प्रयोजकवृद्धवाक्यश्रवणादानयनान्वितगोविषयां प्रयोज्यवृद्धचेष्टां दृष्ट्वान्वितविषयामेव धियं तत्कारणत्वेनानुमाय तस्याश्चान्वयव्यतिरेकाभ्यां शब्दहेतुत्व-

---

१. द्वाक्यार्थस्फोटाद्- ङ. २. क्षया वा. ग. ३. रूढवाक्यार्थ. ग. ४. हेतव इति- ङ.

मवधारयन् पार्श्वस्थो व्युत्पित्सुः[1] पदानां अन्विते शक्तिं निश्चिनोति। न चैवं अन्वितानन्त्यात् व्युत्पत्त्यसम्भवः; तदानन्त्येऽप्याकाङ्क्षादित्रयोपलक्षिते व्युत्पत्तिसम्भवात् केवलाभिधानपूर्वकान्विताभिधाने द्विरभिधानप्रसङ्गात् अश्रुतान्विताभिधाने पदान्तरवैयर्थ्यात् श्रुतान्विताभिधाने परस्पराश्रयापत्तेर्नान्विताभिधानमिति चेन्नैवम्; स्मारितनिमित्तार्थानामेव पदानामन्विताभिधानस्वीकारात्। किञ्च यदि पदार्थाः वाक्यार्थप्रत्ययमादध्युः ततो मानान्तरप्रतिपन्नेभ्योऽपि तेभ्यो वाक्यार्थप्रत्ययः स्यात्। नन्वस्त्येव मानान्तरप्रतिपन्नेभ्योऽपि वाक्यार्थप्रत्ययः। यथोक्तं—

पश्यतः श्वेतमारूपं हेषाशब्दञ्च शृण्वतः।
खुरनिक्षेप[2]शब्दञ्च श्वेतोऽश्वो धावतीति धीः॥

इति।

तदयुक्तम्; अमुष्य प्रत्ययस्य खुरहेषितरवयोः श्वेतसामानाधिकरण्येन[3] प्रतिपत्तावनुमानार्थापत्त्योरन्तर्भावादप्रतिपत्तौ वानुपपत्तेः। एवं हस्तसंज्ञादिभ्यो विशिष्टप्रत्ययो व्याख्येयः। तस्माच्छब्दप्रतिपन्नानामेव पदार्थानां[4] वाक्यार्थप्रत्ययजननसामर्थ्यात् पदार्थानां वाक्यार्थप्रत्ययजननसामर्थ्यं[5] पदानां तत्सामर्थ्याधानसामार्थ्यमित्यभिहितान्वये शक्तिद्वयं कल्प्यम्। अन्विताभिधाने तु शक्तिरेकैवान्वितगोचरा कल्प्येति। न चान्विते शक्तिकल्पनेऽप्यन्वयमन्तरेणापि तस्याप्रतिपत्तेरन्वये[6]ऽपि शक्तिः

---

१. त्सुः शब्दानामन्विते. ङ. २. निष्पेष. क. ङ. ३. त्पत्तेः. क. ४. दानां. घ. ५. र्थाभिधानसामर्थ्यं. घ. ६. ये शक्तिः. घ.

कल्प्येति वाच्यम् ; विशिष्टगोचरत्वाच्छक्तेर्विशिष्टस्य विशेषणमन्तर्भाव्यैव भावात्। ननु विशिष्टज्ञानस्य विशेषणज्ञानमूलत्वात्[1] प्रथमं विशेषणज्ञानेन भाव्यम्। न[2] च पदेभ्योऽन्यद्विशेषणभूतस्यान्वयस्य प्रत्यायकं किञ्चिदस्तीति पदानां प्रथममन्वयप्रतिपादने शक्तिः पश्चादन्वितप्रतिपादनशक्तिरिति शक्तिद्वयं कल्प्यम्। मैवम्; यथा जातिमात्रगोचरयैव पदशक्त्या जायमानाया जातिप्रतिपत्तेरपर्यवसानाद् भवन्ती व्यक्तिप्रतिपत्तिर्न[3] पदसामर्थ्यमात्मनि कल्पयति, न च पृथगवगममपेक्षते तथान्वितगोचरयापि पदशक्त्यान्वयसिद्धिर्भवन्ती नात्मनि पदसामर्थ्यं कल्पयति, न च पृथगवगममपेक्षते इति। अतः पदानामेव प्राथम्यादभिधातृत्वात् तात्पर्योपगमाच्चान्वितप्रत्यायनसामर्थ्यमिति सिद्धम्।

अत्रोच्यते—

अन्विते गौरवाच्छक्तेरन्वयस्यान्यतो गतेः[4]।
पदार्थैरेव तत्सिद्धेर्नान्विते शक्तिमत् पदम्॥

सर्वं हि कार्यं कारणं परिकल्पयत् सति सम्भवे लाघवपक्षपातेनैव कल्पयतीत्यविवादम्। तथा च कार्यभूता वाक्यार्थप्रतिपत्तिरपि पदहेतुत्वे गौरवान्न पदसामर्थ्यमात्मनि कल्पयति। कथं पदहेतुत्वे गौरवम्? श्रूयताम्—यत्र खल्वेकस्मिन्नर्थे बहवश्शब्दाः, यथा घटकरीरकुम्भकलशाः तत्रानयनान्वितघटप्रतिपत्तौ पदवादिनः प्रतिपर्यायं शक्त्यन्तर-

---

१. त् पूर्वं विशेष. क. २. न पदे. क. ध. ङ. ३. र्न सामर्थ्यमात्मनि. घ. ४. गतौ. ग.

कल्पनाद्गौरवम्। पदार्थवादिनस्तु प्रतिवाक्यं वाचकभेदेऽप्यर्थस्य तत्त्वेन शक्तिरेकैव कल्प्येति लाघवम्। नचैवं पदार्थवादिनोऽपि यत्रानेका अर्था एकस्य पदस्य वाच्याः, यथा विभीतकादित्रयमक्षशब्दस्य, तत्र गौरवमिति वाच्यम्; अन्वितस्य शक्यत्वात्तद्भेदे शक्तिभेदस्य पदवादिनोऽप्य-
१
वश्याङ्गीकरणीयत्वात्। न च पदवादिन इतरान्वितस्वार्थाभिधाने पदानां शक्तिरिति स्वीकारादक्षशब्दस्य विदेवनादित्रयमपि स्वार्थ एवेति शक्त्यन्तरमन्तरेणापि इतरान्विततत्तदर्थाभिधानं युज्यत इति वाच्यम्; परस्परविलक्षणविदेवनादिविशेषान्वितभेदप्रत्ययस्य शक्तिभेदमन्तरेणानुपपत्तेः, कार्यान्तरभेदस्य शक्त्यन्तरभेदनिबन्धनत्वात्। अन्यथा दहनस्यापि स्वोत्पाद्यनिखिलकार्यानुगुणत्वेन शक्तिरेकैव कल्प्येति दाहपाकादिकार्यभेदानुगुणत्वेन शक्तिभेदो न सिध्येत्। अतः पदार्थवादिनः
२
पदवादिनश्च यत्रैकस्यानेकार्था वाच्यास्तत्र शक्तिकल्पनं समानमेव। यत्र पुनरेकस्यार्थस्य बहूनि पदानि वाचकानि तत्र पदवादिनो गौरवं प्रागेव दर्शितमिति स्थितमेव गौरवम्।

किञ्च यदि पदानामन्वितगोचरा शक्तिरेकैवाभ्युपगम्यते ततोऽन्वितविशेषणस्यान्वयस्य प्रत्यायकाभावात्तदनवगतौ तदवगतिमूलमन्वितज्ञानमेव न स्यात्। न ह्यस्ति सम्भवः प्रथमानवगतविशेषणो विशिष्टं प्रत्येतीति।

यत् पुनर्यथा
३
जातिमात्रगोचरयैवेत्यादि, तत्र वदामः—न हि जातिमात्रगोचरया पदशक्त्या जायमानायां जातिप्रतिपत्तौ व्यक्तेः

---

१. इतरेतरान्वित. ग. २. नेकेऽर्थाः. ग. ३. था कारणादिमात्रगोचरयैवेत्यादि, तत्र वदामः— ङ.

विषयभावोऽस्ति ; पदशक्तेरतद्विषयत्वेन तदवगतिहेतोरभावात्। न च प्रतीयमानजात्यपर्यवसानादवगतिरिति वाच्यम्; अपर्यवसानार्थस्यानिरूपणात्। किं खल्वपर्यवसानं नाम ? किमनुपपत्तिभेदः, किं वा व्याप्तिभेदः, यद्वार्थान्तरम् ? न तावत्तृतीयः कल्पः; तस्याप्रसिद्धत्वात्। नापि प्रथमद्वितीयौ; अनवगतयोरनुपपद्यमानव्याप्तयोरनवगमैकत्वेन प्रथमतो जातिमात्रप्रत्ययस्यावश्यकत्वात्। अतः प्रतिपन्नैव जातिरनुपपत्त्या व्याप्त्या वा व्यक्तिमावेदयतीति न जातिव्यक्त्योरेकप्रतिपत्तिविषयभावः। तथा चैं तदृष्टान्तेनापि नान्वितान्वययोरेकप्रतिपत्तिविषयभावस्सिध्येत्। एतेन न रूपिशून्या रूपबुद्धिरित्यपास्तम्; चक्षुरादेरिव रूपरूपिणोरुभयत्रापि पदस्य शक्त्यनङ्गीकारे रूपप्रतिपत्तिमन्तरेण कारणाभावेन रूपिबुद्ध्यनुत्पत्तेरेवोपपादितत्वात्। किञ्च भवतु वा पदैरप्यन्तर्भावितरूपिण एव रूपस्य प्रत्ययः, तथापि नान्तर्भावितान्वयस्यान्वितप्रत्ययस्य संभवः। तथा हि—किमिदमन्वितमन्वयविशिष्टमन्वयोपलक्षितं वोच्यते? न तावदन्वयविशिष्टं ; तथा सति विशेषणानवगतौ विशिष्टबुद्ध्यनुत्पत्तेरन्यस्य च तदवगतिहेतोरभावाद्विशेषणे विशिष्टे च पदस्यैव शक्तिरिति शक्तिद्वयप्रसङ्गात्। नाप्यन्वयोपलक्षितं स्वरूपमात्रम्; तस्यान्तर्भावितान्वयत्वेनैव प्रतीतिविषयत्वानुपपत्तेः। न हि यथा जातिर्व्यक्तिमन्तरेण दुरधिगमा एवं पदार्थस्वरूपमप्यन्वयमन्तरेण दुरधिगमं, येन जातिविज्ञौ

---

१. नाजात्यवगतिरिति. ग. २. अवगतयोः. घ. ३. मत्वेन. ग ४. च दृष्टान्तेनापि. ग. ङ. ५. रूपबु. घ. ६. तत्स्वरूप. क. ७. तिविप्रतिपत्तौ. घ.

व्यक्तेरिव पदार्थस्वरूपेवित्तावन्वयस्यानुप्रवेशो भवेत्। अन्तरेणाप्यन्वयं पदार्थस्य स्वरूपेणावगम्यमानत्वात्। अतोऽन्वयस्यान्यतः प्रत्येतुमशक्यत्वाद् अन्वयान्वितयोः पदस्यैव प्रत्यायनशक्तौ कल्प्यायां गौरवमिति सिद्धम्।

अपि च पदवादिनोऽपि न पदान्येव पदार्थस्मृतीरनपेक्ष्य वाक्यार्थप्रत्ययमाहत्यार्दधति ; श्रुतव्युत्पन्नपदस्यापि प्रमुषितसंस्कारतया पदार्थस्मृतिविधुरस्य वाक्यार्थाबोधात्। पदार्थानामन्योन्यान्वययोग्यत्वावगमस्य वाक्यार्थज्ञानसामग्र्यन्तर्निविष्टत्वाच्च। तथा च पदाहितस्मृतीनां पदार्थानामप्यनन्यथासिद्धान्वयव्यतिरेकितया वाक्यार्थबोधहेतुत्वे कल्प्ये तत एवं तदुपपत्तेरर्थापत्तिपरीक्षायां पदानामन्विते सामर्थ्यं कल्प्यम्।

यत्पुनः प्रमाणान्तरप्रतिपन्नेभ्यः पदार्थेभ्यो वाक्यार्थप्रत्ययादर्शनात् पदार्थानां वाक्यार्थप्रत्ययजननसामर्थ्यं पदानां तत्सामर्थ्याधानसामर्थ्यमिति शक्तिद्वयं कल्प्यमिति, तन्मन्दम् ; पदार्थेषु सामर्थ्याधानसामर्थ्यस्य पदाश्रयत्वेनानभ्युपगमात्। न च प्रमाणान्तरप्रतिपन्नेभ्यो वाक्यार्थबोधोदयः स्यादिति वाच्यम् ; यतो न सन्निधिमात्रं वाक्यार्थज्ञानसामग्री किन्तु शब्दसन्निधिः, स च प्रमाणान्तरप्रतिपन्नेषु नास्तीति तत्र वाक्यार्थज्ञानाभावः सहकारिभूतसन्निधिवैधुर्यप्रयुक्त एव। न च द्वारमिति शब्दसन्निध्यभावेऽप्यावरणाद्यन्वयो दृष्ट इति वाच्यम् ; तत्रापि कल्पितशब्दसन्निहितस्यैवावरणादेर्वाक्यार्थान्वयित्वात्। अत

---

१. पव्यक्ता. ग. २. णान्वयं. घ. ३. र्थस्वरूपेण. क. ४. त्याभिदधाति. ग. त्यादधाति. घ. ५. र्थाबाधात्. ङ. ६. वार्थापत्ति. ग. ङ. ७. नां तत्सामर्थ्यमिति. क. नां तत्सामर्थ्याभिधानसामर्थ्यमिति. घ. ८. नाभ्युपगमात्. घ. ९. वधारणादेर्वाक्यार्थान्वयित्वात्. क.

एव शब्दैकगोचरतया श्रुतार्थापत्तेर्भेदः । न च द्वारमित्यत्र द्वारार्थस्य प्रतिसम्बन्ध्यर्थान्तरमन्तरेणानुपपत्तेः तत् कल्प्यं न तच्छब्द इति न तत्र शब्दसन्निधिरङ्गमिति शङ्कनीयम् ; अशाब्दस्यापि शाब्देनान्वये[1] गामानयेत्यत्र प्रत्यक्षसन्निहितेनाश्वेनाप्यानयनान्वयप्रसङ्गात् । न चानयनं प्रति गवाश्वयोस्सन्निधियोग्यतातुल्यत्वेऽपि प्रत्यक्षस्याश्वस्य क्रियापेक्षा-वैधुर्याच्छब्दस्य च गोस्तद्भावात् गौरेवानयनान्वयं प्रतिपद्यत इति वाच्यम्; अश्वस्यानयनानपेक्षत्वेऽप्यानयनस्य कारकमात्रापेक्षत्वेनाश्वं प्रत्यपेक्षा-[2]सम्भवात् । न च परस्परसाकाङ्क्षयोरेवान्वयान्नानयनाश्वयोरन्वय इति वाच्यम् ; खुररवहेषिताभ्यामनुमितस्याश्वस्य किमयं गच्छति तिष्ठति वेति क्रियापेक्षायां देवदत्तो गच्छतीत्युक्ते कारकमात्रापेक्षस्य गच्छतेरश्वस्य च मिथोऽन्वयप्रसङ्गात् । न च देवदत्तस्य साकाङ्क्षत्वात् गच्छतिर्नाश्वान्वयं प्रतिपद्यत इति वाच्यम् ; अश्वस्यापि साकाङ्क्षत्वादेवदत्तेनाप्यनन्वय-प्रसङ्गात् । यावन्ति पदानि श्रुतानि तावतां सम्भूयकारित्वव्युत्पत्त्या गच्छतेर्देवदत्तेनैवान्वयो नाश्वेनेति चेन्नैवम् ; देवदत्तो गौरनुधावतीत्यादा-वनैकान्तिकत्वात् । ननु सति सम्भव इति विशेषणान्नायं दोषः । यद्येवं कोऽयं सम्भवो नाम ? आकाङ्क्षासन्निधियोग्यत्वानामविरोध एव सम्भवः । स च देवदत्तो गौरनुधावतीत्यादौ देवदत्तेनान्वये गोराकाङ्क्षा-[3]निरोधाद्गवान्वये देवदत्तस्याकाङ्क्षानिरोधान्न सम्भवतीति न तत्र सम्भूयकारित्वमिति चेत्तर्हि खुरहेषितरवानुमिताश्वस्य जिज्ञासिततत्त-

---

१. येन गामान· ग॰ ङ· २. क्षास्वभावात· क· ३. ङ्क्षाविरोधान्न· ग· ङ॰

क्रियस्य गौस्तिष्ठतीत्युक्ते तिष्ठतेर्गवान्वयेऽश्वस्याकाङ्क्षानिरोधाद् अश्वेनान्वये गोराकाङ्क्षानिरोधात्तिष्ठतिगवोस्सम्भूयकारित्वं भज्येत।

अथ शब्दप्रतिपन्नस्याकाङ्क्षानिरोधः संहत्यकारित्वप्रतिबन्धेन वाक्यार्थप्रत्ययपरिपन्थी, न प्रमाणान्तरप्रतिपन्नस्य। यद्येवं शब्दप्रतिपन्नस्याकाङ्क्षैव संहत्यकारित्वानुकूलतया वाक्यार्थप्रत्ययहेतुः न प्रमाणान्तरप्रतिपन्नस्य; मूलनिरोधस्यैव मूलिनिरोधहेतुत्वादतन्मूलस्य तन्निरोधे निरोधानुपपत्तेः। तथा चाश्वस्य गत्यनन्वयश्शब्दप्रतिपन्नत्वाभावनिबन्धन एव।

स्यादेतत्—नैवमादेरशाब्दत्वादनन्वयः, किन्तु[1] शब्दस्यातत्परत्वात्। यत्र[2] तु शब्दस्य तात्पर्यं तस्य प्रमाणान्तरप्रतिपन्नस्यान्वय एव यथा द्वारमित्यत्रेति। तदयुक्तम्। एवं हि वदता शाब्दत्वमशाब्दत्वं च नान्वयानन्वययोरुपाधिः शब्दस्य तत्परत्वमतत्परत्वञ्चेत्युक्तं स्यात्। नचैतद्युक्तम्; तस्य साधनव्यापकत्वेन उपाधित्वानुपपत्तेः। न हि शब्दतात्पर्यमपि शब्दप्रतिपन्नेभ्योऽन्यत्र दृष्टचरं; तात्पर्यस्य शब्दप्रतिपन्नेष्वेव[3] सम्भव इति नियमात्। अतस्तन्निबन्धनोऽप्यन्वयश्शाब्दयोरेव न शाब्दाशाब्दयोरिति व्यवस्थितम्।

एतेन श्रुतशब्दप्रतिपन्नस्य अश्रुतशब्दप्रतिपन्नैनैवान्वय इत्यतिप्रसङ्गापादनमपि परस्य परिहर्तव्यम्; द्वारमित्यादौ श्रुतशब्दप्रतिपन्नस्य प्रतिसम्बन्धिनोऽर्थान्तरस्य प्रमाणविरुद्धत्वात्। अतस्सिद्धमेतत् न सन्निधिमात्रं

---

१. स्यार्थतत्परत्वात्- ग- २. तत्र तु- क- ३. त्। तन्नि- ग-

वाक्यार्थज्ञानसामग्री किन्तु शब्दसन्निधिरिति । तथा च प्रमाणान्तर-प्रतिपन्नेभ्यो वाक्यार्थप्रत्ययानुदयस्य सामग्र्येकदेशभूतसन्निधिविशेषाभाव-प्रयुक्तत्वान्न पदानां सामर्थ्याधानसामर्थ्यं कल्प्यम् ।

एवं तावत्पदवादिनः पदार्थवादिनश्च शक्तिकल्पनायां गौरवलाघवे प्रतिपादिते । भवतु वा तुल्यत्वं तथापि पदार्थानामेव वाक्यार्थप्रत्ययहेतुत्वं युक्तम् ; अव्यवहितत्वादन्यत्रानुपक्षीणत्वाच्च । नहि ज्वलनमिव काष्ठानां पदार्थस्मृतिः पदानां न व्यवधिमापादयति । न च ज्वलनानुगुण-शक्तिव्यतिरेकेण काष्ठानां पाकानुगुणत्वशक्तिः कल्प्या । तयैव ज्वलनव्यवधानेन पाकसिद्धौ शक्त्यन्तरकल्पनायां प्रमाणाभावात् । एवञ्च पदानामपि पदार्थस्मृत्यनुगुणयैव शक्त्या तद्व्यवधानेन वाक्यार्थ-प्रत्ययलाभान्न शक्त्यन्तरं कल्प्यम् । पदार्थस्मृतयस्तु न व्यवहिता नाप्यन्यत्रोपक्षीणा इति तासामेव पाक इव ज्वलनस्य सामर्थ्यं कल्प्यम् । एवञ्च प्राथम्यं विरुद्धमेव । तात्पर्यन्तु काष्ठेषु व्यभिचारादनैकान्तिकम् । अभिधातृत्वन्तु पदानां स्मारकत्वादसिद्धमेव । तत्सिद्धमेतच्छक्तिकल्पना-तुल्यत्वेऽपि पदार्थानामेव सा युक्ता न पदानामिति ।

किञ्च न पदार्थानां सामर्थ्यमपूर्वं कल्प्यम् । यतः

तत्परेभ्यः पदेभ्योऽर्थाः प्रतिपन्ना मिथोऽन्वयम् ।
विना न पर्यवस्यन्ति तेन तं लक्षयन्ति ते ॥

---

१. तुल्यं तथापि. घ. २. नस्य व्यवधानेऽनु पाकसिद्धौ. ग. ३. चारान्नैकान्तिकम्. ग. ङ. ४. मेव तच्छक्ति. ग. ङ. ५. यतः परेभ्यः. ग. ङ.

व्यतिषङ्गावस्थापरैः[1] पदैः प्रतिपन्नाः पदार्थाः तामन्तरेणापर्यवस्यन्तस्तां लक्षयन्ति। न च वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तिविरहान्न लक्षणेति वाच्यम्; छत्रिणो गच्छन्तीत्यत्र व्यभिचारात्। एतेन लोकप्रसिद्धलक्षणाप्रकारवैलक्षण्येन लक्षणाश्रयणं गौरवायेत्यपास्तम्; यतोऽस्मदाश्रितलक्षणालक्षणं लोकप्रसिद्धामपि लक्षणां[2] व्याप्नोति। तदव्याप्तौ हि विधाद्वयाङ्गीकरणाद् गौरवम्। न च तदस्ति। भवत एव त्वस्मदुक्तेन[3] व्यापिनाल्पीयसापि लक्षणाबीजेन लोकप्रसिद्धाया[4] अपि लक्षणायास्सिद्धौ तदतिरिक्तस्य तद्बीजत्वकल्पनं गौरवमापादयति। कथं पुनः क्रियामात्रस्य कारकमात्रम्[5]? क्रियामात्रमन्तरेणापर्यवसितस्य तद्विशेषान्वयलक्षणत्वं[6] तत्प्रतिपादकयोः पदयोरेकविशिष्टार्थप्रतीतिपरत्वावगमात् तदविरोधाय तयोरेव परस्परान्वयनियमादिति ब्रूमः। अत एव पदार्थहेतोरपि वाक्यार्थस्य शाब्दत्वम्; अन्वयविशेषलाभस्य पदानामेकविशिष्टार्थबोधतात्पर्यात्मकैकवाक्यत्वनिबन्धनत्वात्। अयमेव शाब्दस्यानुमानार्थापत्तिभ्यां भेदोऽपि। तयोस्तत्तद्विशेषप्रतिबद्धया व्याप्त्यानुपपत्त्या[9] वा तत्तद्विशेषसिद्धिः। न सामान्यतो व्याप्तिमात्रेणानुपपत्तिमात्रेण वा। प्रकृते पुनरेकवाक्यत्वसनाथया सामान्यव्याप्त्यैव विशेषव्याप्तिमन्तरेण विशेषसिद्धिरिति। एवन्तावदेकवाक्यार्थप्रतिपत्तिपरेभ्यः[10] पदेभ्यः प्रतिपन्नाः पदार्था एव वाक्यार्थं लक्षयन्ति। तदन्विते साक्षात् सामर्थ्यमन्तरेण पदार्थस्मृतिव्यवधानेनापि[11] पदहेतुत्वस्य निरूढत्वान्न तद्विरुद्धम्। न च साक्षात् सामर्थ्यविधुरस्य न हेतुत्वमपीति[12]

---

१. ङ्गाव्यवस्थापरैः. घ. २. क्षणं व्याप्नोति. ङ. ३. त्वदुक्तेन. ङ. ४. सा लक्षणाबीजेन. क. घ. ५. कसिद्धाया अपि. क. ६. त्रस्य क्रियामात्र. क. ७. त्वमतत्प्रति. ग. ङ. ८. बद्धव्याप्त्या. घ. ९. द्धिः। सामान्यतो. ग. ङ. १०. क्यपरेभ्यः क. क्यार्थपरेभ्यः ग. ङ. ११. नोऽपि. घ. १२. त्वमिति. क.

वाच्यम्[1]; आग्नेयादीनामवान्तरापूर्वतत्साधनशक्तिभ्यां विलक्षणयोश्शक्य-शक्त्योरभावेऽप्यधिकारापूर्वं[2] प्रति करणत्वाङ्गीकारात्, ज्योतिष्टोमस्य परमापूर्वतत्साधनशक्तिभ्यां भिन्नयोश्शक्यशक्त्योरभावेऽपि[3] स्वर्गं प्रति करणत्वाभ्युपगमात्[4] लोकेऽपि हि काष्ठानां ज्वलनतत्साधनशक्ति-व्यतिरेकेण शक्यशक्त्योरभावेऽपि पाकहेतुत्वाभ्युपगमाच्च यतो न दोषगन्धमप्यावहति ।

किञ्च ।

अन्वितस्यैव शक्यत्वे भवेद्वाक्यस्य शक्तता ।
औचित्याल्लाघवादैक्यात् क्वचिदप्यनुपक्षयात् ॥

यदि हि व्युत्पत्तिसमयसिद्धप्रथमावगमानुरोधादन्वितस्यैव[6] शक्यत्वं[7] तदविरोधाद्वाक्यस्यैव शक्तत्वमपि[8] । व्युत्पित्सुर्हि प्रयोज्यवृद्धस्य चेष्ट-मानस्यान्वितधियमनुमाय तत्र पदानां हेतुत्वमवधारयन् प्रथमतोऽनधि-गतपदावधित्वान्न तत्र पदशक्तिमनुविधत्ते किन्तु तावतो वर्णसमुदायस्यैव। तथा च यथा तादृशप्रथमावगमानुरोधेनान्वितस्यैव शक्यत्वं स्वरूपस्य तु निष्कृष्टस्य स्मार्यत्वमित्यभ्युपगतमेव । तेनैव नयेन वर्णसमुदाय-स्यैवान्विताभिधानशक्तत्वं पदस्य तु निष्कृष्टस्य स्वरूपमात्रस्मारकत्व-

---

१. शक्त्यशक्त्योर. ग. ङ. २. कापूर्वं प्रति. ङ. ३. शक्त्यशक्त्योर. ग. ङ.
४. तु पाकेऽपि काष्ठानां. ग. ङ. ५. शक्यता. ग. ङ. ६. मादनुरोधाद. ग. ङ.
७. दन्वयस्यैव. ग. घ. ङ. ८. शक्यत्वमपि. ग. ङ. ९. त्सुभिः प्रयोज्य. ग. ङ.

मित्यभ्युपगन्तव्यम्[1]। आवापोद्वापाभ्यामपि सर्वत्रानुयायिनोः पदतदर्थयोः स्मार्यस्मारकभावेन[2] निष्कर्षमात्रं[3] विधेयम्। एवञ्च पदमात्रं स्वरूपमात्रस्य स्मारकं स्वरूपातिरिक्तस्य तदन्वितस्य पदातिरिक्तं वाक्यमभिधायक-मित्यौचित्यं[4] त्यात्। तथानेकेषां पदानामेकत्रान्विते शक्तिकल्पनादेकस्य वाक्यस्यैव वाचकत्वकल्पनं लघुतरञ्च स्यात्। तथान्वितस्य वाक्याभिधेयत्वे तस्यैकत्वान्नान्वयतत्प्रत्ययावृत्तिप्रसङ्गः। पदाभिधेयत्वे तु तेषामनेकत्वात् प्रतिपदं[5] सोऽपि स्यात्। पदानां पदार्थस्मृताविव वाक्यस्य न क्वचिदुपक्षय इत्यनुपक्षीणस्य तस्यैवान्वितबोधहेतुत्वं युक्ततरञ्च भवेत्। अतोऽस्मदु-पदर्शित एव पन्था निरवद्य इत्यास्तान्तावत्।

इति चिदानन्दपण्डितकृतौ नीतितत्त्वाविर्भावे अन्विताभिधानवादः

त्रिचत्वारिंशः समाप्तः।

---

१. नुविधायिनोः. ग. २. निष्कृष्टमात्रं. ग. ३. त्रस्मारकं, घ. ४. स्वैकय वाक्यस्य. ग. ५. पदतापि स्यात्. क.

[वेदापौरुषेयवादः।]

वेदानां पौरुषेयत्वे भवेत्पुरुषदोषतः।
तदप्रामाण्यशङ्केति तन्निरासे यतामहे॥

वेदवाक्यानि पौरुषेयाणि वाक्यत्वाद् यदुक्तसाधनं तदुक्तसाध्यं, उक्तसाधनानि च वेदवाक्यानि अत उक्तसाध्यानीति। पौरुषेयत्वञ्च स्वतन्त्रपुरुषपूर्वकत्वमभिमतम्। अतः क्रमवन्तो वर्णाः पदं, क्रमवन्ति च पदानि[1] वाक्यम्। क्रमश्च नित्यविभुषु वर्णेषु स्वयमसम्भवन्नुच्चारणक्रमनिबन्धन एव। स च पुरुषप्रयत्नसाध्य एवेति वेदवाक्यान्यपि क्रमवत्त्वेन पुरुषप्रयत्ननिष्पाद्यान्येवेति सिद्धसाध्यत्वं वदतामनवकाश एव। न च वाच्यं—किं साक्षात् परम्परया वा स्वतन्त्रपुरुषपूर्वकत्वं साध्यम्? पूर्वस्मिन्निदानीमुच्चार्यमाणेषु वेदवाक्येषु बाधितविषयत्वं अनुवक्तृप्रणीतास्मदादिवाक्येष्वनैकान्तिकत्वञ्च। उत्तरस्मिन् साक्षात्स्वतन्त्रपुरुषप्रणीतेष्वस्मदीयवाक्येष्वनैकान्तिकत्वमिति; साक्षात्त्वपरम्परात्वयोः परस्परव्यभिचारेऽपि[2] साक्षात् परम्परया वा इत्येकाकारपरिग्रहात्। अन्यथा भारतवाक्यानि[3] यानि कृष्णद्वैपायनेन साक्षात् प्रणीतानि तानि परम्परायायानि तु परम्परया तानि साक्षादित्युभयानुगतपौरुषेयत्वाभावादन्यतरस्यापौरुषेयत्वप्रसङ्गात्। तस्माद्यद्वाक्यं तत् साक्षात् परम्परया वा स्वतन्त्रपुरुषपूर्वकमिति साधयतां क्वचिद् बाधो व्यभिचारश्चेति सिद्धं वेदाः पौरुषेया इति।

---

१. नि च वाक्यम्। क. २. काक्षरपरिग्रहात्। ग. ३. क्यान्यपि यानि. ग. ङ.

तदिदमनुपपन्नम्। तथा हि—वाक्येषु पुरुषस्वातन्त्र्यं वृद्धव्यवहार-समधिगतपदपदार्थसम्बन्धस्य[1] चक्षुरादिजन्यतत्तदर्थविशेषविषयपरस्पर-[2]विलक्षणक्षणिकवेदनस्य शरीरिण एव दृष्टमिति यदि वाक्येषु पुरुषः स्वतन्त्रो भवेद् तादृश एव भवेदिति पुरुषस्वातन्त्र्यं तादृशत्वेनैव व्याप्तम्। अतो वाक्यत्वं स्वतन्त्रपुरुषपूर्वकत्वं साधयत् स्वसाध्यविरुद्धस्येव स्वसाध्यव्यापक-विरुद्धस्यापि स्वविरोधित्वात् स्वसाध्यविरुद्ध[3]स्वतन्त्रपुरुषपूर्वकत्वाभावमिव स्वसाध्यव्यापकतादृशत्वविरुद्धमतादृशत्वमप्यप्रतिक्षिप्य[4] साधयितुमशक्तं योग्यानुपलम्भविरोधात्तादृशत्वमादायापि साधयितुमशक्तं निरुद्धाशेष-विशेषत्वेन[5] स्वतन्त्रपुरुषपूर्वकत्वसामान्यमप्यसाधयदात्मना स्वतन्त्रपुरुष-पूर्वकत्वस्य व्याप्तिमेव विघटयति—नाहं स्वतन्त्रपुरुषपूर्वकत्वेन व्याप्तमिति।

स्यादेतत्—अस्तु तर्हि वृद्धव्यवहारसमधिगतव्युत्पत्तिस्तदर्थानु-गुणलक्षणक्षणिकवेदनश्शरीर्येव कर्त्ता। न च योग्यानुपलम्भबाधोऽपि; निवृत्ते कर्त्तरि योग्यत्वस्यैवाभावादिति। तन्न, बहुवित्तायाससाध्येषु ज्योतिष्टोमादिषु वेद[6]प्रामाण्यमेवोपदिश्य पुंसां प्रवर्तयतां स्वयञ्च[7] तदेवालम्ब्य भूयो भूयः प्रवर्तमानानां त्रैवर्णिकानां पौरुषेयवाक्येषु पुरुषाश्रितनिबन्धनत्वात् प्रामाण्यस्य सत्याप्ते प्रणेतरि तत्स्मरणं प्रामाण्यावगमोपकारित्वेन प्रयोजन-वदेवेति स्मृत्यर्हस्यास्मरणमेव तादृशस्वतन्त्राभावं गमयतीति। न च जैमिनी-यैरस्मरणेऽपि कणादाक्षचरणसतानुसारिभिः स्मरणादस्मरणमसिद्धमिति वाच्यं; तैरपि वृद्धव्यवहारावसेयव्युत्पत्तेस्तदर्थविषयविलक्षणक्षणिक-चक्षुरादिजन्यवेदनस्य मातापितृसम्बन्धप्रसूतपार्थिवशरीरस्य कर्तुर-

---

१. तपदार्थसम्बन्धस्य. ग. ङ. २. तद्विशेषण. ग. ३. द्धत्वं स्वतन्त्र. ग. द्धं स्वतन्त्र. ङ. ४. त्वविरुद्धमप्यप्रतिक्षिप्य. ग. ङ. ५. विषयत्वेन. घ. ६. दवाक्ये प्रामाण्यमेवोपदिश्य. क. ७. यञ्चेदेवालम्ब्य. ग. ङ.

स्मरणात्। तदेवं वेदवाक्येषु यादृशस्य स्वतन्त्रपुरुषस्य ते स्मरन्ति[१] तादृशस्य वाक्यत्वमेव स्वपरिपन्थित्वेन निरोधकं[२] इतरस्य तु प्रयोजनवत्त्वेन स्मृत्यर्हस्य सर्वैरेवास्मरणाद्योग्यस्मृत्यनुदय एव बाधक इति वाक्यत्वं[३] निरुद्धसमस्तविशेषत्वेन स्वतन्त्रपुरुषपूर्वकत्वमात्रमपि साधयितुमसमर्थमिति[४] सिद्धो[५] विशेषविरोधः । यथा विशेषविरोधस्य दूषणत्वं यथा च चक्षुषस्तैजसत्वादौ नातिप्रसङ्गः तथेश्वरानुमान एव समर्थितमिति नेहोच्यते ।

किञ्च सम्भवदस्मदादिप्रमाणान्तरमूलवाक्यत्वमेव प्रमाणवाक्यानां स्वतन्त्रपुरुषप्रणीतत्वे प्रयोजकं[६], न वाक्यत्वमात्रम्। न च साध्यानुप्रविष्टतया वाक्यत्वेनैव तदपि साध्यम्; अनाप्तवाक्येषु व्यभिचारात्। न च प्रमाणवाक्यत्वादिति साध्यं; वेदवाक्यगोचरतया सम्भवदस्मदादिप्रमाणान्तरमूलत्वसाधनस्य बाधितविषयत्वाद् अपसिद्धान्तापत्तेश्च।

स्यादेतत्— सम्भवदस्मदादिप्रमाणान्तरमूलत्वमस्मदादिविशेषणस्यासमर्थत्वाद् अप्रयोजकम्। यत्तु सम्भवत्प्रमाणान्तरमूलत्वमात्रं तत् प्रमाणवाक्यत्वादिति हेतुनैव साध्यानुप्रविष्टतया साध्यमिति, तदयुक्तम्; असमर्थविशेषणत्वादित्यस्यैवासिद्धेरन्योन्याश्रयप्रसङ्गात्, सम्भवत्प्रमाणान्तरमूलत्वमात्रप्रयुक्तिनिश्चयाधीनत्वाद् अस्मदादिविशेषणासामर्थ्यनिश्चयस्य तदधीनत्वाच्च सम्भवत्प्रमाणान्तरमूलत्वमात्रप्रयुक्तिनिश्चयस्य। तथा च सकलसपक्षव्यापितया दृष्टस्य सम्भवदस्मदादिप्रमाणान्तरमूलत्वस्य

---

१. शवाक्यार्थमेव. ग. ङ. २. क इत्यस्य तु. ग, ङ. ३. क्यत्वनिरुद्ध. ग. ङ. ४. मनर्थमिति. ग. ङ. ५. सिद्धे विशेषविरोधः. ग. ङ. ६. जनं, वाक्यमात्रम्. ङ.

प्रमाणवाक्येषु पुरुषस्वातन्त्र्यप्रयोजकत्वं प्रति निश्चयाभावेऽपि सन्देहस्य दुर्वारत्वात्, निश्चितप्रयोजकान्तरस्येव सन्दिग्धप्रयोजकान्तरस्यापि वाक्यत्वस्यागमकत्वमेव।

नन्वष्टकाकर्तव्यत्वादिविषयेषु स्मृतिवाक्येषु पुरुषस्वातन्त्र्यदर्शनेऽपि सम्भवदस्मदादिप्रमाणान्तरमूलत्वस्यादर्शनान्न पुरुषस्वातन्त्र्ये तदुपाधित्वम्। तन्न; तेषामपि वेदमूलत्वेन सम्भवदस्मदादिप्रमाणान्तरमूलत्वात्। न हि प्रमाणान्तरशब्दस्य वेदव्यतिरिक्तपरत्वं; यद्वाक्यं यदर्थे प्रमाणं तद्वाक्यव्यतिरिक्ततदर्थविषयप्रमाणपरत्वाद् वेदवाक्यस्यापि स्मृतिव्यतिरिक्तप्रमाणत्वात्। अतः सम्भवदस्मदादिप्रमाणान्तरमूलत्वं पुरुषस्वातन्त्र्यस्य व्यापकमेवेति तत्प्रयुक्तव्याप्त्युपजीवित्वसन्देहस्य निष्प्रतिबन्धत्वादसाधकमेव वाक्यत्वमिति।

किञ्चात्मत्वं प्रमाणव्यक्तिसमवेतं न भवति जातित्वाद् गोत्ववत्। एवं द्रव्यत्वसत्त्वे अपि पक्षीकृत्य वक्तव्यम्। यथा चात्यन्ताभावप्रतियोगिनोऽन्यत्राप्रसिद्धस्य साध्यविशेषणत्वेऽपि नाप्रसिद्धविशेषणत्वं तथेश्वरानुमान एव समर्थितम्। न च तावेव हेतुदृष्टान्तावाश्रित्य भारतादेरपि नित्यत्वप्रसङ्ग इति वाच्यम्; अविगीतदृढकर्तृस्मृतिबाधितविषयत्वात्। यत्पुनः

"अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिस्सृता"

---

१. त्वादनिश्चयप्रयोजकान्तरस्यैव. ग. ङ. २. रस्यैव वाक्यत्वस्याप्यगम. ग. ङ. रस्य वाक्यस्याप्यगम. घ. ३. व्यादिविषयेषु. घ. ४. द्वाक्यं तदर्थे. ग. ङ. ५. तस्य वाक्यव्यतिरिक्त. घ. ६. क्तस्य व्या. क. ७. क्यमिति. ग. ङ. ८. त्वादेव द्रव्यसत्त्वे अपि. ग. ङ. त्वादेव द्रव्यत्वसत्त्वे. क. ९. थात्यन्ताभाव. घं. १०. ष्टावेतावाश्रित्य. गं. ङ. ११. त्यत्वं साध्यमिति वाच्यम्;. घ. १२. गीतं दृढस्मृति. क.

इति, "ऋग्वेदएवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यात्" "तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे" इत्येवमादयो वेदकरणवादा वेदस्य पौरुषेयत्वे प्रमाणमिति। तदयुक्तम्; तेषामपि परस्परविरुद्धार्थतया प्रमाणान्तरप्रतिहततया चार्थवादत्वमेवेति न पुनः स्वातन्त्र्यमिति निर्णयात्। काठकादिसमाख्यापि कस्यचिदेव कठादेः प्रकृष्टवचनमिति "तेन प्रोक्तम्"[1] इति प्रवचननिबन्धनैवेति सिद्धमपौरुषेया वेदा इति ॥

इति चिदानन्दपण्डितकृतौ[2] नीतितत्त्वाविर्भावे वेदापौरुषेयवादः चतुश्चत्वारिंशत्समाप्तः ॥

साकूतं गहनं कुमारिलमतं जिज्ञासुभिः पण्डितै-
रप्यस्मास्ववधीरणा यदि परं ग्रन्थोऽयमभ्यस्यताम्।
नो चेदुद्धततर्कतार्किकसभामध्यस्थितानां भवेत्
तत्तन्मार्गविचक्षणत्वविरहादात्मैव नो वञ्चितः ॥

यो भूयस्सोमपायी श्रुतिसरणिमणिर्विश्वसाधारणश्री-
र्विद्यानामेकमोकस्त्रिजगति विदितः श्रीधरो ब्रह्मनिष्ठः।
तत्सूनुः सूक्तिभूमिर्जगदुपकृतये श्रीचिदानन्दनामा
तत्त्वाविर्भावमुच्चैर्व्यधित बुधसमारोहणे रौहिणेयः ॥

इति चिदानन्दपण्डितकृतौ नीतितत्त्वाविर्भावस्समाप्तः ॥

---

१. ति वचन. ग. ङ. २. इदं घपाठे केवलं दृश्यते.

श्लोकानुक्रमणी।

श्लोकः		पृष्ठम्
अकारणत्वे तालवादि	....	१९८
अकृतेदञ्चिदानन्दः	....	१७९
अथ देहेन्द्रियज्ञान	....	२११
अथ युक्त्या निराकर्तुं	....	१८०
अनिर्विकल्पपूर्वत्वात्	....	१७९
अनुमासन्निकृष्टेऽर्थे	....	१३७
अनैकान्त्यात्तृतीयस्य	....	६८
अन्वितस्यैव शक्यत्वे	....	२३३
अन्विते गौरवाच्छक्तेः	....	२२५
अर्थबोधादिरूपस्य	....	३
असिद्धेः परिशेषस्य	....	४२
आकाङ्क्षासत्तियोग्यत्वैः	....	२९
आचार्यकृतिप्रकृतेः	....	१
आदौ स्वाध्याय	....	१
इति युक्तिभिरेताभिः	....	१९३
इदंगवोरपर्याय	....	७८
एवञ्च सत्यनिर्वाच्यः	....	११४
किञ्चापूर्वाभिधायित्वं	....	२७
कृत्या साध्यं	...	१४
ग्रहणादग्रहाद्वापि	....	४६
जात्यैक्यं प्रत्यभिज्ञेयं	...	१९४
तत्परेभ्यः पदेभ्योऽर्थाः	....	२३१
द्रव्यञ्चातिर्गुणः	....	६६
धियामबाह्यग्राह्यत्वं	....	१२०

श्लोकः		पृष्ठम्
न च प्रपञ्चो मिथ्येति	....	११९
नैको भोक्ता	....	२१६
प्रतीतो वा न वा	....	१०२
प्रत्यक्षत्वमभावस्य	....	१७९
प्रवृत्तिहेतुः सर्वेषां	....	२१
प्रामाण्यमनुवृत्तत्वात्	....	३९
भवेत्प्रामाण्यसंवित्तिः	....	३४
मानमिन्द्रिययोगोत्थमिह	...	५७
यो भूयस्सोमपायी	....	१३९
वन्दे कल्याणयोरेकम्	...	१
वाक्यार्थोऽनुमया	....	१४७
विदुषामयं प्रबन्धो	....	१
विलम्बितप्रवृत्तित्वाद्	....	८४
वृत्तिः पङ्कजशब्दस्य	....	५८
वेदानां कर्तृभावे	....	३०
वेदानां पौरुषेयत्वे	....	२३५
व्युत्पत्तिलाभात्	...	१७
शुक्तिरर्थान्तरीभूत	....	११४
संसर्गविषयं वाक्यं	....	२१५
सर्वत्र वस्तुसन्देहे	....	७८
सा किमन्यादृशी	....	१२०
साकूतं गहनं	....	२३९
सादृश्यमात्रे गोस्साध्ये	...	१९१
सोपाधिकत्वादव्याप्तेः	...	१८३
स्वभावतः प्रतीतेर्वा	....	७९
हेतू भवेतां	....	१९७

अनूदितश्लोकानुक्रमणी।

अनुवादः	आकरः	पुटम्
अगोनिवृत्तिस्सामान्यं	श्लोकवार्त्तिकम् सू. ९ श्लो. १	९४
अनियम्यस्य नायुक्तिः	न्यायकुसुमाञ्जलिः ३–१९	१६०
अविभागो हि बुद्ध्यात्मा		११४
असत्त्वान्नास्ति सम्बन्धः		३१
आहुर्विधातृ प्रत्यक्षं		१०३
उत्तमः पुरुषस्त्वन्यः	भगवद्गीता १५–१७	२१९
उपनीय गुरुः शिष्यं	याज्ञवल्क्यस्मृतिः २–१५	१०
उपनीय तु यः शिष्यं	मनुस्मृतिः १–१४०	६
उपनीय ददद्वेदम्	याज्ञवल्क्यस्मृतिः २–१४	१०
उपलक्षणभावे वा		१७१
एक एव च भूतात्मा		२१८
एकप्रत्यवमर्शस्य		२०४
कुर्याद्बर्हिशिखास्थस्था		१६४
कुलिशेन्द्रगतन्नाम		१६३
तस्मिन् सदपि मानत्वं		३३
दुष्टोपलम्भसामग्री	न्यायकुसुमाञ्जलिः ३–३	१९१
न किञ्चिदेकमेकस्मात्		२०७
न याति न च तत्रासीद्		९१
न हि भेदविनिर्मुक्ते		९२
निजं यत्त्वात्मचैतन्यम्		२२२

अनुवादः	आकरः	पुटम्
नित्यं सत्त्वमसत्त्वं वा		२०६
पश्यतः श्वेतमारूपं	श्लोकवार्त्तिकम् वाक्याधिकरणम् श्लो. ३५८	२२४
प्रतिपत्तेरपारोक्ष्याद्	न्यायकुसुमाञ्जलिः २—२०	१७७
प्रतियोगिनि सामर्थ्याद्	,, ३—२१	१७७
प्रमाणग्राहिणीत्वेन		१६६
भावो यथा तथाभावः	न्यायकुसुमाञ्जलिः १—१०	१६२
मूलक्षयकरीं प्राहुः		१०१
यज्जातीयो यतस्सिद्धः		२०७
वह्न्यात्मा वदने न्यस्तो		१६४
वायुवेश्मनि वायुस्थं		१६३
वृत्तावभ्यासवत्यां तु		३४
श्येनस्वरूपं नानर्थः	श्लोकवार्त्तिकम् सू. २—श्लो. २२५	२४
श्रुतान्वयादनाकाङ्क्षं	न्यायकुसुमाञ्जलिः ३—१२	१५४
स्वकाले यदकुर्वंस्तु		१६१
स्वरूपमात्रं दृष्ट्वा च	श्लोकवार्त्तिकम् सू. ५—श्लो. २८	१७८
हेतुर्यस्य विनाशोऽपि		२०६

शुद्धिपत्रिका।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
४	१	सामर्थ्यलभ्यमथर्न्न	सामर्थ्यलभ्यमर्थन्न
६	१०	माशङ्क्यन्तरङ्ग	माशङ्क्यान्तरङ्ग
७	१८	अचार्यस्य	आचार्यस्य
१६	२	कार्यवादः	कार्यवादः
२२	१०	रुत्पत्त्यपूर्वा	रुत्पत्त्यपूर्वा
२६	३	च्छयेनस्य	च्छ्येनस्य
२७	२	शास्त्राम्या	शास्त्राभ्या
२८	७	निबृत्तेः	निवृत्तेः
२९	६	प्रागभावरूपस्यऽपि	प्रागभावरूपस्यापि
३१	३	असत्वासम्बन्ध	असत्त्वासम्बन्ध
३१	५	असत्वान्नास्ति	असत्त्वान्नास्ति
३१	५	सत्वसङ्गिभिः	सत्त्वसङ्गिभिः
३१	१७	सत्वसाधनम् ;	सत्त्वसाधनम् ;
३१	१७	सत्वेऽप्यनुप	सत्त्वेऽप्यनुप
३१	१८	असत्वेऽप्युप	असत्त्वेऽप्युप
३५	५	स्वबिषय	स्वविषय
३६	८	स्वबिषय	स्वविषय
३६	१४	दूरत्वादिषु,	दूरत्वादिषु
३९	४	प्रमाण्याप्रामाण्ये	प्रामाण्याप्रामाण्ये
३९	१२	तत्र च।	तत्र च—
४०	१	शक्तो	शक्तौ

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९९	१०	पूवर्त्र	पूर्वत्र
९६	१९	क्षणमात्रग्रहिणो	क्षणमात्रग्राहिणो
६२	७	प्रमाणभावात्	प्रमाणाभावात्
६४	१०	साक्षात्परम्परया वा	साक्षात्परम्परया वा
६४	१७	[आत्मसंयोगवादः ।]	[अजसंयोगवादः ।]
७०	१४	वा वावयविनि	वावयविनि
७०	१९	महत्वे	महत्त्वे
७१	४	विशेष्यभावः	विशेष्यभावः
७९	१६	वस्तुनो भवेत्	वस्तुनोर्भवेत्
८०	२–३	सहादर्शने विरोधस्य	सहादर्शनेन विरोधस्य
८९	१७	ग्रहणान्महत्व	ग्रहणान्महत्त्व
९९	१६	त्सत्वमित्युप	त्सत्त्वमित्युप
९६	९	सत्वं सिद्धम् ।	सत्त्वं सिद्धम् ।
१००	७	व्यवच्छेद्यावधि	व्यवच्छेदावधि
१०७	१७	माया मयत्वेऽपि	मायामयत्वेऽपि
१०८	१७	ख्यानुपपत्तेः	ख्यानानुपपत्तेः
१११	६	[मिथ्यावादः ।]	[अविद्यावादः ।]
११२	१	कादाचित् कस्य	कादाचित्कस्य
११२	१४	एवञ्चार्थापात्ति	एवञ्चार्थापत्ति
११६	८	अतस्सिद्धमबाधित	अतस्सिद्धमबाधित
१२७	८–९	यथा — सम्प्रतिपन्नो	यथा सम्प्रतिपन्नो
१३४	१०	संस्कारञ्च	संस्कारश्च
१३९	८	संख्याथोगस्यैव	सङ्ख्यायोगस्यैव
१३७	५	व्याप्तिस्वभावात्	व्याप्तिः स्वभावात्
१३७	१७	इत्युभयतः स्पाशा	इत्युभयतःस्पाशा

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१४१	४	प्रतिपिपादयिषयापक्ष	प्रतिपिपादयिषया पक्ष
१४१	८	तद्यथा—	तद्यथा
१४१	१२	साधारणश्च	साधारणोऽसाधारणश्च
१४४	१७	बाक्यार्थस्यापि	बाक्यार्थस्यापि
१४५	१, ३	कांक्षादि	काङ्क्षादि
१५४	११	कांक्षं	काङ्क्षं
१५५	३	नवकंबलो	नवकम्बलो
१५७	६	यतः।	यतः—
१६३	८	प्रध्वंसाना	प्रध्वंसानां
१६८	८	शाब्देनैवान्वय	शाब्देनैवान्वय
१३८	१४	छिनत्त्वर्थेन	छिनत्त्यर्थेन
१६९	११	किमेकसंख्या	किमेकसङ्ख्या
१७३	३	पलम्भावस्य	पलम्भाभावस्य
१७३	१२	वैय्यत्यात्त	वैयत्यात्त
१७५	१	त्वादननन्यथा	त्वादनन्यथा
१७९	६	स्संबन्धान्तर	स्सम्बन्धान्तर
१९४	१४	दीपान्तराद्दीपने	दीपान्तरोद्दीपने
१९५	३	सामान्यादिगतकत्व	सामान्यादिगतैकत्व
२०१	१३	व्यावृत्तिसिद्धरिति	व्यावृत्तिसिद्धिरिति
२०१	१५	भाव इति	भावा इति
२१३	९	च्छेत्तुरपि च्छेद	छेत्तुरपि छेद
२१५	१२	अतश्चन्द्रपदेस्यार्थेन	अतश्चन्द्रपदस्यार्थेन
२१७	१५	श्रावणत्वेऽपि	श्रवणत्वेऽपि

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२२०	२	निद्राभाव	दुःखाभाव
२२०	१७	सर्वमात्मैवासी तत्	सर्वमात्मैवासीत् तत्
२२१	१	मुक्ताववि्भाव	मुक्ताविर्भाव
२२१	१५	मुक्तस्यामनस्त्वप्राति	मुक्तस्यामनस्त्वप्रति
२२२	२	ज्ञातुज्ञाते	ज्ञातुर्ज्ञाते
२२२	८	निजं यत्वात्म	निजं यत्त्वात्म
२२६	८	णानुः पपत्तेः	णानुपपत्तेः
२३४	४	तथानकेषां	तथानेकेषां
२३९	१५	परम्पराय	परम्परया
२३९	९	कुमारिलमत	कुमारिलमतं